–पक्ष *a.* like, similar. (–क्षः) 1 the opposite side, party or faction, hostility; विमृश्य पक्षप्रतिपक्षाभ्यामवधारणं नियमः Gaut. S. –2 an adversary, enemy, foe, rival; प्रतिपक्षकामिनी, –लक्ष्मी 'a rival wife'; Bv. 2. 64; दासीकृतायाः प्रतिपक्षलक्ष्म्याः Vikr. 1. 73; प्रतिपक्षमशक्तेन प्रतिकर्तुम् K. P. 10; Vikr. 1. 70; often used in comp. in the sense of 'equal' or 'similar'. –3 remedy, expiation; यादवस्य पापस्य प्रतिपक्षमुपदिशामि Nāg. 5. –4 a defendant or respondent (in law). °ता 1 hostility, opposition. –2 obstacle. –पक्षित *a.* 1 containing a contradiction. –2 nullified by a contradictory premise; (as a *hetu* in न्याय); cf. सत्प्रतिपक्ष. –पक्षिन् *m.* an opponent, adversary. –पण्यम् merchandise in exchange; Buddh. –पथम् *ind.* along the road, towards the way; प्रतिपथगतिरासीद् वेगदीर्घीकृताङ्गः Ku. 3. 76. –पदम् *ind.* 1 at evry step. –2 at every place, everywhere. –3 expressly. –4 in every word; प्रतिपदाख्याने तु गौरवं परिहरद्भिर्वृत्तिकारैः सर्वसामान्यः शब्दः प्रतिगृहीतः प्रकृतिवदिति ŚB. on MS. 8. 1. 2. –पल्लवः an opposite or outstretched branch; R. –पाणः 1 a stake. –2 a counter-pledge. –3 a counter-stake; Mb. 3. –पादम् *ind.* in each quarter. –पात्रम् *ind.* with regard to each part, of each character; प्रतिपात्रमाधीयतां यत्नः Ś. 1 'let care be taken of each character'. –पादपम् *ind.* in every tree. –पाप *a.* returning sin for sin, requiting evil for evil. –पु(पू)रुषः 1 a like or similar man. –2 a substitute, deputy. –3 a companion. –4 the effigy of a man pushed by thieves into the interior of a house before entering it themselves (to ascertain if any body is awake). –5 an effigy in general. (–षम्) *ind.* man by man, for each man. –पुस्तकम् a copy of an original manuscript. –पूर्वाह्णम् *ind.* every forenoon. –प्रति *a.* counter-balancing, equal to. –प्रभातम् *ind.* every morning. –प्रसवः 1 (As opposed to अनुप्रसव) tracing causes back to the origin as — a pot, a lump of mud, mud, clay. Pātañjala Yogadarśana. –2 Negation of (or exception to) a negation. The force of a प्रतिप्रसव is positive, limiting as it does the scope of a प्रतिषेध or negation. Hence it is just the opposite of परिसंख्या whose force is negative or exclusive since it limits the scope of a positive statement. प्रतिप्रसवोऽयं न परिसंख्या ŚB. on MS. 10. 7. 45. –प्राकारः an outer wall or rampart. –प्रियम् a kindness or service in return; प्रतिप्रियं चेद् भवतो न कुर्यां वृथा हि मे स्यात् स्वपदोपलब्धिः R. 5. 56. –बन्धुः an equal in rank or station; Mb. 5. 121. 13. –बलः *a.* 1 able, powerful. –2 equal in strength, equally matched or powerful. (–लम्) 1 a hostile army; अस्त्रज्वालावलीढप्रतिबलजलधेरन्तरौर्वायमाणे Ve. 3. 7. –2 strength. –बाहु 1 the forepart of the arm. –2 an opposite side (in a square or polygon). –बि(वि)म्बः, –म्बम् 1 a reflection, reflected image; ज्योतिषां प्रतिबिम्बानि प्राप्नुवन्त्युपहारताम् Ku. 6. 42; Śi. 9. 18. –2 an image, a picture. –बीजम् a rotten seed. –भट *a.* vying with, rivalling; घटप्रतिभटस्तनि N. 13. 5. (–टः) 1 a rival, an opponent; निवासः कन्दर्पप्रतिभटजटाजूटभवने G. L. 21. –2 a warrior on the opposite side; समालोक्याजौ त्वां विदधति विकल्पान् प्रतिभटाः K. P. 10. –भय *a.* 1 fearful, formidable, terrible, frightful. –2 dangerous; स्वगृहोद्यानगतेऽपि स्निग्धैः पापं विशङ्क्यते मोहात्। किमु दृष्टबह्वपायप्रतिभयकान्तारमध्यस्थे ॥ Pt. 2. 171; Nāg. 5. 1.; Bhāg. 1. 6. 14. (–यम्) a danger; सुनन्द, श्रुतं मया संनिहितगरुडप्रतिभयसुहृदं जामाता जीमूतवाहनो गतः Nāg. 5. –भैरव *a.* dreadful. –मञ्चः a kind of measure (in music). –मञ्चाः platforms opposite to each other; दशभागिकौ द्वौ प्रतिमञ्चौ Kau. A. 2. 3. 21. –मण्डलम् 1 a secondary disc (of the sun &c.). –2 an eccentric orbit. –मन्दिरम् *ind.* in every house. –मल्लः an antagonist, a rival; उपेयिवांसं प्रतिमल्लतां रयस्मये जितस्य प्रसभं गरुत्मतः N. 1. 63; पातालप्रतिमल्लगल्ल &c. Māl. 5. 22. –मानना worship (पूजा); स्पर्शममुचिवपुरर्हति न प्रतिमाननां तु नितरां नृपोचिताम् Śi. 15. 35. –माया a counter-spell or charm; प्रतिमाया कृतं च तत् Mb. 1. 34. 22. –मार्गः the way back; Mb. 4. –मार्गम् *ind.* back, backwards. –माला capping verses (Mar. भेंडी). –मासम् *ind.* every month, monthly. –मित्रम् an enemy, adversary. –मुख *a.* standing before the face, facing; प्रतिमुखागत Ms. 8 291. –2 near, present. (–खम्) a secondary plot or incident in a drama which tends either to hasten or retard the catastrophe; see S. D. 334 and 351-364. (–खम्) *ind.* 1 towards. –2 in front, before. –मुखरी a particular mode of drumming. –मुद्रा 1 a counter-seal. –2 the impression of a seal. –मुहूर्तम् *ind.* every moment. –मूर्तिः *f.* an image, a likeness. –मूषिका *f.* a musk-rat (Mar. चिचुंदरी). –यूथपः the leader of a hostile herd of elephants. –रथः an adversary in war (lit. in fighting in a war-chariot); दौष्यन्तिमप्रतिरथं तनयं निवेश्य Ś. 4. 20. –रथ्यम् in every road; अस्मिन् नगरे प्रतिरथ्यं भुजङ्गबद्धसंचारे Udb. –रवः, –ध्वानिः 1 an echo; प्रतिरवविततो वनानि चक्रे Ki. 10. 4. –2 quarrel; controversy. –3 (Ved.) life (प्राण). –रसितम् an echo; केनास्मत् सिंहनादप्रतिरसितसखो दुन्दुभिस्ताड्यतेऽयम् Ve. 1. 22. –राजः a hostile king. –रात्रम् *ind.* every night. –रूप *a.* 1 corresponding, similar, having a counter-part in; अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव Kaṭh. 2. 2. 9. –2 beautiful. –3 suitable, proper; इदं न प्रतिरूपं ते स्त्रीष्वदाक्षिण्यमीदृशम् Bu. Ch. 4. 66; आत्मनः प्रतिरूपं सा बभाषे चारुहासिनी Rām. 4. 19. 17. –4 facing (अभिमुख); प्रतिरूपं जनं कुर्यान्न चेत् तद् वर्तते यथा Mb. 12. 97. 16 (com. प्रतिरूपं युद्धाभिमुखम्). (–पम्) 1 a picture, an image, a likeness. –2 a mirror-like reflecting object; अदर्शनं स्वशिरसः प्रतिरूपे च सत्यपि Bhāg. 10. 42. 28. –3 an object of comparison (उपमान); भवान्मे खलु भक्तानां सर्वेषां प्रतिरूपधृक् Bhāg. 7. 10. 21. –रूपक *a.* resembling, similar (at the end of comp.); जहीमान् राक्षसान् पापानात्मनः प्रतिरूपकान् Mb. 3. 290. 11; चेष्टाप्रतिरूपिका मनोवृत्तिः Ś. 1. (–कम्) 1 a picture, an image; अभिदेर्गरदैश्चैव प्रतिरूपककारकैः Mb. 12. 59. 49. –2 a forged edict; जर्जरं चास्य विषयं कुर्वन्ति प्रतिरूपकैः Mb. 12. 56. 52. –3 a reflection. –लक्षणम् a mark, sign, token. –लिपिः *f.* a transcript, a written copy. –लेखः a writ of reply; प्रावृत्तिकश्च प्रतिलेख एव Kau. A. 2. 10. 28. –लोम *a.* 1 'against the

hair or grain', contray to the natural order, inverted, reverse (opp. अनुलोम); नववर्षसहस्राक्षः प्रतिलोमोऽभवद् गुरुः Bhāg. 12. 14. 15. -2 contrary to caste (said of the issue of a woman who is of a higher caste than her husband). -3 hostile. -4 low, vile, base. -5 left (वाम). -6 obstinate, perverse; अपरिचितस्यापि तेऽप्रतिलोमः संवृत्तः Ś. 7. -7 disagreeable, unpleasant. (-मम्) any injurious or unpleasant act. (-मम्) *ind.* 'against the hair or grain', inversely, invertedly. °ज *a.* born in the inverse order of the castes; *i. e.* born of a mother who is of a higher caste than the father; cf. Ms. 10. 16, 25. -लोमक *a.* reverse, inverted; राजन्यविप्रयोः कस्माद् विवाहः प्रतिलोमकः Bhāg. 9. 18. 5. -कम् inverted order. -लोमतः *ind.* 1 in consequence of the inverted order or course; Ms. 10. 68. -2 in an unfriendly manner; यदा बहुविधां वृद्धिं मन्येत प्रतिलोमतः Mb. 12. 103. 39. -वत्सरम् *ind.* every year. -वनम् *ind.* in every forest. -वर्णिक *a.* similar, corresponding. -वर्धिन् *a.* being a match for. -वर्षम् *ind.* every year. -वस्तु *n.* 1 an equivalent, a counterpart -2 anything given in return. -3 a parallel. °उपमा a figure of speech thus defined by Mammaṭa:— प्रतिवस्तूपमा तु सा॥ सामान्यस्य द्विरेकस्य यत्र वाक्यद्वये स्थितिः। K. P. 10; *e. g.* तापेन भ्राजते सूर्यः शूरश्चापेन राजते Chandr. 5. 48. -वातः a contrary wind; प्रतिवातेऽनुवाते च नासीत गुरुणा सह Ms. 2. 203. (-तम्) *ind.* against the wind; चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य Ś. 1. 33. -वारणः a hostile elephant. -वासरम् *ind.* every day. -विटपम् *ind.* 1 on every branch. -2 branch by branch. -विषम् an antidote. (-षा) a birch tree. -विष्णुकः a Muchakunda tree. -वीरः an opponent, antagonist. -वीर्यम् being equal to or a match for. -वृषः a hostile bull. -वेलम् *ind.* at each time, on every occasion. -वेशः 1 a neighbouring house, neighbourhood. -2 a neighbour. -वेशिन् *a.* a neighbour; दृष्ट्वा प्रभातसमये प्रतिवेशिवर्गः Mk. 3. 14. -वेश्मन् *n.* a neighbour's house. -वेश्यः a neighbour. -वैरम् requital of hostilities, revenge. -शब्दः 1 echo, reverberation; वसुधाधरकन्दराभिसर्पी प्रतिशब्दोऽपि हरेर्भिनत्ति नागान् V. 1. 16; Ku. 6. 64; R. 2. 28. -2 a roar. -शशिन् *m.* a mock-moon. -शाखम् *ind.* for every branch or school (of the Veda). -शाखा a side-branch; महाभूतविशेषश्च विशेषप्रतिशाखवान् Mb. 14. 35. 21. -संवत्सरम् *ind.* every year. -सङ्क्षिका 1 a cloak to keep off the dust; Buddh. -संदेशः a reply to the message; दर्पसारस्य प्रतिसंदेशमावेदयत् D. K. 2. 1. -सम *a.* equal to, a match for. -सव्य *a.* in an inverted order. -सामन्तः an enemy. -सायम् *ind.* every evening. -सूर्यः, -सूर्यकः 1 a mock-sun. -2 a lizard, chameleon; 'कृकलासस्तु सरटः प्रतिसूर्यः शयानकः।' Hemchandra; तृष्यद्भिः प्रतिसूर्यकैरजगरस्वेदद्रवः पीयते U. 2. 16. -सेना, सैन्यम् a hostile army: निहतां प्रतिसैन्येन वडवामिव पातिताम् Rām. 2. 114. 17. -स्थानम् *ind.* in every place, everywhere. -स्मृतिः N. of particular kind of magic; गृहाणेमां मया प्रोक्तां सिद्धिं मूर्तिमतीमिव। विद्यां प्रतिस्मृतिं नाम Mb. 3. 36. 30 -स्रोतस् *ind.* against the stream; सरस्वतीं प्रतिस्रोतं ययौ ब्राह्मणसंवृतः Bhāg. 10. 78. 18. -*a.* going against the stream; अथासाद्य तु कालिन्दीं प्रतिस्रोतः समागताम् Rām. 2. 55. 5. -हस्तः, -हस्तकः a deputy, an agent, substitute, proxy; आश्रितानां मृतौ स्वामिसेवायां धर्मसेवने। पुत्रस्योत्पादने चैव न सन्ति प्रतिहस्तकाः॥ H. 2. 33. -हस्तीकृ to take; Pratijñā 3. -हस्तिन् the keeper of a brothel; Dk. 2. 2.

प्रतिक *a.* Worth or bought for a Kārṣāpaṇa, q. v. P. V. 1. 25 Vārt. 2.

प्रतिकर्षः 1 Aggregation, drawing together. -2 Anticipation (of a word) occurring later on. See अपकर्ष.

प्रतिकषः 1 A leader. -2 An assistant. -3 A messenger (वार्ताहर).

प्रति (ती) काशः 1 A reflection. -2 Look, appearance, resemblance; oft. at the end of comp. in this sense and translated by 'like', 'resembling'; पुटपाकप्रतीकाशः U. 3. 1.

प्रतिकुञ्चित *a.* Bent, curved.

प्रतिकृ 8 U. 1 To requite, pay back, repay, return; पूर्वं कृतार्थो मित्राणां नार्थं प्रतिकरोति यः Rām. -2 To remedy, cure; व्याधिमिच्छामि ते ज्ञातुं प्रतिकुर्यां हि तत्र वै Mb. -3 To give back, restore, replace; प्रतिकुर्याच्च तत् सर्वम् Ms. 9. 285 (com. विनाशितं सर्वं पुनर्नवं कुर्यात्). -4 To retaliate; R. 12 94. -5 To counteract. -6 To repair, mend.

प्रतिकरः Requital, compensation; न सुप्रतिकरं तत् तु मात्रा पित्रा च यत् कृतम् Rām. 2. 111. 9.

प्रतिकर्तव्य, -कार्य *a.* 1 To be retaliated, returned or paid (as a debt. &c.) -2 To be counteracted. -3 To be cured or treated (by a physician). -र्यम् Retribution, retaliation; दिष्ट्या ते प्रतिकर्तव्ये मतिर्जातेयमच्युत Mb. 10. 4. 1.

प्रतिकर्तृ *a.* (-र्त्री *f.*) Requiting, recompensing -*m.* An opponent, adversary.

प्रतिकर्मन् *n.* 1 Requital, retaliation; उषिता स्मो वने वासं प्रतिकर्म चिकीर्षवः Mb. 4. 58. 18. -2 Redress, remedy, counter-action; पश्येव कृतवणप्रतिकर्मा वत्सराजः Pratijñā 2. -3 Personal decoration, dress, toilet; (अबलाः) प्रतिकर्म कर्तुमुपचक्रमिरे समये हि सर्वमुपकारि कृतम् Śi. 9. 43; 5. 27; Ku. 7. 6; आविष्कृताङ्गप्रतिकर्मरम्यं बिभीषणं वाचमुवाच माता Bk. 12. 1.; विभूषितेयं प्रतिकर्मनित्या Rām. 2. 37. 35. -4 Opposition, hostility. -5 Bodily suffering; सा कृष्णमाराधय सौहृदेन प्रेम्णा च नित्यं प्रतिकर्मणा च Mb. 3. 224. 4. -6 Expiatory and welfare rituals (शान्तिकपौष्टिकादि कर्म); प्रतिकर्म पराचार ऋत्विजां स्म विधीयते Mb. 12. 79. 2.

प्रति (ती) कारः 1 Requital, reward, return; उपकारेण वीरस्तु प्रतिकारेण युज्यते Rām. 4. 27. 45. -2 Revenge, retaliation, retribution. -3 Counter-action, obviating, prevention, remedy, application of a remedy; विकारं खलु परमार्थतोऽज्ञात्वाऽनारम्भः प्रतीकारस्य Ś. 3; प्रतीकारो व्याधेः

सुखमिति विपर्यस्यति जनः Bh. 3. 92. -4 Opposition, obstruction. -5 Help. -6 A kind of treaty where one party requites the services of the other. -7 Imitating; नैव स्म सीता विनिवृत्तभावा प्रियस्य भर्तुः प्रतिकारकामा Rām. 2. 37. 37 (com. भर्तुः प्रतिकारकामा वेषादिभिस्तदवस्थासदृशावस्थासंपादनकामा). -Comp. -कर्मन् *n.* making reparation or amends. -विधानम् application of a remedy, medical treatment; प्रतिकारविधानमायुषः सति शेषे हि फलाय कल्पते R. 8. 40.

प्रतिकारिन् *a.* 1 Retaliating, opposing, counteracting. -2 Applying or using remedies.

प्रतिकृत *p.p.* 1 Returned, repaid, requited, retaliated. -2 Counteracted, remedied. -3 Obliged (कृतोपकार); तदेवं शक्तियुक्तस्य पूर्वं प्रतिकृतस्तथा। रामस्यार्हसि पिङ्गेश कर्तुं सर्वात्मना प्रियम्॥ Rām. 4. 29. 25; also 4. 29. 20. -4 Hurt, offended; केन वा ते प्रतिकृतम् Bhāg. 1. 18. 40. -तम् 1 Recompense. -2 Opposition; कृतप्रतिकृतैश्चित्रैर्बाहुभिश्च सुसङ्कटैः Mb. 4. 13. 27.

प्रतिकृतिः *f.* 1 Revenge, retaliation; कृते प्रतिकृतिं कुर्याद् हिंसिते प्रतिहिंसितम् Pt. 5. 84. -2 Return, requital. -3 A reflection, reflected image; यस्यां दृष्ट्वाऽमलायां प्रतिकृतिममराः स्वां भवन्त्यानमन्तः Viṣṇupādastotra. 16. -4 A likeness, picture, statue, an image; सादृश्यप्रतिकृतिदर्शनैः प्रियायाः R. 8. 92; 14. 87; 18. 53. -5 A substitute. -6 Resistance.

प्रतिक्रिया 1 Recompense, requital. -2 Retaliation, revenge, retribution. -3 Counteracting, remedying, removal; पूरोत्पीडे तडागस्य परीवाहः प्रतिक्रिया U. 3. 29; अहेतुः पक्षपातो यस्तस्य नास्ति प्रतिक्रिया U. 5. 17; R. 15. 4. -4 Opposition. -5 Personal decoration, embellishment, dress. -6 Protection. -7 Help, succour. -8 A fence. -9 Behaviour (आचरण); नहि युक्ता तवैतस्य रूपस्यैवं प्रतिक्रिया Rām. 7. 17. 4.

प्रतिकृष्ट *p. p.* 1 Twice ploughed. -2 Repulsed, despised, rejected. -3 Hidden, concealed. -4 Low, vile, abject.

प्रतिकोपः, प्रतिक्रोधः Anger against any one.

प्रतिक्रमः Inverted order.

प्रतिक्रमणम् Ved. 1 Stepping towards. -2 (With Buddhists) A confession.

प्रतिक्रुष्ट *a.* Miserable, poor.

प्रतिक्षयः A guard, an attendant.

प्रतिक्षिप् 6 P. 1 To throw or cast into. -2 To hurt, injure. -3 To revile, ridicule.

प्रतिक्षिप्त *p. p.* 1 Turned away, rejected, dismissed. -2 Repelled, resisted, repulsed, opposed. -3 Abused, reviled, traduced. -4 Sent, despatched. -5 Hurt, injured. -6 Despised, slighted. -7 Falsely accused. -प्तम् Medicine.

प्रतिक्षेपः, -प्रतिक्षेपणम् 1 Not acknowledging, rejection. -2 Opposing, controverting, contradiction. -3 Contest.

प्रतिक्षुतम् Sneezing.

प्रतिखुरः A dead foetus; निःसृतहस्तपादशिरःकायमङ्गी प्रतिखुरः Suśr.

प्रतिख्यातिः *f.* Renown, fame.

प्रतिगद् 1 P. To answer.

प्रतिगम् 1 P. 1 To go towards, advance. -2 To return.

प्रतिगत *p. p.* 1 Flying backward and forward, wheeling about. -2 Lost from the memory.

प्रतिगमनम् Returning, going back, return.

प्रतिगरः The responsive call (of the अध्वर्यु to होतृ); ओमित्यध्वर्युः प्रतिगरं प्रतिगृणाति T. Up. 1. 8. 1.

प्रतिगर्हित *p. p.* Blamed, reviled.

प्रतिगर्ज् 1 P. 1 To roar at, to roar against. -2 (fig.) To resist, oppose; अयोहृदयः प्रतिगर्जताम् R. 9. 9.

प्रतिगर्जना Roaring against, answering roar.

प्रतिग्रह् 9. U. 1 To hold, seize, take, support; वर्षधरप्रतिगृहीतमेनम् M. 4; Ms. 2. 48. -2 To take, accept, receive; ददाति प्रतिगृह्णाति Pt. 2; अमोघाः प्रतिगृह्णन्तावर्घ्यानुपदमाशिषः R. 1. 44; 2. 22. -3 To receive or accept as a present. -4 To receive inimically, oppose, encounter, resist; to attack, assault; प्रतिजग्राह कालिङ्गस्तमस्त्रैर्गजसाधनः R. 4. 40; 12. 47. -5 To take in marriage, marry; विधिवत् प्रतिगृह्यापि त्यजेत् कन्यां विगर्हिताम् Ms. 9. 72.-6 To obey, conform or listen to. -7 To resort to, betake oneself to. -8 To eclipse. -9 To assent to, admit. -10 To occupy, take possession of. -11 To deprive (one) of. -12 To welcome, receive; प्रत्यगृह्णाद्यथान्यायं विदुरश्च महामनाः Mb. 14. 66. 6. -13 To eat, drink. -*Caus.* 1 To cause to accept, give, present. -3 To allow to take or retain; मुष्टं प्रतिग्राहयता स्वमर्थं पात्रीकृतो दस्युरिवासि येन Ś. 5. 20.

प्रतिगृहीत *p. p.* 1 Taken, received, accepted; त्वमस्या पुत्र इति प्रतिगृहीतः Ś. 2; प्रतिगृहीतं ब्राह्मणवचनम् V. 2; माता वा प्रतिगृहीता........अवरुद्धमानयेयुः Kau. A. 1. 18. -2 Admitted, assented to. -3 Married.

प्रतिग्रहः 1 Receiving, accepting. -2 Receiving or accepting a donation; अयाचितोपपन्ने तु नास्ति दोषः प्रतिग्रहे -3 The right of receiving or accepting a donation. -4 The right of receiving gifts (which is a peculiar prerogative of Brāhmaṇas); अध्यापनमध्ययनं यजनं याजनं तथा। दानं प्रतिग्रहं चैव ब्राह्मणानामकल्पयत्॥ Ms. 1. 88; 4. 86; Y. 1. 118 -5 A gift, present, donation; राज्ञः प्रतिग्रहोऽयम् Ś. 1; Śi. 14. 35. -6 A receiver (of a gift). -7 Kind or friendly reception; प्रतिग्रहाय पाण्डूनां प्रेषयामास कौरवान्

Mb. 1. 207. 12. -8 Favour, grace. -9 Marrying; तत्प्रतिग्रहलाभाय जित्वा भूपान् स्वयंवरे Bm. 1. 456. -10 Listening to. -11 The rear of an army. -12 A spitting-pot. -13 The sun near the moon's node. -14 a chamber-vessel (for sick persons). -15 a grasper, seizer; केश-प्रतिग्रहः = barber.

प्रतिग्रहणम् 1 Receiving presents. -2 Reception. -3 Marrying. -4 A vessel

प्रतिग्रहिन् *m.* A receiver.

प्रतिग्रहीतृ *m.* 1 A receiver. -2 A husband, one who marries.

प्रतिग्राहः 1 Accepting gifts. -2 A spitting-pot, spittoon.

प्रतिग्राहक, -हिन् *a.* One who receives or accepts gifts.

प्रतिग्राह्य *a.* Acceptable, admissible.

प्रतिघ *a.* Hostile, adverse. **-घः** 1 Opposition, resistance; उत्प्रतिघा इव द्विषः Sāhendra. 2. 42. -2 Fighting, combat, mutual beating. -3 Anger, wrath; प्रतिघः कुतोऽपि समुपेत्य नरपतिगणं समाश्रयत् Śi. 15. 53. -4 A Fainting. -5 An enemy.

प्रति (ती) घातः 1 Warding off, repulse; सर्वेषामेव शापानां प्रतिघातो हि विद्यते Mb. 1. 37. 4. -2 Opposition, resistance; अस्त्राणां प्रतिघाते च सर्वथैव प्रयोजयेत् Mb. 3. 167. 54. -3 A counterblow, blow in return; अथाददे वारुण-मन्यदस्त्रं शिखण्ड्यथोग्रं प्रतिघातमस्य Mb. 6. 85. 29. -4 Rebound, reaction; जयाशा यत्र चास्माकं प्रतिघातोत्थितार्चिषा Ku. 2. 49. -5 Prohibiting. -6 Embezzlement; कृतप्रतिघातावस्थसूचको निष्पन्नार्थः षण्मंशं लभेत Kau A. 2. 8. 26. -7 Ruin, degradation; आत्मनः प्रतिघातमाशङ्कमानः Bhāg. 5. 9. 3.

प्रतिघातक, -घातिन् *a.* Hostile, inimical, opposed to. -2 Interrupting, obstructing; वयमपि न खल्वेवंप्रायाः क्रतु-प्रतिघातिनः U. 5. 29. *v. l.* -3 Repelling, warding off -4 Encroaching upon, disturbing. -5 Reacting. -6 Dazzling; विजित्य नेत्रप्रतिघातिनीं प्रभाम् Ku. 5. 20.

प्रतिघातनम् 1 Repulsing, warding off. -2 Killing, slaughter.

प्रतिघ्नम् The body.

प्रतिचक्ष् 2 Ā. 1 To see, perceive. -2 To make visible, bring to light. -3 To expect.

प्रतिचक्षणम् 1 Viewing, looking at; तदस्य रूपं प्रति-चक्षणाय Bṛi. Up. 2. 5. 19. -2 Making visible; Bhāg. 4. 1. 56. -3 Look, view.

प्रतिचारः Toilet, personal adornment.

प्रतिचारित *a.* Proclaimed, published.

प्रतिचिकीर्षा Desire of retaliation or revenge, desire to be avenged; भगवन् पुत्रमिच्छामि भीष्मं प्रतिचिकीर्षया Mb. 5. 188. 5.

प्रतिचिन्तनम् Meditating upon.

प्रतिचोदना 1 Remembrance; तस्मात् त्वमुद्धवोत्सृज्य चोदनां प्रतिचोदनाम् Bhāg. 11. 12. 14. -2 Prevention.

प्रतिच्छद् 10 U. 1 To cover, envelop, clothe. -2 To hide, conceal; द्वीपिचर्मपरिच्छन्नो वाग्दोषाद् गर्दभो हतः H. 3. 9. -3 To endow, furnish or provide with. -4 To obscure.

प्रतिच्छदनम् A cover, a piece of cloth for a covering.

प्रतिच्छन्दः, -प्रतिच्छन्दकः 1 A likeness, picture, statue, an image; धनुःशतमात्रेण दृष्टः स दिव्यवारणप्रतिच्छन्दः Pratijñā. 1. -2 A substitute; गिरिप्रतिच्छन्दमहामतङ्गजाः Śi. 12. 29; प्रतिच्छन्दं धात्रा युवतिवपुषां किं नु रचितम् Avimārakam 2. 3.

प्रतिच्छन्न *p. p.* 1 Covered, covered over, enveloped; किं करोत्येव पाण्डित्यमस्थाने विनिवेशितम्। अन्धकारप्रतिच्छन्ने घटे दीप इवाहितः॥ Pt. 1. 394. -2 Hidden, concealed. -3 Furnished or provided with; धर्मलेशप्रतिच्छन्नः प्रभवं धर्मकामयोः Mb. 3. 33. 5. -4 Beset, hemmed in. -5 Clothed or dressed, clad; दग्धव्यं सुप्रतिच्छन्नं (कलेवरम्) Mb. 1. 125. 29; व्याघ्रचर्मप्रतिच्छन्नो वाक्कृते रासभो हतः Pt. 4. 45.

प्रतिच्छेदः Resistance, opposition.

प्रतिजन्मनम् Rebirth.

प्रतिजन्य *a.* Ved. Hostile, adverse.

प्रतिजल्पः An answer, reply.

प्रतिजल्पकः 1 A respectful concurrence. -2 A polite but evasive answer.

प्रतिजागरः Watchfulness, vigilance, attention.

प्रतिजागरणम् Watching, guarding.

प्रतिजीवनम् Resuscitation.

प्रतिज्ञा 9 Ā. 1 To promise, declare solemnly, engage, agree, vow; हरचापारोपणेन कन्यादानं प्रतिजानीते P. R. 4. -2 To state, affirm, assert, maintain, allege. -3 To bring forward or introduce, adduce. -4 To admit, own, acknowledge. -5 To confirm. -6 To approve, consent. -7 To observe, learn, discern. -8 To propose. -9 To remember with regret. -10 To become aware of; कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति Bg. 9. 31.

प्रतिज्ञा 1 Admission, acknowledgment. -2 A vow, promise, engagement, solemn declaration; दैवात् तीर्णप्रतिज्ञः Mu. 4. 12; तीर्त्वा जवेनैव नितान्तदुस्तरां नदीं प्रतिज्ञामिव तां गरीयसीम् Śi. 12. 74. -3 A statement, assertion, declaration, affirmation. -4 (In Nyāya phil.) A proposition, statement of the proposition to be proved, the first member of the five-membered Indian syllogism; साध्यनिर्देशः प्रतिज्ञा यथा पर्वतो वह्निमान् Gautamasūtram; see under न्याय; (पर्वतो वह्निमान् is the usual instance). -5 (In Law) A plaint, an indictment. **-Comp. -अन्तरम्**

(in logic) a subsequent proposition on failure of the first. -पत्रम्, -पत्रकम् a bond, written contract or document. -परिपालनम्, -पालनम् keeping one's word. -पारणम् fulfilment of a vow. -भङ्गः breach of promise. -विरोधः 1 breaking an agreement, acting contrary to promise. -2 denial of a logical proposition. -विवाहित *a.* betrothed. -संन्यासः 1 breaking a promise. -2 (in logic) abandonment of the original proposition; also प्रतिज्ञाहानि in this sense; प्रतिज्ञानार्थाय नयनं प्रतिज्ञासंन्यासः.

प्रतिज्ञात *p. p.* 1 Declared, stated, asserted. -2 Promised, agreed. -3 Admitted, acknowledged. -4 Agreeable, desirable. -तम् A promise. -Comp. -अर्थः a statement.

प्रतिज्ञानम् 1 Asserting, affirmation. -2 Agreement, promise. -3 Admission. -4 Bringing forward or adducing.

प्रतिज्ञेय *a.* To be promised &c. -यः A panegyrist, bard.

प्रतितरः An oarsman, a sailor.

प्रतितालः A kind of *Tala* in music; कान्तारः समराख्यश्च वंकुण्ठो वाञ्छितस्तथा। कथिताः शङ्करेणैव चत्वारः प्रतितालकाः॥ Saṅgītasāra.

प्रतिताली The key of a door.

प्रतिदर्शनम् Seeing, perceiving.

प्रतिदा 3 U. 1 To exchange, barter; तिलेभ्यः प्रतियच्छति माषान्. -2 To give back, return, restore; अद्यापि कोपविमुखीकृतगन्तुकामा नोक्तं वचः प्रतिददाति यदैव वक्त्रम् Ch. P. 36. -3 To recompensate. -4 To give as a reward.

प्रतिदत्त *p. p.* Returned, restored.

प्रतिदानम् 1 Restoration, giving back, restitution (as of a deposit). -2 Barter, exchange.

प्रतिदेय *a.* To be returned &c. -यम् A pawn, pledge. -2 An article purchased and given back.

प्रतिदारणम् 1 Fighting, battle. -2 Splitting.

प्रतिदिवन् *m.* 1 A day. -2 The sun.

प्रतिदीप्त *p. p.* Flaming against.

प्रतिदुह् *n.* Fresh milk.

प्रतिदूषित *a.* Defiled, contaminated.

प्रतिदृश् 1 P. 1 To see, behold. -2 To know, become aware.

प्रतिदृष्ट *p. p.* 1 Beheld. -2 Come in sight, become visible. -3 Famous, celebrated.

प्रतिद्रुह् *m.* One who seeks to injure in return.

प्रतिधा 3 U. 1 To place or lay on. -2 To return, restore. -3 To fix (as an arrow). -4 To offer, present -5 To use, employ. -6 To begin, commence. -7 To draw near, approach (as the night); (mostly Vedic in these senses). -8 To restrain.

प्रतिधा A draught.

प्रतिधानम् 1 Putting on. -2 Taking measures.

प्रतिधिः 1 Food. -2 (Vedic) A cross-piece on the pole of a carriage.

प्रतिधावनम् Assailing, attacking.

प्रतिध्वनिः, -प्रतिध्वानः An echo, reverberation; श्रुतपदरवस्तेषामेव प्रतिध्वनिमध्वनि N.

प्रतिध्वस्त *p. p.* 1 Down-cast. -2 Sunk, hanging down.

प्रतिनद् 1 P. 1 To resound, echo. -2 To answer with a shout. -*Caus.* To fill with noise, make resonant; Śānti. 2. 17; स्वस्थस्थितताण्डजकुलप्रतिनादितानि (उपवनानि) Ṛs. 3. 14.

प्रतिनादः An echo, a reverberation (also प्रतिनिनदः in this sense).

प्रतिनादित *a.* Resounding, echoing.

प्रतिनन्द् 1 P. 1 To bless; तौ गुरुर्गुरुपत्नी च प्रीत्या प्रतिननन्दतुः R. 1. 57; Ms. 7. 146; Ku. 7. 87. -2 To welcome, congratulate, hail with joy, receive gladly; प्रतिनन्द्य स तां पूजाम् Mb.; Ms. 2. 54. -3 To accept cheerfully; भर्तुः प्रसादं प्रतिनन्द्य मूर्ध्ना Ku. 3. 2. -4 To address kindly, show devotion. -*Caus.* To delight, gratify.

प्रतिनन्दनम् 1 Congratulating, welcoming. -2 Thanks giving.

प्रति (ती) नाहः A flag, banner.

प्रतिनिधा 3 U. 1 To substitute, put in the place of. -2 To slight, disregard. -3 To order.

प्रतिनिधिः 1 A representative, substitute; सोऽभवत् प्रतिनिधिर्न कर्मणा R. 11. 13; 1. 81; 4. 54; 5, 63; 9. 40. अलीशाहात् प्रतिनिधिं तस्य शैलस्य सर्वथा Śiva B. 28. 4. -2 A deputy, vicegerent. -3 Substitution. -4 A surety. -5 An image, likeness, picture.

प्रतिनिपातः Falling down, alighting.

प्रतिनियत *a.* 1 Settled, predestined; विधिर्वन्द्यः सोऽपि प्रतिनियतकर्मैकफलदः Bh. 2. 94. -2 Firm, unshakable; विपक्षाणां हेतोः प्रतिनियतधैर्यानुभवतः Mv. 6. 34.

प्रतिनियमः 1 A general rule. -2 A separate allotment; जननमरणकरणानां प्रतिनियमादयुगपत् प्रवृत्तेश्च Sān. K. 18. -3 A strict rule applying only to a particular case.

प्रतिनिर्जित *p. p.* 1 Vanquished, subdued. -2 Rescinded.

प्रतिनिर्देश्य *a.* That which, though before expressed, is repeated in order to state something more about it;

cf. the instance given in K. P. 7; उदेति सविता ताम्रस्ताम्र एवास्तमेति च, where ताम्र is repeated to show that the sun that rises *red* sets also *red*.

प्रतिनिर्यातनम् 1 Retribution, retaliation. -2 Returning, giving back.

प्रतिनिविष्ट *a.* Perverse, obstinate, hardened. -Comp. -मूर्खः a perverse fool, confirmed blockhead; न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् Bh. 2. 5.

प्रतिनिवेशः Obstinacy, obdurateness.

प्रतिनिवर्तनम् Returning, return. -2 Turning away from.

प्रतिनिष्क्रयः Retaliation, retribution.

प्रतिनिष्पूत *p. p.* Cleansed, winnowed.

प्रतिनुद् 6 U. To ward off, repel, repulse.

प्रतिनोदः Repelling, repulse.

प्रतिपद् 4 A. 1 To step or go towards, approach, resort or betake oneself to; उमामुखं तु प्रतिपद्य लोलाद् द्विसंश्रयां प्रीतिमवाप लक्ष्मीः Ku. 1. 43. -2 To enter upon, step upon, take, follow (as a way &c.); इतः पन्थानं प्रतिपद्यस्व Ś. 4; प्रतिपत्स्ये पदवीमहं तव Ku. 4. 10. -3 To arrive at, reach, attain: मरणमप्यपराः प्रतिपेदिरे Śi. 6. 16. -4 To get, gain, obtain, share, partake; स हि तस्य न केवलां श्रियं प्रतिपेदे सकलान् गुणानपि R. 8. 5, 13; 4. 1, 41; 11. 34; 12. 7; 19. 55; नदोत्तमांवदां लोकानमलान् प्रतिपद्यते Bg. 14. 14; Śi. 10. 63. -5 To accept, take to; प्रतिपत्तुमङ्ग घटते च न तव नृपयोग्यमर्हणम् Śi. 15. 22; 16. 24. -6 To recover, reobtain, regain, receive; प्रायः स्वं महिमानं क्षोभात् प्रतिपद्यते जन्तुः Ś. 6. 31; Ku. 4. 16; 7. 22. -7 To admit, acknowledge; न मासे प्रतिपत्तासे मां चेन्मर्तासि मैथिलि Bk. 8. 95; Ś. 5. 23; प्रमदाः पतिवर्त्मगा इति प्रतिपन्नं हि विचेतनैरपि Ku. 4. 33. -8 To hold, grasp, seize; सुमन्त्रप्रतिपन्नरश्मिभिः R. 14. 47; -9 To consider, regard, deem, look upon; तद्धनुर्ग्रहणमेव राघवः प्रत्यपद्यत समर्थमुत्तरम् R. 11. 79. -10 To undertake, promise to do, take in hand; निर्वाहः प्रतिपन्नवस्तुषु सतामेतद्धि गोत्रव्रतम् Mu. 2. 18; कार्यं त्वया नः प्रतिपन्नकल्पम् Ku. 3. 14; R. 10. 40. -11 To assent or agree to, consent; तथेति प्रतिपन्नाय R. 15. 93. -12 To do, perform, practise, observe; आचार प्रतिपद्यस्व Ś. 4; V. 2 'do the formal obeisance'; शासनमर्हतां प्रतिपद्यध्वम् Mu. 4. 18 'act up to or obey'. -13 To act or behave towards, deal, do anything to any one (with gen. or loc.); स कालयवनश्चापि किं कृष्णे प्रत्यपद्यत Hariv.; स भवान् मातृपितृवदस्मासु प्रतिपद्यताम् Mb.; कथमहं प्रतिपत्स्ये Ś. 5; न युक्तं भवतास्मासु प्रतिपत्तुमसांप्रतम् Mb. -14 To give or return (as a reply); कथं प्रतिवचनमपि न प्रतिपद्यसे Mu. 6; न जाने किं तातः प्रतिपत्स्यत इति Ś. 4. -15 To perceive, become aware of. -16 To know, understand, become acquainted with, learn, discover. -17 To roam, wander. -18 To take place, occur. -19 To restore. -20 To permit, allow. -21 To take place, happen. -22 To go back, return. (*-Caus.*) 1 To give, present, bestow, confer upon, impart; अर्थिभ्यः प्रतिपाद्यमानमनिशं प्राप्नोति वृद्धिं पराम् Bh. 2. 16; Ms. 11. 4; गुणवते कन्या प्रतिपादनीया Ś. 4. -2 To substantiate, prove, establish by proof; उक्तमेवार्थमुदाहरणेन प्रतिपादयति. -3 To explain, expound. -4 To bring or lead back, convey or transport (to a place) -5 To regard, consider. -6 To assert, declare to be, represent. -7 To procure. -8 To effect, accomplish. -9 To communicate, teach. -10 To appoint to, install (loc.). -11 To prepare, get ready. -12 To dispose of; एष हि न्यायो यदन्यत्र कृतार्थमन्यत्र प्रतिपाद्यते ŚB on MS 4. 2. 21.

प्रतिपत्तिः *f.* 1 Getting, acquirement, gain; चन्द्रलोकप्रतिपत्तिः; स्वर्ग° &c. -2 Perception, observation, consciousness, (right) knowledge; वागर्थप्रतिपत्तये R. 1. 1; तयोरभेदप्रतिपत्तिरस्ति मे Bh. 3. 99; गुणिनामपि निजरूपप्रतिपत्तिः परत एव संभवति Vās. -3 Assent, compliance, acceptance; प्रतिपत्तिपराङ्मुखी Bk. 8. 95 'averse from compliance, unyielding'. -4 Admission, acknowledgment. -5 Assertion, statement. -6 Undertaking, beginning, commencement. -7 Action, proceeding, course of action, procedure; वयस्य का प्रतिपत्तिरत्र M. 4; Ku. 5. 42; विषादलुप्तप्रतिपत्तिविस्मितं सैन्यम् R. 3. 40 'which did not know what course of action to follow through dismay'. -8 Performance, doing, proceeding with; प्रस्तुतप्रतिपत्तये R. 15. 75. -9 Resolution, determination; कैकेय्याः प्रतिपत्तिर्हि कथं स्यान्मम वेदने Rām. 2. 22. 16; व्यवसायः प्रतिपत्तिनिष्ठुरः R. 8. 65. -10 News, intelligence; कर्मसिद्धावाशु प्रतिपत्तिमानय Mu. 4; Ś. 6. -11 Honour, respect, mark of distinction, respectful behaviour; सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया Ś. 4. 17; 7. 1; R. 14. 22; 15. 12; तत् कस्मादेतस्मिन् महानुभावे प्रतिपत्तिमूढा तिष्ठसि Nāg. 1; यत्स महानुभावो वाङ्मात्रेणापि अकृतप्रतिपत्तिः अदक्षिणेति मां संभावयिष्यति Nāg. 2. -12 A method, means. -13 Intellect, intelligence. -14 Use, application. -15 Promotion, preferment, exaltation. -16 Fame, renown, reputation. -17 Boldness, assurance, confidence. -18 Conviction, proof. -19 A rite from which no advantage accrues. -20 The concluding portion of an action. (In Daṇḍaviveka G. O. S. 52, p. 259, it means punishment of an offence.) -21 Disposing of a matter or a thing which has served the purpose of something else; यद् येन प्रयोजनेन सम्बद्धमुत्पद्यते तत् तदर्थमेव न्याय्यम्। तस्यान्यत्र गमने प्रतिपत्तिरित्येतदुपपद्यते ŚB. on MS. 4. 2. 19. Also cf. एष हि न्यायो यदन्यत्र कृतार्थमन्यत्र प्रतिपाद्यत इति ŚB. on MS. 4. 2. 22; cf. also प्रतिपत्तिर्विविक्तकरणेन उपकरोति ŚB. on MS. 6. 4. 3. Hence प्रतिपत्तिकर्मन् means 'a mere disposal' (as opposed to अर्थकर्मन्) किं शाखाप्रहरणं प्रतिपत्तिकर्म उतार्थकर्मेति ŚB. on MS. 4. 2. 10. -22 giving (दान); अपात्रे प्रतिपत्तिः Mb. 12. 26. 31; दानवारिरसिकाय विभूतेर्वेद्मि तेऽस्मि सुतरां प्रतिपत्तिम् N. 21. 63. -23 Remedy (प्रतिविधान); प्रतिपत्तिं कां प्रत्यपद्यन्त मामकाः Mb. 7. 46. 3. -Comp. -दक्ष *a.* knowing how to act. -पटहः a kind of kettle drum. -पराङ्मुख *a.* obstinate, unyielding, Bk. -प्रदानम् Conferring promotion. -भेदः difference of view. -विशारद *a.* knowing how to act, skilful, clever; वाय्व्यमभिमन्त्र्याथ प्रतिपत्तिविशारदः Mb. 1. 227. 16.

प्रतिपत्तिमत् *a.* 1 Intelligent. -2 Active, prompt. -3 Celebrated, famous. -4 Noble, dignified.

प्रतिपद् *f.* 1 Access, entrance, way. -2 Beginning, commencement. -3 Intelligence, intellect. -4 The first day of a lunar fortnight. -5 A kettle-drum. -6 An introductory stanza. -7 Rank. -Comp. -चन्द्रः the new moon (the moon on the first day) particularly revered and saluted by people; प्रतिपच्चन्द्रनिभोऽयमात्मजः R. 8. 65. -तूर्यम् a kind of kettle-drum.

प्रतिपदा, -दी The first day of a lunar fortnight.

प्रतिपन्न *p. p.* 1 Gained, obtained. -2 Done, performed, effected, accomplished. -3 Undertaken, commenced. -4 Promised, engaged. -5 Agreed to, assented to; admitted, acknowledged. -6 Known, learnt, understood. -7 Answered, replied. -8 Proved, demonstrated; प्रमदाः पतिवर्त्मगा इति प्रतिपन्नं हि विचेतनैरपि Ku. 4. 33. -9 Approached, reached. -10 Conquered, overcome. -11 Conversant with, proficient in.

प्रतिपादक *a.* (-दिका *f.*) 1 Giving, granting, bestowing, imparting. -2 Demonstrating, supporting, proving, establishing. -3 Treating of, explaining, illustrating. -4 Promoting, furthering, advancing. -5 Effective, accomplishing.

प्रदिपादनम् 1 Giving, granting bestowing. -2 Demonstrating, proving, establishing. -3 Treating of, explaining, expounding; illustrating -4 Effecting, accomplishing, fulfilment. -5 Causing, producing. -6 Repeated action, practice. -7 Commencement; त्रेताविमोक्षसमये द्वापरप्रतिपादने Mb. 12. 141. 14. -8 Giving back, restoring. -9 Entrusting, appointing. -10 Action, worldly conduct.

प्रतिपादयितृ *m.* 1 A teacher, instructor. -2 A giver, bestower. -3 A demonstrator.

प्रतिपादित *p. p.* 1 Given, bestowed, granted, presented; यस्याः पितेव प्रतिपादितायाः Si. 3. 36. -2 Established, proved, demonstrated. -3 Explained, expounded. -4 Declared, asserted. -5 Caused, produced. -6 Suddenly appeared, manifested; स वै तदैव प्रतिपादितां गिरं दैवीं परिज्ञातपरात्मनिर्णयः Bhāg. 4. 9. 5.

प्रतिपाद्य *a.* To be treated, discussed, explained, propounded.

प्रतिपाद्यमान *a.* Given, offered; ह्यर्थिभ्यः प्रतिपाद्यमानमनिशं प्राप्नोति वृद्धिं पराम् Bh.

प्रतिपादुक *a.* 1 Producing, causing. -2 Ascertaining. -3 Making manifest or clear.

प्रतिपानम् Water for drinking. -2 Drinking, giving a drink; अश्वानां प्रतिपानं च खादनं चैन सोऽन्वशात् Rām. 2. 50. 47.

प्रतिपाल् -*Caus.* 1 To protect, preserve, guard, defend. -2 To wait for, await; महाराज तत् किं प्रतिपाल्यते Nāg. 5. -3 To act up to, obey. -4 To nourish, foster, rear. -5 To keep, maintain, observe, follow.

प्रतिपालकः A protector, guardian.

प्रतिपालनम् Guarding, protecting, defending. -2 Observance, following, practising; शृणु सखि साधनमेकं न कुलप्रतिपालनं श्रेयः Udb.

प्रतिपालित *p. p.* 1 Protected, cherished. -2 Observed, practised, followed.

प्रतिपिष्ट *p. p.* 1 Rubbed. -2 Struck against each other (as swords). -3 Bruised, crushed.

प्रतिपीडनम् Oppressing, molesting.

प्रतिपूज् 10. U. 1 To salute in return. -2 To honour, salute respectfully, esteem; प्रतिपूज्य वचस्तेषाम् Bhāg. 1. 2. 1. -3 To commend, approve.

प्रतिपूजनम्, -पूजा 1 Doing homage, showing respect. -2 Mutual salutation, exchange of courtesies.

प्रतिपूजित *p. p.* 1 Saluted in return. -2 Honoured, respectfully treated.

प्रतिपृ *Caus.* 1 To fill up, fill completely. -2 To satisfy, gratify.

प्रतिपूरणम् 1 Filling, filling up. -2 Injecting (a fluid &c.) -3 Congestion (of the head).

प्रतिपूर्ण *a.* Expanded, broad; प्रतिपूर्णं च जघनम् Rām. 2. 9. 42.

प्रतिप्रणामः An obeisance in return.

प्रतिप्रदानम् 1 Returning, restoring. -2 Giving in marriage.

प्रतिप्रभा Reflection.

प्रतिप्रयाणम् Return, retreat.

प्रतिप्रश्नः 1 A question asked in return. -2 An answer.

प्रतिप्रसवः 1 A counter-exception, an exception to an exception (wherein the general rule is shown to be applicable to cases falling under the exception); तृजकाभ्यां कर्तरि इत्यस्य प्रतिप्रसवोऽयं (याजकादिभिश्च) Sk. -2 A contrary effect.

प्रतिप्रस्थातृ *m.* An epithet of a priest who assists the Adhvaryū.

प्रतिप्रस्थानम् 1 Joining the opposite party, going over to the enemy. -2 The office of the प्रतिप्रस्थातृ. प्रतिप्रास्थानिक = relating to this office; प्रतिप्रास्थानिकं कर्म सात्यकिस्तु करिष्यति Mb. 5. 141, 42.

प्रतिप्रहारः A counter-blow, a blow in return.

प्रतिप्लवनम् Leaping back.

प्रतिफल् 1 P. 1 To be reflected. -2 To rebound, recoil. -3 To requite, return.

प्रतिफलः,-प्रतिफलनम् 1 A reflection, reflected image, an image or shadow. स्फुरन्नानारत्नस्फटिकमयभित्तिप्रतिफलम् A. L. 14; न बिम्ब त्वद्बिम्बप्रतिफलनलाभादरुणितम् A. L. -2 Remuneration, requital. -3 Retaliation, retribution.

प्रतिफलित *a.* 1 Reflected; शिष्टैः कृष्ट्वा स्वचेतःप्रतिफलितवृथारन्प्रमात्रप्रविष्टान् Mv. 6. 25. -2 Returned, requited.

प्रतिफुल्लक *a.* Blossoming, full-blown.

प्रतिबन्ध् 9 P. 1 To tie, fasten, bind (to); पीतप्रतिबद्धवत्साम् (धेनुम्) R. 2. 1. -2 To fix upon, direct towards; रसान्तरेषु प्रतिबद्धरागम् Ku. 7. 91. -3 To inlay, set, incase; यदि मणिस्त्रपुणि प्रतिबध्यते Pt. 1. 75; बहलानुरागकुरुविन्ददलप्रतिबद्धमध्यमिवं दिवलयम् Śi. 9. 8. -4 To obstruct, hinder, keep off or back, exclude, shut out; प्रतिबध्नाति हि श्रेयः पूज्यपूजाव्यतिक्रमः R. 1. 79. -5 To stop, interrupt; मैनमन्तरा प्रतिबध्नीतम् Ś. 6.

प्रतिबद्ध *p. p.* 1 Bound, tied, fastened to; वनाय पीतप्रतिबद्धवत्सां यशोधनो धेनुमृषेर्मुमोच R. 2. 1. -2 Connected with, harmonizing with; रसान्तरेषु प्रतिबद्धरागम् Ku. 7. 91. -3 Hindered, obstructed, impeded. -4 Set, inlaid; यस्याः पुरा परिचयप्रतिबद्धबीजम् Māl. 10. 21. -5 Furnished with, possessing. -6 Entangled, involved. -7 Kept at a distance. -8 Disappointed. -9 Fixed, directed. -10 Attached or hanging to. -11 Excluded, cut off. -12 (In phil.) Invariably and inseparably connected and implied (as fire in smoke). -13 Wreathed (as a garland); सखि एकपार्श्वविषमप्रतिबद्धा खल्वेषा रचना Māl. 2.

प्रतिब(व)न्दी *f.* A retort; हृदाभिनन्द्य प्रतिबन्द्यनुत्तरः N. 9. 17. See प्रतिबन्धी.

प्रतिबन्धः 1 Binding or tying to. -2 Obstruction, impediment, obstacle; स तपःप्रतिबन्धमन्युना R. 8. 80; Mv. 5. 4; सिद्धानामसाधनमनवतारणमप्रवेशनं वा प्रतिबन्धः, also प्रतिबन्धः प्रयोगो ...... कोशक्षयः Kau. A. 2. 7. 26. -3 Opposition, resistance. -4 Investment, blockade, siege. -5 Connection. -6 Cessation. -7 Disappointment. -8 (In phil.) Invariable and inseparable connection.

प्रतिबन्धक *a.* (-न्धिका *f.*) 1 Binding, fastening. -2 Impeding, obstructing, hindering. -3 Resisting, opposing. -कः A branch, shoot.

प्रतिबन्धनम् 1 Binding, tying. -2 Confinement. -3 Obstructing, impeding.

प्रतिबन्धवत् *a.* Full of obstacles, beset with difficulties.

प्रतिबन्धिन् *a.* 1 Fastening -2 Hindering, obstructing. -3 Impeded, obstructed.

प्रतिबन्धिः,-न्धी *f.* 1 An objection. -2 An argument which equally affects the other side. (प्रतिबन्धि *m.* also in this sense).

प्रतिबन्द्धृता Opposition, refutation; प्रबन्द्धृतास्तु प्रतिबन्द्धृता न ते N. 9. 37.

प्रतिबाध् 1 Ā. 1 To repel, ward or keep off. -2 To check, restrain. -3 To pain, distress.

प्रतिबाधक *a.* 1 Repelling, keeping off. -2 Preventing, obstructing.

प्रतिबाधनम् Repelling, keeping off, rejecting.

प्रतिबाधिन् *a.* Obstructing. -*m.* An adversary, opponent.

प्रतिबिम्बनम् 1 Reflection. -2 Comparison; दृष्टान्तः पुनरेतेषां सर्वेषां प्रतिबिम्बनम् K. P. 10.

प्रतिबिम्बयति Den. P. To reflect.

प्रतिबिम्बित *a.* Reflected, mirrored.

प्रतिबुध् 4 Ā. 1 To wake, wake up, awaken; [illegible] सोऽहर्निशस्यान्ते प्रसुप्तः प्रतिबुध्यते Ms. 1. 74; Y. 1. 330. -2 To perceive, be conscious, know. -*Caus.* 1 To awaken, rouse from sleep; प्रियया प्रतिबोध्यमानमपि सुप्तम् (हतहृदयं...) Ś. 6. 7. -2 To inform, make known, acqaint with, communicate; भावितात्मा भुवो भर्तुरथैनं प्रत्यबोधयत् R. 1. 7[illegible]; Śi. 6. 8. -3 To charge or entrust with.

प्रतिबुद्ध *p. p.* 1 Awakened, roused, wide awake; [illegible] बुद्धापि किं करिष्यामि Ś. 4; Māl. 4; Ms. 1. 74. -2 Restored to consciousness. -3 Opened, blown; अप्रतिबुद्धोऽपि चूतप्रसवो[...] बन्धनभङ्गसुरभिर्भवति Ś. 6. -4 Illuminated, enlightened. -5 Great, exalted. -6 Recognized, observed. -7 Celebrated, known.

प्रतिबुद्धिः *f.* 1 Awakening. -2 Hostile purpose or intention.

प्रतिबोधः 1 Waking, awaking, being awakened; तदपोहितुमर्हसि प्रिये प्रतिबोधेन विषादमाशु मे R. 8. 54; अप्रतिबोधशायिनी 58 'sleeping not to wake again'; Ki. 6. [...] 12. 48. -2 Perception, knowledge. -3 Instruction. -4 Reason, reasoning faculty; किमुत याः प्रतिबोधवत्यः Ś. 5. [...] -5 Recollection; संमोहः खलु विस्मयनीयो न प्रतिबोधः Ś. 6.

प्रतिबोधक *a.* 1 Awakening. -2 Instructing, informing. -कः A teacher, instructor.

प्रतिबोधन *a.* Awakening. -नम् 1 Awakening. [-2] Instructing, informing. -3 Knowledge, refinement, enlightenment; Pt. 1. -ना Awakening, recovering consciousness.

प्रतिबोधित *p. p.* 1 Awakened. -2 Instructed, taught.

प्रतिब्रू 2 P. 1 To answer; प्रत्यब्रवीच्चैनमिषुप्रयोगे तत्[...] वितथप्रयत्नः R. 2. 42. -2 (Ā.) To refuse, deny.

प्रतिभज् 1 U. 1 To receive back (as a share). -2 To fall to one's share.

प्रतिभागः 1 Division. -2 A share, portion (given to a king as a tax) of one's income, generally a sixth part; cf. षष्ठांशवृत्तेरपि धर्म एषः Ś. 5. 4; अरक्षितारं राजानं बलिषड्भागहारिणम्। तमाहुः सर्वलोकस्य समग्रमलहारकम्॥ Ms. 8. 308.

प्रतिभा 2 P. 1 To shine, appear bright or luminous; प्रतिभान्त्यद्य वनानि केतकीनाम् Ghat. 15. -2 To show oneself, become manifest. -3 To seem, appear; क्षीरलघ्वपिरपरा प्रतिभाति सा मे Ś. 2. 10; R. 2. 47; Ku. 2. 38; 6. 54. -4 To occur to, come into the mind of; as in नोत्तरं प्रतिभाति मे, इति प्रतिभाति मे मनः. -5 To fall to the lot or share of. -6 To seem fit or proper; appear good, please to; सा भार्या प्रतिभाति मे Ks; Pt. 3.

प्रतिभा 1 An appearance, a look. -2 Light, splendour. -2 Intellect, understanding; सभेव भीमा विदधे गणानां निद्रा निरासं प्रतिभागुणस्य Ki. 16. 27; Vikr. 1. 18, 23. -4 Genius, bright conception, vivid imagination; (प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता Rudra.). -5 An image, reflection. -6 Audacity, impudence. -7 Suitableness, agreeableness; -8 Sudden appearance, manifestation (स्फूर्ति); प्रतिभा त्वस्ति मे काचित्तां ब्रूयामनुमानतः Mb. 12. 260. 1. -9 Distraction (विक्षेप); निद्रां च प्रतिभां चैव ज्ञानाभ्यासेन तत्त्ववित् (विनिवर्तयेत्); Mb. 12. 274. 7; 316. 14. -Comp. -अन्वित *a.* 1 endowed with genius, intelligent, -2 audacious, bold. -मुख *a.* 1 bold, confident. -2 quick-witted. -हानिः *f.* 1 darkness. -2 absence of intellect or genius.

प्रतिभात *p. p.* 1 Bright, luminous. -2 Known, understood.

प्रतिभानम् 1 Light, splendour. -2 Intellect or understanding, brightness of conception; दूतः स्यात् प्रतिभानवान् H. 3. 19. -3 Readiness of wit, presence of mind; कालावबोधः प्रतिभानवत्त्वम् Mal. 3. 11; कथायोगेषु वाग्मित्वं प्रागल्भ्यं प्रतिभानवत्त्वं च Kau. 1. 9; दमघोषसुतेन कश्चन प्रतिशिष्टः प्रतिभानवानथ Śi. 16. 1. -4 Confidence, boldness, audacity.

प्रतिभानवत् *a.* 1 Splendid, bright. -2 Ready-witted, prompt. -3 Bold. -4 Intelligent; H. 3. 19; कच्चिज्जानपदो विद्वान् दक्षिणः प्रतिभानवान् Rām. 2. 100. 35.

प्रतिभावत् *a.* 1 Bright. -2 Intelligent, shrewd. -3 Confident, bold. -*m.* 1 The sun. -2 The moon. -3 Fire.

प्रतिभावः Corresponding disposition.

प्रतिभाष् 1 Ā. 1 To speak in return, reply or answer; तं भीतंकारमाक्रुश्य रावणः प्रत्यभाषत Bk. 5. 39. -2 To tell, relate. -3 To say after one, speak after hearing. -4 To name, call; कामिनि तामुपगीतिं प्रतिभाषन्ते महाकवयः Śrut. 6. -5 To address or speak to.

प्रतिभाषा An answer, a reply.

प्रतिभास् 1 Ā. 1 To shine. -2 To appear or look like. -3 To become clear, manifest oneself. -4 To be reflected.

प्रतिभासः 1 Occurring to, or flashing across, the mind at once, (sudden) perception; वाच्यवैचित्र्यप्रतिभासादेव K. P. 10. -2 A look, appearance. -3 Illusion.

प्रतिभासनम् Look, appearance, semblance.

प्रतिभिद् 7 U. 1 To break through, pierce, penetrate. -2 To disclose, betray. -3 To reproach, abuse, censure; प्रतिभिद्य कान्तमपराधकृतम् Śi. 9. 58; R. 19. 22. -4 To reject, disown. -5 To touch, be in close contact with; चन्द्रेण नित्यं प्रतिभिन्नमौलेश्चूडामणेः किं ग्रहणं हरस्य Ku. 7. 35.

प्रतिभिन्न *p. p.* 1 Pierced through. -2 Closely connected with. -3 Divided.

प्रतिभेदः 1 Splitting, dividing. -2 Discovery. -3 Betrayal.

प्रतिभेदनम् 1 Piercing, penetrating. -2 Cutting, splitting, cleaving. -3 Putting out (as the eyes). -4 Dividing.

प्रतिभूः A bail, surety, guarantee; सौभाग्यलाभप्रतिभूः पदानाम् Vikr. 1. 9; Y. 2. 10, 54; N. 14. 4; सह्यग्राहिणः प्रतिभुवः ......अस्य कर्मच्छेदं वहेयुः Kau. A. 2. 7. 25; यत्र प्रतिभ्वो विभवेऽपि शक्ये न प्रार्थयन्ति स्म नराः परेभ्यः Bu. Ch. 2. 10; यदि मे प्रतिभूश्चतुर्षु राजन् भवसि त्वं न तपोवनं श्रयिष्ये Bu. Ch. 5. 34.

प्रतिभावः Counter-part.

प्रतिभोगः Enjoyment.

प्रतिभोजनम् Prescribed diet.

प्रतिमन्त्रणम् An answer, reply.

प्रतिमर्शः A powder used as a sternutatory.

प्रतिमा 3, 4 Ā. To compare, liken.

प्रतिमा *m.* Ved. A creator, maker. -मा 1 An image, a likeness, statue, figure, an idol; पुरः परार्ध्यप्रतिमागृहायाः R. 16. 39. -2 Resemblance, similitude; oft. in comp. in the sense of 'like, similar, or equal to'; देवप्रतिम, अप्रतिम &c.; गुरोः कुशानुप्रतिमात् R. 2. 49; पतत्पतङ्गप्रतिमस्तपोनिधिः Śi. 1. 12. -3 A reflection, reflected image; मुखमिन्दुरुज्ज्वलकपोलमतः प्रतिमाच्छलेन सुदृशामविशत् Śi. 9. 48, 73; R. 7. 64; 12. 100. -4 A measure, extent. -5 The part of an elephant's head between the tusks. -6 A symbol. -Comp. -गत *a.* present in an idol. -गृहम्, -गेहम् A statue-house; Pratimā 3; R. 16. 39. -चन्द्रः the reflected moon, reflection of the moon; उवास प्रतिमाचन्द्रः प्रसन्नानामपामिव R. 10. 65; so प्रतिमेन्दुः, प्रतिमाशशाङ्कः. -परिचारकः an attendant upon an idol.

प्रतिमानम् 1 A model, pattern; सोऽर्जुनेन हतः कर्णः प्रतिमानं धनुष्मताम् Mb. 3. 9. 16. -2 An image, idol.

-3 Likeness, similitude, similarity; हेरम्बकण्ठरसितप्रतिमानमेति Mal. 9. 3. -4 A weight; रत्नसारफल्गुकुप्यानामर्घप्रतिवर्णकप्रतिमानमानोन्मानावमानभाण्डम् Kau. A. 2. 7. 25. -5 The part of an elephant's head between the tusks and below the वाहित्थ; Mb. 8. 28. 38; also 6. 46. 29; पृथुप्रतिमानभाग &c. Śi. 5. 36, Mātaṅga L. 5. 7; 6. 8. -6 A reflection. -7 A picture. -8 Ved. An adversary.

प्रतिमित *p. p.* 1 Imitated, copied. -2 Compared. -3 Reflected.

प्रतिमार्गकः The city of Hariśandra *i. e.* the magical illusion of a city in the sky; हरिश्चन्द्रपुरं शोभसुद्रकः प्रतिमार्गकः Trikāṇḍaśeṣa.

प्रतिमुच् 6 P. 1 To free, liberate, release, set free; गृहीतप्रतिमुक्तस्य R. 4. 43; अमुं तुरङ्गं प्रतिमोक्तुमर्हसि 3. 46. -2 To put on, wear, accoutre or arm oneself with; प्रतिमुञ्च शुभ्रं यज्ञोपवीतम्. -3 To quit, leave, abandon. -4 To throw, cast, or discharge at. -5 To pay off (a debt.). -6 To return, restore. -7 To fasten, bind; तमेकदा मणिं कण्ठे प्रतिमुच्य महाप्रभम् Bhāg. 10. 56. 13. -8 To assume a form. -*Caus.* 1 To liberate, release. -2 To rescue, save, deliver.

प्रतिमुक्त *p. p.* 1 Put on, worn, applied. -2 Tied, bound, fastened; Bhāg. 3. 18. 10. -3 Armed, accoutred. -4 Liberated, released. -5 Restored, returned. -6 Flung, hurled. -7 Thrown, cast.

प्रतिमुहुः = (emphatic for मुहुः) Often and often; प्रतिमुहुर्द्राङ्क्षितप्रेयसी N. 20. 161.

प्रतिमोक्षः, प्रतिमोक्षणम् Liberation, deliverance; प्रतिमोक्षणम् remission (of taxes).

प्रतिमोचनम् 1 Loosening. -2 Requital, retaliation, retribution; वैरप्रतिमोचनाय R. 14. 41. -3 Liberation, release.

प्रतियत् 1 A. To try; वयमप्याश्रमपीडा यथा न भविष्यति तथा प्रतियतिष्यामहे Ś. 1. 32/33 (v. l.) -*Caus.* 1 To restore, return. -2 To retaliate, requite.

प्रतियत्न *a.* 1 Troubling about. -2 Active, vigorous. -त्नः 1 An effort, endeavour, exertion. -2 Preparation, elaboration; 'प्रतियत्नस्तु संस्कारः' Vaijayantī; सुगन्धितामप्रतियत्नपूर्वां बिभ्रन्ति यत्र प्रमदाय पुंसाम् Śi. 3. 54. -3 Making complete or perfect. -4 Imparting a new quality or virtue; सतो गुणान्तराधानं प्रतियत्नः Kāśi. on P. II. 3. 53. -5 Wish, desire. -6 Opposition, resistance. -7 Retaliation, retribution, revenge. -8 Making captive, taking prisoner. -9 Favour. -10 Acting well or properly. -11 Comprehension.

प्रतियातनम् Requital, retaliation; as in वैरप्रतियातनम्; अयं हि कालोऽस्य दुरात्मनो वै पार्थस्य वैरप्रतियातनाय Mb. 8. 90. 14.

प्रतियातना A picture, an image, statue; अनिर्विदा या विदधे विधात्रा पृथ्वी पृथिव्याः प्रतियातनेव Śi. 3. 34.

प्रतियम् 1 P. To restore, return; Bhāg.

प्रतिया 2 P. 1 To go back, return; एतावदुक्त्वा प्रतियातुकामं शिष्यं महर्षेर्नृपतिर्निषिध्य R. 5. 18; 8. 91. -2 To equal, be a match for; अयं नृपः कः प्रतियाति कर्मभिः Bhāg. 5. 15. 9. -3 To be returned, requited; या माऽभजन्दुर्जरगेहशृङ्खलाः संवृश्च्य तद्वः प्रतियातु साधुना Bhāg. 10. 32. 22.

प्रतियात *a.* 1 Resisted, opposed. -2 Turned, returned. -Comp. -निद्र *a.* awakened, awake. -बुद्धि *a.* one whose mind is turned towards.

प्रतियानम् Return, retreat.

प्रतियुध् 4 A. To encounter in fight, oppose.

प्रतियुद्धम् Fighting against.

प्रतियोधः, प्रतियोधिन् *m.* An adversary, opponent.

प्रतियोगः 1 Being or forming a counter-part of anything. -2 Opposition, resistance; यत्तः परेषां प्रतियोगशङ्कितः Bhāg. 4. 10. 22; 5. 14. 1. -3 Contradiction. -4 Co-operation. -5 An antidote, a remedy. -6 A rejoinder; प्रतियोगार्थिनी काचित् गृहीत्वा चूतवल्लरीम् Bu. Ch. 4. 41.

प्रतियोगिक *a.* Antithetical, correlative, relative.

प्रतियोगिन् *a.* 1 Opposing, counteracting, impeding. -2 Related or corresponding to, being or forming a counter-part of (anything); often used in works on Nyāya; as a घट is the प्रतियोगी of घटाभाव; (यस्याभावो विवक्ष्यते स प्रतियोगी). -3 Co-operating with. -4 Equally matched. -*m.* 1 An adversary, opponent, enemy; आर्यो विरोधः शक्तेन जातो नः प्रतियोगिना Mv. 2. 7; दहत्यशेषं प्रतियोगिगर्वम् Vikr. 1. 117. -2 A counter-part, match. -3 A partner, an associate. -4 An object dependent upon another. -5 A counter-part, counter-entity; प्रतियोगिज्ञानाधीनज्ञानविषयत्वमभावलक्षणम्.

प्रतियोगिता, -त्वम् 1 Opposition. -2 Dependent existence. -3 Being a counter-part. -4 Partnership, co-operation.

प्रतियोद्धृ 1 An opponent, adversary. -2 One who begins a battle.

प्रतियोधनम् Assailing in turn.

प्रतिरक्षणम्, -रक्षा Safety, preservation, protection.

प्रतिरत *a.* Delighting in, zealous for.

प्रतिरम्भः Passion, rage.

प्रतिरुध् 7 U. 1 To obstruct, stop; oppose, resist. -2 To blockade, besiege. -3 To impair, disable. -4 To blame, accuse. -5 To hide, conceal.

प्रतिरुद्ध *p. p.* 1 Impeded, obstructed, hindered. -2 Interrupted. -3 Impaired. -4 Disabled. -5 Invested, blockaded.

प्रतिरोधः 1 Impediment, obstruction, hindrance. -2 Siege, blockade. -3 An opponent. -4 Concealing. -5 Theft, robbery. -6 Censure, despising.

प्रतिरोधक, प्रतिरोधिन्, -द्धृ *a.* 1 Obstructing.-2 Besieging. *-m.* 1 An opponent. -2 A robber, thief; कोदण्डपाणि निनदत्प्रतिरोधकानामापातदुष्प्रसहमाविरभूदनीकम् M. 5. 10; Śi. 1. 32. -3 An obstacle.

प्रतिरोधनम् Opposing, obstructing; स हि स्वाम्यादतिक्रामेद्वृतूलं प्रतिरोधनात् Ms. 9. 93.

प्रतिरूढ *p. p.* 1 Entered, possessed. -2 Established again. -3 Imitated; गतिस्मितप्रेक्षणभाषणादिषु प्रियाः प्रियस्य प्रतिरूढमूर्तयः Bhāg. 10. 30. 3.

प्रतिलभ् 1 Ā. 1 To recover, regain. -2 To get, obtain. -3 To learn, understand. -4 To expect.

प्रतिलम्भः 1 Getting, obtaining, receiving. -2 Censure, abuse, reviling; अन्यतः कथमदः प्रतिलम्भः N.

प्रतिलाभः Taking or obtaining back, taking, getting.

प्रतिलिखित *p. p.* Answered.

प्रतिलेखनम्, -ना The regular cleaning of all implements or objects for daily use.

प्रतिवच् 2 P. To speak in reply, answer, reply to; न चेद्रहस्यं प्रतिवक्तुमर्हसि Ku. 5. 40; R. 3. 47.

प्रोद्दीप्त *p. p.* Set on fire, burning, blazing; प्रोद्दीप्ते भवने तु कूपखननं प्रत्युद्यमः कीदृशः Bh. 3. 88 (v. l.)

प्रोद्धारः Lifting up, bearing.

प्रोद्बोधः Awaking, appearing, manifestation.

प्रोद्भिन्न *p. p.* 1 Germinated, shot up. -2 Burst forth.

प्रोद्भूत *p. p.* Sprung up, arisen.

प्रोद्यत *p. p.* 1 Lifted up. -2 Active, industrious.

प्रोद्वाहः Marriage.

प्रोद्विग्न *p. p.* Terrified, alarmed.

प्रोद्वीचि *a.* Waving, fluctuating.

प्रोन्नत *p. p.* 1 Very high or lofty. -2 Projecting. -3 Superior to. -4 Powerful, strong; यो बलात् प्रोन्नतं याति निहन्तुं सबलोऽप्यरिः। विमदः स निवर्तेत शीर्णदन्तो गजो यथा॥ Pt. 1 238, 340.

प्रोन्नमित *p. p.* Raised up, erected.

प्रोन्माथिन् *a.* Destroying, annihilating.

प्रोन्मील् 1 P. 1 To bloom, blossom. -2 To come to light, appear. -*Caus.* 1 To open the eyes. -2 To reveal, disclose, bring to light, discover.

प्रोन्मीलनम् Disclosing &c.

प्रोर्णु 2 U. To cover completely, envelop.

प्रोल्लाघित *a.* 1 Recovered from sickness, convalescent. -2 Robust.

प्रोल्लासिन् *a.* Shining, resplendent.

प्रोल्लेखनम् Scratching; marking.

प्रोषः Burning, combustion.

प्रोषधः Fasting; cf. पोषध.

प्रोषित *p. p.* Gone abroad, on a journey, living abroad, away from home, absent, living in a foreign country; जीवत्सु पाण्डुपुत्रेषु दूरमप्रोषितेषु च। पाञ्चालराजतनया वहते यदिमां दशाम् Ve. 1. 18; प्रोषिते मलिना कृशा Kāśikhaṇḍa. -Comp. -भर्तृका a woman whose husband is gone abroad; one of the eight Nāyikās in erotic poetry. She is thus defined in S. D. :— नानाकार्यवशाद् यस्या दूरदेशं गतः पतिः। सा मनोभवदुःखार्ता भवेत् प्रोषितभर्तृका॥ 119. -मरणम् dying in a foreign country.

प्रोष्य-पापीयान् *a.* Sinful on account of one's living away from home; राघवः प्रोष्य-पापीयान्, जहीहि तमकिञ्चनम् Bk. 5. 91.

प्रो (प्रौ) ष्ठः 1 A bull, an ox. -2 A bench, stool. -3 A kind of fish (ष्ठी also). -Comp. -पदः the month भाद्रपद; कुर्यादापरपक्षीयं मासि प्रौष्ठपदे द्विजः। श्राद्धं पित्रोर्यथावित्तं तद्वन्धूनां च वित्तवान् Bhāg. 7. 14. 19. (-दा) the 25th and 26th lunar mansions; पूर्वाभाद्रपदा and उत्तराभाद्रपदा; these are double stars. 'चत्वार एकमभिकर्म देवाः प्रौष्ठपदास इति यान् वदन्ति' Ts.; गुणवन्तोऽनुरूपाश्च रुच्या प्रौष्ठपदोपमाः Rām. 1.18.16. (-दी) The full-moon of भाद्रपद; प्रौष्ठपद्यां प्रौर्णमास्यां हेमसिंहसमन्वितम्। ददाति यो भागवतं स याति परमां गतिम्॥ Bhāg. 12. 13. 13. -पाद *a.* born under the above Nakṣatra; P. VII. 3. 18.

प्रोष्ण *a.* Burning hot, scorching.

प्रो (प्रौ) ह *a.* 1 A reasoner, disputant. -2 Skilful, clever. -हः 1 Reasoning, logic. -2 An elephant's foot or ankle; आकुञ्चितप्रोहनिरूपितक्रमं करेणुरारोहयते निषादिनम् Śi. 12. 5. -3 A knot, joint. -4 A part of the elephant's body especially between the shoulders; Mātaṅga L. 5. 5, 8, 12; 6. 10.

प्रो (प्रौ) ढ *a.* [प्र+वह्-क्त वा वृद्धिः] 1 Full-grown, fully developed, matured, ripened, perfected, full, (as moon &c.); प्रौढपुष्पैः कदम्बैः Me. 25; प्रौढताली-विपाण्डु &c. Māl 8. 1; 9. 28. -2 Adult, old, grown up; वर्तते हि मन्मथप्रौढसुहृदो निशीथस्य यौवनश्रीः Māl. 8; Śi. 11. 39;

Mv. 6.4. –3 Thick, dense, pitchy : प्रौढं तमः कुरु कृतज्ञतयैव भद्रम् Mal 7. 8; Si. 4. 62. –4 Grand, mighty, strong, magnificent ; प्रौढं विक्रान्तमासीद् वन इव भवतां शूरशून्ये रणेऽस्मिन् Ve. 5. 37. –5 Violent, impetuous. –7 Proud ; अब्रदानाद्सुतं काले प्रौढेन मुनिना कृतम् Mv. 2. 3. –8 Luxuriant. –9 Married. –10 Full of, filled with (at the end of comp). –11 Raised or lifted up. –12 Controverted, discussed. –13 Large, great. –15 Occupied, engaged; कान्तया सपदि कोऽप्युपगूढः प्रौढपाणिरपनेतुमियेष Si. 10. 73. –ढा A bold and grown-up woman, no longer bashful or timid in the presence of her lord, one of the four principal female characters in poetic compositions; आषोडशाद्भवेद्बाला त्रिंशता तरुणी मता। पञ्चपञ्चाशता प्रौढा भवेद् वृद्धा ततः परम्॥ Ratimañjarī. –Comp. –अङ्गना a bold woman; see above. –आचारः bold or confident behaviour. –उक्तिः *f.* a bold or pompous assertion. –जलदः a dense cloud. –दोर्दण्डः a strong and long arm. –पाद *a.* one whose feet are raised on a bench ; शयानः प्रौढपादश्च (नाधीयीत) Ms. 4. 112. –पुष्प *a.* having full-grown blossoms; त्वत्संपर्कात् पुलकितमिव प्रौढपुष्पैः कदम्बैः Me. 25. –प्रताप *a.* of great or mighty valour. –प्रिया a bold or confident mistress. –ब्राह्मणम् = ताण्ड्यब्राह्मणम्. –मनोरमा N. of a commentary on सिद्धान्तकौमुदी and other works. ˚कुचमर्दनम् a com. on this work. –यौवन *a.* advanced in youth, in the prime or bloom of youth. –वादः an arrogant or bold assertion, defiant speech.

प्रौढ (ढि) त्वम् Sublimity or felicity; यत्प्रौढित्वमुदारता च वचसां यच्चार्थतो गौरवम् Mal. 1. 7. –2 Confidence. –3 Arrogance.

प्रौ (प्रो) ढिः *f.* 1 Full growth or development, maturity, perfection ; एवं वीक्ष्य तवाविवेकमपि च प्रौढिं परामुन्नतेः Jagannātha. –2 Growth, increase. –3 Greatness, grandeur, elevation, dignity ; प्रौढिप्रकर्षेण पुराणरीतिव्यतिक्रमः श्लाघ्यतमः पदानाम् Vikr. 1. 15. –4 Boldness, audacity; प्रासपाशधनुर्बाणधारिणः प्रौढिकारिणः Śiva B. 26. 30. –5 Pride, arrogance, self-confidence. –6 Controversy, discussion. –7 Zeal, exertion, enterprize. –8 Earnestness, profundity (of character); हास्यप्रौढिमजानन्त्याः करुणः सोऽन्वकम्पत Bhāg. 10. 60. 25. –Comp. –वादः 1 a grandiloquent or pompous speech. –2 a bold assertion.

प्रौढीभू 1 P. 1 To become matured, ripen, be developed, grow up. –2 To increase.

प्रौण *a.* Clever, learned, skil[illegible]l.

प्रौक्त *a.* Having the sense [illegible].

प्रौष्ठपदः = प्रोष्ठपद q. v.

प्लकः Ved. Pudendum muliebre (अधोङ्गभेद).

प्लक्ष् 1 U. To eat, consume.

प्लक्षः [प्लक्ष्यते कीटैः प्लक्ष्-कर्मणि घञ्] 1 The Indian fig-tree; प्लक्षप्ररोह इव सौधतलं बिभेद R. 8. 93; 13. 71; कपित्थैः किंशुकैः प्लक्षैः Parnal. 4. 62. –2 One of the seven Dvīpas or continents of the world; प्लक्षो जम्बूप्रमाणो द्वीपः ख्यातिकरो हिरण्मय उत्थितो यत्राग्निरुपास्ते सप्तजिह्वः Purāṇam. –3 A side or back-door, a private entrance. –4 The space at the side of a door. –Comp. –जाता, –समुद्रवाचका an epithet of the river Sarasvatī. –तीर्थम्, –प्रस्रवणम्, –राज् *m.* the place where the Sarasvatī rises. –द्वारम् a back-door, a side-entrance; Matsya P. 261. 15.

प्लाक्षम् The fruit of प्लक्ष.

प्लिह् 1 Ā. (प्लेहते) To go, move.

प्ली 9 P. (प्लीनाति) To go, move.

प्लीहन् *m.* The spleen or its enlargement (प्लिहन् also); Y. 3. 94; Mv. 5. 19. –Comp. –अरिः N. of the fig-tree. –उदरम् enlargement of the spleen. –उदरिन् *a.* suffering from enlargement of the spleen.

प्लीहा The spleen.

प्लु 1 Ā. (प्लवते, प्लुत) 1 To float, swim; किं नामैतत् मज्जन्त्यलाबूनि ग्रावाणः प्लवन्त इति Mv. 1; क्रोशोत्तरं रागवशात् प्लवन्ते R. 16. 60; प्लवन्ते धर्मलघवो लोकेऽम्भसि यथा प्लवाः Subhāṣ. –2 To cross in a boat. –3 To swing to and fro, vibrate. –4 To leap, jump, spring; यथामुखीनः सीतायाः पुप्लुवे बहु लोभयन् Bk. 5. 48; 14. 13; 15. 46. –5 To plunge into, bathe. –6 To fly or haste away. –7 To blow (as the wind). –8 To fade away, disappear. –9 To soar, hover about. –10 To skip. –11 To be prolated or lengthened (as a vowel). –*Caus.* (प्लावयति-ते) 1 To cause to swim or float. –2 To remove, wash away. –3 To bathe. –4 To inundate, deluge, flood, submerge; यैः प्लावयिष्यन्ति समन्ततोऽमी Si. 3. 74; 7. 74. –5 To cause to reel or fluctuate. –6 To lengthen, prolate (a vowel). –*With* अभि 1 to over-flow. –2 to overwhelm, overcome.

प्लव *a.* [प्लु अच्] 1 Swimming, floating. –2 Jumping, leaping. –3 Ved. Superior, excellent. –वः Swimming, floatin[illegible]. –2 Flood, swelling of a river. –3 A jump, leap; [illegible]oing by leaps or jumps; ते रथैर्देवधिष्ण्याभैर्हयैश्च तरलप्लवै[illegible] Bhāg. 10. 82. 7. –4 A raft, float, canoe, small boat; नावश्चारुरुहुस्त्वन्ये प्लवैस्तेरुस्तथापरे Rām. 2. 89. 20 (com. प्लवा वेणुतृणादिनिर्मिताः); नाशयेच्च शनैः पश्चात् प्लवं सलिलपूरवत् Pt. 2. 42; सर्वं ज्ञानप्लवेनैव वृजिनं संतरिष्यसि Bg. 4. 36; Ms. 4. 194; 11. 19; Ve. 3. 25. –5 A frog; हंसक्रौञ्चप्लवाकीर्णं सारसैः संप्रसादितम् Rām. 3. 35. 18. –6 A monkey; दधि हत्वा बकश्चापि प्लवो मत्स्यानसंस्कृतान् Mb. 13. 111. 99. –7 A declivity, slope. –8 An enemy. –9 A sheep. –10 A man of a low tribe, a Chaṇḍāla. –11 A net or snare for catching fish. –12 The fig-tree. –13 The Kāraṇḍava bird, a kind of duck. –14 Five or more stanzas syntactically connected (= कुलक q. v.). –15 The prolated utterance of a vowel. –16 Returning, return. –17 Urging on, inciting. –18 Sound; L. D. B. –19 A kind of aquatic bird; Ms. 5. 12. –20 N. of a संवत्सर. –Comp. –कुम्भः a pitcher used as a support in swimming; स्मरयौवनयोः खलु

द्वयोः प्लवकुम्भौ भवतः कुचावुभौ N. 2. 31. –गः 1 a monkey; स सेतुं बन्धयामास प्लवगैर्लवणाम्भसि R. 12. 70. –2 a frog. –3 an aquatic bird, the diver. –4 the शिरीष tree. –5 N. of the sun's charioteer. °इन्द्रः Hanumat; Bhāg. °राजः The monkey chief Sugrīva; राघवप्लवगराजयोरिव प्रेम युक्तमितरेतराश्रयम् Ki. 13. 57. (–गा) the sign of the zodiac called *Virgo*. –गतिः a frog.

प्लवकः [प्लु बाहु° अक] 1 A frog. –2 A jumper, tumbler, rope-dancer. –3 The holy fig-tree. –4 A Chāṇḍāla, an outcast. –5 A monkey.

प्लवङ्गः 1 An ape, a monkey. –2 A deer. –3 The fig-tree. –4 N. of a संवत्सर.

प्लवत्वम् (In astrol.) The position of a canstellation in the quarter ruled by its planetary regent; Brit. S.

प्लवङ्गमः 1 A monkey; एवमुक्तस्तु भीमेन स्मितं कृत्वा प्लवङ्गमः Mb. 3. 150. 2; संचेरुरात्मान इवापरं क्षणात् क्षमारुहं देहमिव प्लवङ्गमाः Si. 12. 55. –2 A frog. –Comp. –इन्दुः an epithet of Hanumat.

प्लवन [प्लु-ल्युट्] *a.* Inclined, stooping down; प्रागुदक्प्लवनां भूमिं कारयेत् यत्नतो नरः Matsya. P. –नम् 1 Swimming. –2 Bathing, plunging into; आनन्दमन्दममृतप्लवनादिवाभूत् Māl. 1. 19. –3 Flying. –4 Jumping, leaping. –5 A great flood, deluge. –6 A declivity. –7 One of a horse's paces (capering).

प्लवाका A float, raft.

प्लविक *a.* [प्लवेन तरति ठन्] Taking over in a boat, a ferry-man.

प्लावः [प्लु-घञ्] 1 Flowing over. –2 Jumping, leaping, काचिच्च दर्दुरप्लावैर्विविधैरुपहासकैः Bhāg. 10. 18. 15. –3 Filling to, overflowing. –4 Straining a liquid (to remove impurities &c.); भस्माद्भिः कांस्यलोहानां शुद्धिः प्लावो द्रवस्य तु Y. 1. 190 (see Mitā. thereon). –5 Submersion.

प्लावनम् [प्लु णिच् ल्युट्] 1 Bathing; ablution. –2 Overflowing, flooding, inundating. –3 A flood, deluge. –4 Prolation (of a vowel).

प्लावयितृ *a.* One who causes to swim or cross (a boatsman); गुरुः प्लावयिता तस्य ज्ञानं प्लव इहोच्यते Mb. 12. 326. 23.

प्लावित *p. p.* [प्लु णिच् क्त] 1 Made to swim, float, or overflow. –2 Deluged, inundated, overflowed. –3 Moistened, wetted, sprinkled; गलन्मधुप्लावितदूरवर्त्मनि Si. 12. 26; विविक्तेऽस्मिन्नगे भूयः प्लाविते जह्नुकन्यया Ki. 11. 36. –4 Covered with, smeared. –5 Lengthened, prolated (as a vowel); प्लावितेन स्वरेणोच्चैराजुहावाकुलेन्द्रियः Bhāg. 6. 1. 29. –तम् 1 Inundation, flood. –2 A song in which the vowels are prolated.

प्लाविन् *a.* [प्लु-णिनि] 1 Spreading over, deluging, overflowing. –2 Promulgating. –*m.* A bird.

प्लुत *p. p.* [प्लु-क्त] 1 Swimming, floating. –2 Inundated, submerged, overflowed. –3 Leaped, jumped. –4 Lengthened, protracted or prolated (as a vowel); अशूद्रविषये प्रत्यभिवादे यद्वाक्यं तस्य टेः प्लुतः स्यात् Sk.; यान्तोऽन्यतः प्लुतकृतस्वरमाशु दूराद्युद्राहुना जुहुविरे मुहुरात्मवर्ग्याः Si. 5. 15. –5 Covered with, filled with; मन्थायस्तार्णवाम्भःप्लुतकुहर... Ve. 1. 22. –6 Bathed in; (see प्लु). –तम् 1 A jump, leap, spring; पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति Ś. 1. 7. –2 Capering, one of the paces of a horse. –3 Bounding, vaulting. –4 A flood, deluge. –Comp. –गतिः a hare. (–*f.*) 1 going by leaps. –2 a gallop, bounding motion. –भेदः (in music) a kind of measure.

प्लुतिः *f.* [प्लु-भावे-क्तिन्] 1 A flood, overflowing, inundation. –2 A leap, jump, spring; as in मण्डूकप्लुति. –3 Capering, one of the paces of a horse. –4 Prolation or protraction of a vowel.

प्लुष् I. 1, 4, 9 P. (प्लोषति, प्लुष्यति, प्लुष्णाति, प्लुष्ट) To burn, scorch, singe, sear; Ṛs. 1. 22; रामस्तुष्यतु मे वाऽथ पापां प्लुष्णातु वाऽनलः Bk. 20. 34. –II. 9 P. (प्लुष्णाति) 1 To sprinkle, wet. –2 To anoint. –3 To fill.

प्लुक्षिः 1 Fire. –2 The burning of a house. –3 Oil.

प्लुषः Burning, combustion.

प्लुषिः A species of noxious insect; यद्वैव समः प्लुषिणा समो मशकेन Bṛi. Up. 1. 3. 22.

प्लुष्ट *p. p.* Scorched, burnt, singed; पटुतरदवदाहात् प्लुष्ट सस्यप्ररोहाः Ṛs. 1. 22.

प्लोषः Burning, combustion (also प्रोष); स्वपक्षाभ्यां प्लोषादविकल्मरक्षत् करुणया Mv. 5. 5; Viṣnupāda S. 46.

प्लोषण *a.* (–णी *f.*) [प्लुष्-ल्यु] Burning, scorching, reducing to ashes; तार्तीयीकं पुरारेस्तदवतु मदनप्लोषणं लोचनं वः Māl. 1 (v. l.). –णम् Burning, scorching (प्रोषणम् also).

प्लुस् 4 P. (प्लुस्यति) 1 To burn. –2 To share.

प्लेव् 1 Ā. (प्लेवते) To serve, attend or wait upon.

प्लोतः 1 A bandage. –2 Cloth.

प्लोतिः Thread, connection; Buddh.

प्सा 2 P. (प्साति, प्सात) To eat, devour; बह्विव पापं कुरुते सर्वमेव तत्संप्साय शुद्धः पूतोऽजरोऽमृतः संभवति Bṛi. Up. 5. 14. 8.

प्सा 1 Food. –2 Hunger.

प्सात *p. p.* 1 Eaten. –2 Hungry.

प्सानम् 1 Eating. –2 Food.

प्सुर *a.* 1 Lovely, beautiful. –2 Having a shape or form.

फ

फ a. Obvious, evident. फः 1 A high wind, stormy gale. –2 Yawning with the mouth wide open. –3 Fruitfulness. –4 An increaser. –5 The performance of a mystical rite (to propitiate Kubera's attendants). –6 Increasing, expanding. –7 Swelling. –8 Gain. फा 1 Useless or idle speech (*n.* also). –2 Heat. –3 Increase. –4 An increaser. फम् 1 An angry speech. –2 Blowing into, puffing up. –3 Bubbling, boiling.

फक्क् 1 P. (फक्कति, फक्कित) 1 To move slowly, go softly, glide, creep. –2 To act wrongly, behave ill. –3 To swell. –4 To have a preconceived opinion.

फक्कः A cripple.

फक्किका 1 A position, an argument to be proved, a thesis or assertion to be maintained; a grammatical proposition; फणिभाषितभाष्यफक्किका विषमा कुण्डलनामवापिता N. 2. 95. –2 A preiudice, preconceived opinion. –3 A sophistical argument, sophism. –7 A trick, fraud. –8 Logical exposition.

फञ्जिका Alhagi Maurorum (Mar. धमासा).

फञ्जी Clerodendrum Siphonantus (Mar. भारंग, धमासा).

फट् *ind.* An onomatopoetic word used mystically in uttering spells or incantations; अस्त्राय फट्; सविसर्गं फडन्तं तत्सर्वदिक्षु विनिर्दिशेत् Bhāg. 6. 8. 10.

फटः 1 The expanded hood of a snake (फटा also in this sense); निर्विषेणापि सर्पेण कर्तव्या महती फटा (फणा v. l.); विषं भवतु मा भूद् वा फटाटोपो भयंकरः Pt. 1. 204. –2 A tooth. –3 A rogue, cheat (कितव).

फडिङ्गा A cricket, locust or grasshopper.

फण् 1 P. (फणति, फणित) 1 To move, move about; रुरुजुर्मेजिरे फेणुर्बहुधा हरिराक्षसाः Bk. 14. 78. –2 To produce easily or without exertion; (this sense according to some belongs to the Caus. of फण्). –*Caus.* (फाणयति) To skim, take off (the surface of a fluid.).

फणः, –णा [फण्-अच्] 1 The expanded hood of a cobra or any serpent; विप्रकृतः पन्नगः फणं (फणां) कुरुते Ś. 6. 31; मणिभिः फणस्थैः R. 13. 12; Ku. 6. 68; वहति भुवनश्रेणिं शेषः फणाफलकस्थिताम् Bh. 2. 35. –2 The expanded side of the nostril, (also फणम् in this sense). –णः Ved Scum. –Comp. –आटोपः the expanded hood (v. l. for फटाटोप); Pt. 1. 204. –करः a serpent. –धरः 1 a serpent. –2 N. of Śiva. –भरः A serpent; L. D. B. –भृत् *m.* 1 a serpent. –2 the number 'nine' (there being nine chief Nāgas); also eight. –मणिः a jewel said to be found in the hood of a serpent; वसुधान्तनिःसृतमिवाहिपतेः पटलं फणामणिसहस्ररुचाम् Śi. 9. 25. –मण्डलम् the rounded body of a serpent; करालफणमण्डलम् R. 1[?] [?]8; तत्फणामण्डलोदर्चिर्मणिद्योतितविग्रहम् 10. 7.

फण (णा) वत् *m.* A snake in general.

फणिन् *m.* [फणा अस्त्यस्य इनि] 1 A hooded serpent, serpent or snake in general; उद्गिरतो यद्गरलं फणिनः पुष्णासि परिमलोद्गारैः Bv. 1. 12, 58; फणी मयूरस्य तले निषीदति Ṛs. 1. 13; R. 16. 17; Ku. 2. 21. –2 An epithet of Rāhu. –3 An epithet of Patañjali, the author of the Mahābhāṣya on Pāṇini's Sūtras; फणिभाषितभाष्यफक्किका N. 2. 95. –Comp. –इन्द्रः, –ईश्वरः 1 an epithet of the serpent-demon Śeṣa. –2 of Ananta, the lord of serpents. –3 of Patañjali. –केस (स) रः = नागकेशर. –खेलः a quail. –तल्पगः an epithet of Viṣṇu (who uses Śeṣa as his couch). –पतिः 1 an epithet of Śeṣa or of Vāsuki. –2 of Patañjali. –प्रियः wind. –फेनः opium. –भाष्यम् Mahābhāṣya (the commentary of Patañjali on Pāṇini's Sūtras). –भुज् *m.* 1 a peacock. –2 an epithet of Garuḍa. –मुखम् a kind of spade used by house-breakers; Dk. 2. 2. –लता, –वल्ली betel-pepper.

फणिका Ficus Oppositifolia (Mar. काळा उंबर, बोखाडा).

फणिकाराः N. of a people; cf. कर्णिकाराः.

फणिज्झकः Marjoram.

फणिर्जकः A kind of aromatic herb; Mātaṅga L. 8. 8 (according to the commentator it is तुलसी-भेद, prob. Mar. श्वेतमरवा).

फण्डः The belly.

फत्कारिन् *m.* A bird.

फरम् A shield; cf. फलक.

फरुण्डः Green onion.

फरुबकम् 1 A betel-box. –2 Spittoon.

फर्फरायते Den. Ā. To glance about, dart to and fro, sparkle; गण्डूषजलमात्रेण शफरी फर्फरायते Udb.

फर्फरीकः The palm of the hand with the fingers extended; Uṇ. 4. 20. –कम् 1 A young shoot or branch. –2 Softness. –का A shoe.

फल् I. 1 P. (फलति, पफाल, अफालीत्, फलिष्यति, फलित) 1 To bear fruit, yield or produce fruit; नानाफलैः फलति कल्पलतेव भूमिः Bh. 2. 46; परोपकाराय द्रुमाः फलन्तिः Subhāṣ; विधातुर्व्यापारः फलतु च मनोज्ञश्च भवतु Māl. 1. 16; often used transitively in this sense; मौर्यस्यैव फलन्ति पश्य विविधश्रेयांसि मन्त्रीतयः Mu. 2. 16 'accomplish or bring about'; Śi. 2. 89. –2 To be fruitful, to be successful, to be fulfilled or accomplished, to succeed; कैकेयि कामाः फलितास्तवेति R. 13. 59; 15 78; यदा न फेलुः क्षणदाचराणाम् (मनोरथाः) Bk. 14. 113; 12. 66; नैवाकृतिः फलति नैव कुलं न शीलम् Bh. 2. 96, 116. –3 To result, produce results or consequences; फलितमस्माकं कपटप्रबन्धेन H. 1; फलितं नस्तर्हि

भगवतीपादप्रसादेन Mal. 6; Ki. 18, 25; खलः करोति दुर्वृत्तं नूनं फलति साधुषु H. 3. 21 'wicked men commit bad acts, and good men suffer their consequences'. –4 To become ripe, ripen. –5 To fall to the lot of, befall. –6 To be useful. –II. 1 P. (फलति, फुल्ल or फुल्त in the first sense, and फलित in other senses) 1 To burst open, split or cleave asunder, burst, cleave; तस्य मूर्धानमासाद्य पफालासिवरो हि सः Mb. –2 To shine back, be reflected; इह नवशुककोमला मणीनां रविकरसंवलिताः फलन्ति भासः Ki. 5. 38. –3 To go.

फलम् [फल्-अच्] 1 Fruit (fig. also) as of a tree; उदेति पूर्वं कुसुमं ततः फलम् Ś. 7. 30; R. 4. 43; 1. 49. –2 Crop, produce; कृषिफलम् Me. 16. –3 A result, fruit, consequence, effect; अत्युत्कटैः पापपुण्यैरिहैव फलमश्नुते H. 1. 80; फलेन ज्ञास्यसि Pt. 1; न नवः प्रभुराफलोदयात् स्थिरकर्मा विरराम कर्मणः R. 8. 22; 1. 33; अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम् Bg. 18. 12. –4 (Hence) Reward, recompense, meed, retribution (good or bad); फलमस्योपहासस्य सद्यः प्राप्स्यसि पश्य माम् R. 12. 37. –5 A deed, act (opp. words); ब्रुवते हि फलेन साधवो न तु कण्ठेन निजोपयोगिताम् N. 2. 48 'good men prove their usefulness by deeds, not by words'. –6 Aim, object, purpose; परेङ्गितज्ञानफला हि बुद्धयः Pt. 1. 43; किमपेक्ष्य फलम् Ki. 2. 21, 'with what object in view; Me. 56. –7 Use, good, profit, advantage; जगता वा विफलेन किं फलम् Bv. 2. 61. –8 Profit or interest on capital. –9 Progeny, offspring; तस्यापनोदाय फलप्रवृत्तावुपस्थितायामपि निर्व्यपेक्षः (त्यक्ष्यामि) R. 14. 39. –10 A kernel (of a fruit). –11 A tablet or board (शारिफल). –12 A blade (of a sword). –13 The point or head of an arrow, dart &c.; barb; आरामुखं क्षुरप्रं च गोपुच्छं चार्धचन्द्रकम्। सूचीमुखं च भल्लं च वत्सदन्तं द्विभल्लकम्॥ कर्णिकं काकतुण्डं च तथान्यान्यप्यनेकशः। फलानि देशभेदेन भवन्ति बहुरूपतः॥ Dhanur. 64-5; फलयोगमवाप्य सायकानाम् Mu. 7. 10; Ki. 14. 52. –14 A shield. –15 A testicle; अकर्तव्यमिदं यस्माद् विफलस्त्वं भविष्यसि Rām. 1. 48. 27. –16 A gift. –17 The result of a calculation (in Math.) –18 Product or quotient. –19 Menstrual discharge. –20 Nutmeg. –21 A ploughshare. –22 Loss, disadvantage. –23 The second (or third) term in a rule-of-three sum. –24 Correlative equation. –25 The area of a figure. –26 The three myrobalans (त्रिफला). –27 A point on a die. –28 Benefit, enjoyment; ईश्वरा भूरिदानेन यल्लभन्ते फलं किल Pt. 2. 72. –29 Compensation; यावत् सस्यं विनश्येत् तु तावत् स्यात् क्षेत्रिणः फलम् Y. 2. 161. –30 A counterpart (प्रतिबिम्ब); तन्मायाफलरूपेण केवलं निर्विकल्पितम् Bhāg. 11. 24. 3. –31 Shoulder-blade; तस्यां स फलके खड्गं निजघान ततोऽङ्गदः Rām. 6. 76. 10. –Comp. –अदनः = फलाशनः q. v.; a parrot. –अधिकारः a claim for wages. –अध्यक्षः Mimusops Kauki (Mār. खिरणी). –अनुबन्धः succession or sequence of fruits or results. –अनुमेय *a.* to be inferred from the results or consequences; फलानुमेयाः प्रारम्भाः संस्काराः प्राक्तना इव R. 1. 20. –अनुसरणम् 1 rate of profits. –2 following or reaping consequences. –अन्तः a bamboo. –अन्वेषिन् *a.* seeking for reward or recompense (of actions). –अपूर्वम् The mystic power which produces the consequences of a sacrificial act. –अपेक्षा expectation of the fruits or consequences (of acts), regard to results. –अपेत *a.* useless, unfertile, unproductive. –अम्लः a kind of sorrel. (–म्लम्) tamarind. °पञ्चकम् the five sour fruits : bergumot (जम्बीर), orange (नारिङ्ग), sorrel (आम्लवेतस), tamarind (चिञ्चा) and a citron (मातुलुङ्ग, Mar. महाळुंग). –अशनः a parrot. –अस्थि *n.* a cocoa-nut. –आकाङ्क्षा expectation of (good) results; see फलापेक्षा. –आगमः 1 production of fruits, load of fruits; भवन्ति नम्रास्तरवः फलागमैः Ś. 5. 12. –2 the fruit season, autumn. –आढ्य *a.* full of or abounding in fruits. (–ढ्या) a kind of plantain. –आरामः a fruit-garden, orchard. –आसक्त *a.* 1 fond of fuits. –2 attached to fruits, fond of getting fruit (of actions done). –आसवः a decoction of fruit. –आहारः feeding or living on fruits, fruit-meal. –इन्द्रः a species of Jambū (Rājajambū). –उच्चयः a collection of fruits. –उत्तमा 1 a kind of grapes (having no stones). –2 = त्रिफला. –उत्पत्तिः *f.* 1 production of fruit. –2 profit, gain. (–त्तिः) the mango tree (sometimes written फलोत्पति in this sense). –उत्प्रेक्षा a kind of comparison. –उदयः 1 appearance of fruit, production of results or consequences, attainment of success or desired object; आफलोदयकर्मणाम् R. 1. 5; 8. 22. –2 profit, gain. –3 retribution, punishment. –4 happiness, joy. –5 heaven. –उद्गमः appearance of fruits; भवन्ति नम्रास्तरवः फलोद्गमैः Ś. 5. 12 (v. l.). –उद्देशः regard to results; see फलापेक्षा. –उन्मुख *a.* about to give fruit. –उपगम *a.* bearing fruit. –उपजीविन् *a.* living by cultivating or selling fruits. –उपभोगः 1 enjoyment of fruit. –2 partaking of reward. –उपेत *a.* yielding fruit, fruitful, fertile. –काम *a.* one who is desirous of fruit; धर्मवाणिजका मूढा फलकामा नराधमाः। अर्चयन्ति जगन्नाथं ते कामं नाप्नुवन्त्युत॥ (मल. त. Śabda. ch.) –कामना desire of fruits or consequences. –कालः fruit-season. –केसरः the cocoanut tree. –कोशः, –षः, कोशकः the scrotum (covering of the testicles). –खण्डनम् frustration of fruits or results, disappointment. –खेला a quail. –ग्रन्थः (in astrol.) a work describing the effects of celestial phenomena on the destiny of men; Bri. S. –ग्रहः deriving benefit or advantage. –ग्रहि, ग्राहिन् *a.* (also फलेग्रहि and फलेग्राहिन्) fruitful, yielding or bearing fruit in season; श्लाघ्यतां कुलमुपैति पैतृकं स्यान्मनोरथतरुः फलेग्रहिः Kir. K. 3. 60; Mal. 9. 39; भ्रूणुरात्मा फलेग्रहिः Ait. Br. (शुनःशेप legend); फलेग्रहीन् हंसि वनस्पतीनाम् Bk.; द्वितीयो ह्यवकेशी स्यात् प्रथमस्तु फलेग्रहिः Śiva B. 16. 27. (–*m.*) a fruit-tree. –ग्रहिष्णु *a.* fruitful. –चोरकः a kind of perfume (Mar. चोरओवा). –छदनम a house built of wooden boards. –तन्त्र *a.* aiming only at one's advantage. –त्रयम्, –त्रिकम् the three myrobalans (त्रिफला). –द, –दात्, –प्रद *a.* 1 productive, fruitful, bearing fruit; फलदानां तु वृक्षाणां छेदने जप्यमृक्शतम् Ms. 11. 142; गतेऽपि वयसि ग्राह्या विद्या सर्वात्मना बुधैः। ...... अन्यत्र फलदा भवेद्॥ Subhāṣ. –2 bringing in gain or profit. –3 giving

a reward, rewarding. (-दः) a tree. -धर्मन् *a.* ripening soon and then falling on the ground, perishing; फलधर्मा महाराज फलधर्मा तथैव च ॥ निमेषादपि कौन्तेय यस्यायुरपचीयते Mb. 3. 35. 2-3. -निर्वृत्तिः *f.* final consequence or reward. -निवृत्तिः *f.* cessation of consequences. -निष्पत्तिः *f.* 1 production of fruit. -2 attainment of reward. -परिणतिः *f.*, -परिणामः, -पाकः (-फलेपाकः also) 1 the ripening of fruit. -2 the fulness of cousequences. -पाकः Carissa Carandas (Mar. करवंद). -पाकान्ता, -पाकावसाना an annual plant; ओषध्यः फलपाकान्ताः Ak. -पातनम् knocking down or gathering fruit. -पादपः a fruit-tree. -पूरः, -पूरकः the common citron tree; एतस्मिन् फलपूरबीजनिकरभ्रान्त्या नितान्तारुणे संप्राप्तेषु शुकेषु पञ्जरशुका निर्गन्तुमुद्युञ्जते। Rām. Ch. 7. 86. -प्रजननम् the production of fruit. -प्रदानम् 1 the giving of fruits. -2 a ceremony at weddings. -प्राप्तिः *f.* attainment of the desired fruit or object. -प्रिया 1 the Priyaṅgu plant. -2 a species of crow. -प्रेप्सु *a.* desirous of attaining results. -बन्धिन् *a.* forming or developing fruit. -भागः a share in any product or profit. -भागिन्, -भाज् *a.* partaking of a reward or profit; दातॄन् प्रतिग्रहीतॄंश्च कुरुते फलभागिनः Ms. 3. 143. -भावना The acquisition of a result; success; सुपर्णा हि स्फुटभावना या सा पूर्वरूपं फलभावनायाः N. 14. 7. -भुज् *m.* a monkey; P. R. -भूमन् *m.* greater fruit; ऋतुवच्चानुमानेनाभ्यासे फलभूमा स्यात् MS. 11. 1. 29. -भूयस्त्वम् (see फलभूमन् above); यथा कर्मसु सौर्यादिषु फलं कर्मणा क्रियत इति कर्माभ्यासे फलभूयस्त्वमेवमिहापि ŚB. on MS. 11. 1. 29. -भूमिः *f.* a place where one receives the reward or recompense of his deeds (*i. e.* heaven or hell). -भृत् *a.* bearing fruit, fruitful. -भोगः 1 enjoyment of consequences. -2 usufruct. -मत्स्या the aloe plant. -मुख्या a species of plant (अजमोदा). -मूलम् fruits and roots; फलमूलाशिनौ दान्तौ Rāmarakṣā 18. -योगः 1 the attainment of fruit or the desired object; Mu. 7. 10. -2 wages, remuneration. -3 a stage in the performance of a drama; सावस्था फलयोगः स्यात् यः समग्रफलागमः S. D. -राजन् *m.* a water-melon. -राशिः *m.* the 3rd term in the rule of three. -वन्ध्यः a tree barren of fruit. -वर्णिका jelly (?); Gaṇeśa P. 2. 149. -वर्तिः *f.* a coarse wick of cloth besmeared with some laxative and inserted into the anus for discharging the bowels, suppository. -वर्तुलम् a watermelon. -वल्ली a series of quotients. -विक्रयिन् *a.* a fruit-seller. -वृक्षः a fruit-tree. -वृक्षकः the bread-fruit tree. -षाडवः the pomegranate tree. -शालिन् *a.* 1 bearing fruit, fruitful. -2 sharing in the consequences. -शैशिरः the Badara tree. -श्रेष्ठः the mango tree. -संस्थ *a.* bearing fruit. -संपद् *f.* 1 abundance of fruit. -2 success. -3 prosperity. -साधनम् a means of effecting any desired object, realization of an object -सिद्धिः *f.* 1 reaping fruit, attainment or realization of the desired object. -2 a prosperous result. -स्थानम् the stage in which results are enjoyed; Buddh. -स्थापनम् the sacrament called सीमन्तोन्नयन; फलस्थापनात् मातापितृजं पाप्मानमपोहति Hārīta. -स्नेहः a walnut tree. -हारी an epithet of Kālī or Durgā. -हानिः loss of profit. -हीन *a.* yielding no fruit or profit. -हेतु *a.* acting with a view to results.

फलकम् 1 A board, plank, slab, tablet; कालः काल्या भुवनफलके क्रीडति प्राणिशारैः Bh. 3. 39; द्यूत°, चित्र° &c. -2 Any flat surface; चुम्ब्यमानकपोलफलकाम् K. 218; धृतमुग्धगण्डफलकैर्विबभुः Śi. 9. 47, 37; cf. तट. -3 A shield; Rām. 1. -4 A slab, tablet, leaf or page for writing upon. -5 The buttocks, hips. -6 The palm of the hand. -7 Fruit, result, consequence. -8 Profit, gain. -9 Menstruation. -10 The head of an arrow. -11 The pericarp of a lotus. -12 A broad and flat bone (of the forehead). -13 A wooden seat; तवार्हते तु फलकं कूर्चं वाऽप्यथवा बृसी Mb. 5. 35. 15. -14 Bark (as material for clothes). -Comp. -परिधानम् putting on a bark-garment. -पुरम् N. of a town in the east of India; P. VI. 2. 101; cf. फलपुर. -पाणि *a.* armed with a shield (as a warrior). -यन्त्रम् an astronomical instrument invented by Bhāskarāchārya. -सक्थ *a.* having a thigh as broad as a board.

फलकिन् *a.* 1 Boarded. -2 Armed with a shield. -*m.* 1 A wooden bench. -2 Sandal-wood (*n.* also). -3 (also फलिः and फल्लकिन्) A kind of small fish (Mystus Kapirat); L. D. B.

फलतस् *ind.* As a consequence, consequently, virtually.

फलनम् [फल्-ल्युट्] 1 Bearing fruit, fructifying. -2 Producing results or consequences.

फलवत् *a.* 1 Fruitful, fruit-bearing; अपुष्पाः फलवन्तो ये ते वनस्पतयः स्मृताः Ms. 1. 47. -2 Producing or yielding results, successful, profitable. -3 Containing the result or end of a plot. -*m.* A fruit-tree. -ती The plant called प्रियङ्गु.

फलसः (**शः**) The bread-fruit tree.

फलहकः A plank, board.

फलही The cotton tree.

फलायोषित् *f.* A cricket; cf. फडिङ्गा.

फलिः *m.* 1 A kind of fish. -2 A bowl or cup.

फलिकः A mountain.

फलित *p. p.* 1 Having borne or reaped fruit, yielding fruit, fruitful. -2 Fulfilled, accomplished, realized (as a desire). -तः A fruit tree. -ता A menstruous woman. -तम् A sort of perfume (शैलेय).

फलिन् *a.* [फल अस्त्यर्थे इनि] 1 Fruitful, bearing or yielding fruit (fig. also); पुष्पिणः फलिनश्चैव वृक्षास्तूभयतः स्मृताः Ms. 1. 47; Mk. 4. 10. -2 Advantageous, profitable. -*m.* A tree; यथा प्रसूयमानस्तु फली दद्यात् फलं बहु Mb. 14 18. 2.

फलिन *a.* [फल्-इनच्] Fruitful, bearing fruit; ताम्बूलीपटलैः पिनद्धफलिनव्यानम्रपूगद्रुमाः Mal. 6. 19. **–नः** The bread-fruit tree.

फलिनी, –फली The Priyangu creeper; (said by poets to be the 'wife' of the mango tree; cf. मिथुनं परिकल्पितं त्वया सहकारः फलिनी च नन्विमौ R. 8. 61).

फलीकृ 8 U. To winnow, thresh, separate the grain from the husks.

फलीकरणम्, –फलीकारः 1 Winnowing, separating the grain from the husks. –2 husk, chaff, smallest grain etc; प्रजायामर्थप्रत्ययो धनदमिवाधनः फलीकरणम् Bhāg. 5. 3. 13; ईश्वरात् क्षीणपुण्येन फलीकारानिवाधनः Bhāg. 4. 9. 36.

फलीकृत *p. p.* Threshed, winnowed.

फल्कः A stretched out, expanded body.

फल्गु *a.* [फल्-उ गुक् च Uṇ. 1. 18] 1 Pithless, unessential; unsubstantial; सारं ततो ग्राह्यमपास्य फल्गु Pt. 1. –2 Worthless, useless, unimportant; 'फल्गु तुच्छमसारं च' Yādava.; तरीषु तत्रत्यमफल्गु भाण्डम् Śi. 3. 76. –3 Small, minute; नामरूपविभेदेन फल्ग्व्या च कलया कृताः Bhāg. 8. 3. 22. –4 Vain, unmeaning. –5 Weak, feeble, flimsy; फल्गूनि तत्र महतां जीवो जीवस्य जीवनम् Bhāg. 1. 13. 47. –6 Untrue. –7 Beautiful, lovely. **–ल्गुः** *f.* 1 The spring season. –2 The opposite-leaved fig-tree (Mar. बोखाडा). –3 N. of a river at Gayā. –4 A red powder of wild ginger (Mar. गुलाल) thrown by the Hindus over one another at the Holi festival. –5 (du.) (In astrol.) N. of a नक्षत्र. **–Comp.** **–उत्सवः** the vernal festival, commonly called *Holi*. **–द** *a.* avaricious. **–वाक्** a falsehood, lie. **–वाटिका** the opposite-leaved fig-tree.

फल्गुता, –त्वम् Worthlessness, vanity, insignificance; न हि गणयति क्षुद्रो जन्तुः परिग्रहफल्गुताम् Bh. 2. 9.

फल्गुन *a.* 1 Red. –2 Born under the constellation फल्गुनी. **–नः** 1 The month of Phālguna. –2 N. of Indra. –3 Of Arjuna.

फल्गुनालः The month of Phālguna.

फल्गुनी N. of a constellation (पूर्वा and उत्तरा); मैत्रे मुहूर्ते शशलाञ्छनेन योगं गतासूत्तरफल्गुनीषु Ku. 7. 6. **–Comp.** **–भवः** the planet Jupiter.

फाल्गुनिकः The month of Phālguna; L. D. B.

फल्यम् A flower, bud.

फा *m.* (Nom. फास्) 1 Heat. –2 Idle talk.

फाट् *ind.* An interjection of calling.

फाटकी Alum.

फाणि *f.* 1 Molasses. –2 Flour mixed with curds (करम्भ).

फाणितम् Raw sugar; इक्षोः रसस्तु यः पक्वः किंचिद् गाढो बहुद्रवः। स एवेक्षुविकारेषु ख्यातः फाणितसंज्ञया ॥ Bhāva P.; condensed juice of sugarcane (Mar. काकवी); फाणितेषु मरिचावचूर्णना सा स्फुटं कटुरपि स्पृहावहा N. 14. 118. –2 A product of milk (गोरसविकार); भक्ष्यान् फाणितसंयुक्तान् दत्वा सौभाग्यमृच्छति Mb. 13. 64. 13.

फाण्ट *a.* Made by an easy process, readily or easily prepared (as a decoction). **–ण्टः, –ण्टम्** An infusion, decoction; फाण्टमनायाससाध्यः कषायविशेषः Sk.; फाण्टचित्रान्नपाणयः Bk. 9. 17. (see the commentary: यदच्छूतमपिष्टं कषायमुदकसंपर्कमात्राद्विभक्तरसम् ईषदुष्णं तदल्पप्रयाससाध्यत्वात् फाण्टमित्युच्यते ।); क्षुण्णद्रव्यफले सम्यक् जलमुष्णं विनिक्षिपेत्। पात्रे चतुष्पलमितं ततस्तु स्रावयेज्जलम्। सोऽयं चूर्णद्रवः फाण्टो भिषग्भिरभिधीयते Vaidyaka. **–ण्टम्** The first particles of butter produced by churning.

फाण्टकः A decoction, infusion.

फाण्डम् The belly.

फारी Black cumin (Mar. काळें जिरें).

फालः, –लम् 1 A ploughshare; Ms. 6. 16. –2 Separation of the hair on each side of the head (सीमन्तभाग); द्विफालबद्धाश्चिकुराः शिरःस्थितम् N. 1. 16. –3 A sort of spade. –4 A bundle. –5 The forehead (for भाल). **–लः** 1 An epithet of Balarāma. –2 Of Śiva. –3 The citron tree. **–लम्** 1 A garment of cotton. –2 A ploughed field. **–Comp.** **–आहत** *a.* ploughed, tilled. **–कृष्ट** *a.* 1 tilled. –2 produced by cultivation; न फालकृष्टमश्नीयात् Ms. 6. 16. (**–ष्टम्**) a ploughed field. **–गुप्तः** N. of Balarāma.

फालखेला A quail.

फालिका A slice, piece; मृदुव्यञ्जनमांसफालिकाम् N. 16. 82. ताम्बूल° bits of betel; N. 20. 82.

फाल्गुनः 1 N. of a Hindu month (corresponding to February-March). –2 An epithet of Arjuna; Mb. thus explains the epithet:— उत्तराभ्यां फल्गुनीभ्यां नक्षत्राभ्यामहं दिवा। जातो हिमवतः पृष्ठे तेन मां फाल्गुनं विदुः॥ –3 N. of a tree, also called अर्जुन. **–Comp.** **–अनुजः** 1 the month Chaitra. –2 the vernal season (वसन्तकाल). –3 an epithet of नकुल and सहदेव.

फाल्गुनालः = फाल्गुन.

फाल्गुनी The full-moon day of the month फाल्गुन; °भवः an epithet of the planet Jupiter.

फिः 1 A wicked man. –2 Useless or idle talk. –3 Anger.

फिट्सूत्रम् N. of a grammatical work by शान्तनवाचार्य.

फिङ्गकः The fork-tailed shrike; cf. कलिङ्ग.

फिरङ्गः 1 The country of the Franks (*i. e.* of Europeans). –2 A disease of the Franks, syphilis; also फिरङ्गामयः, –व्याधिः.

फिराङ्गिन् *m.* A Frank (*i. e.* a European).

फुः 1 A magical formula. -2 An idle talk.

फुक्कः A bird.

फुटः The expanded hood of a snake. **-Comp.** **-आटोपः** =फटाटोपः q. v.

फुट्टकम् A kind of cloth; Buddh.

फुट्टिका A sort of woven texture; Ks.

फुडुत् *ind.* An interjection.

फु (फू) त् *ind.* An onomatopoetic word generally used in composition with कृ, and imitative of the sound made by blowing into liquids &c.; sometimes it expresses disregard or contempt; फु (फू) त्कृ 1 To blow into (a liquid); बालः पायसदग्धो दध्यपि फूत्कृत्य भक्षयति H. 4. 103. -2 To scream aloud, cry, shriek. **-Comp.** **-कारः, -कृतम्, -कृतिः** *f.* 1 blowing into. -2 hissing, whizzing. -3 the hiss of a serpent. -4 sobbing. -5 screaming, a loud shriek, yell. फूत्काररन्ध्रम् the hole of a flute. **-कृत** *a.* 1 blown into &c. -2 blown up (as a bubble.) -3 screamed aloud. (**-तम्**) 1 the sound of a wind-instrument. -2 a loud cry, shriek, scream. **-कृतिः** 1 the blowing of a wind instrument. -2 blowing, hissing. -3 crying aloud.

फुप्फु *ind.* An onomatopoetic word. **-Comp.** **-कारक** *a.* panting, gasping.

फुप्फुसः, -सम् The lungs.

फुम्फुआ *ind.* Imitation of the sound made by the crackling of fire.

फुराफुराय Den. Ā To tremble, flicker.

फुलिङ्गः Syphilis; cf. फिरङ्ग.

फुल्ल् 1 P. (फुल्लति, फुल्लित) 1 To bloom, expand, blow, open (as a flower). -2 To swell, expand; निष्पीडनस्फारफुल्लफणापीठः Māl. 5. 23.

फुल्ल *p. p.* (of फुल्ल्) 1 Expanded, opened, blown, पुष्पं च फुल्लं नवमल्लिकायाः प्रयाति कान्तिं प्रमदाजनानाम् Rs. 6. 6; फुल्लारविन्दवदनाम् Ch. P. 1. -2 Flowering, blossomed; फुल्लासनाग्रविटपानिव वायुरुग्णान् R. 9. 63. -3 Expanded, dilated, wide opened (as eyes). -4 Smiling, gay. -5 Puffed, inflated (as cheeks). -6 Loose (as a garment). **-ल्लम्** A full-blown flower. **-Comp.** **-तुवरी** alum. **-दामन** *n.* a kind of metre. **-नयन, -नेत्र, -लोचन** *a.* having eyes dilated (with joy); वीक्षन्तेऽन्यमितः स्फुटत्कुमुदिनीफुल्लोल्लसल्लोचनाः Pt. 1. 136. (**-नः**) a kind of deer. (**-नम्**) a large, full eye. **-फालः** the wind raised in winnowing corn. **-वदन** *a.* looking pleased or happy.

फुल्लनम् Inflating, filling with wind.

फुल्लिः (also फुल्तिः) *f.* 1 Blossoming, blooming. -2 Perfection, fullness.

फुल्लरीकः 1 A district, place. -2 A snake.

फेञ्चकः A kind of bird.

फेत् (त्) कारः A shriek, howl (of a wind or something as animal, arrow &c); फेत्कारैर्हेषितैः शब्दैः सर्वमेवाकुलं बभौ Mb. 7. 154. 26.

फेनः, -नः 1 Foam, froth; गौरीवक्त्रभ्रुकुटिरचनां या विहस्येव फेनैः Me. 52; R. 13. 11; Ms. 2. 61; फेनैर्जलानामुरस्य मूर्ध्नः Bk. 12. 58. -2 Foam of the mouth. -3 Saliva. -4 White cuttle-fish bone. **-Comp.** **-अग्रम्** a bubble. **-अशनिः** N. of Indra; cf. नमुचि. **-आहार** *a.* living on foam. **-गिरिः** N. of a mountain near the mouth of the Indus. **-दुग्धा** a kind of small shrub (Mar. मोठी दुधी). **-धर्मन्** *a.* transient; प्रत्यक्षं मन्यसे कालं मर्त्यः सन् कालबन्धनः। फेनधर्मा महाराज फलधर्मा तथैव च ॥ Mb. 3. 35. 2. **-पिण्डः** 1 a mere bubble. -2 an empty idea, non-entity. **-वाहिन्** *m.* a filtering cloth.

फेण (न) क 1 See फेन. -2 Ground rice boiled in water. **-का** A kind of pastry (फेणी).

फेण (न) पः An ascetic living on fruits etc., fallen down automatically; वैखानसा वालखिल्यौदुम्बराः फेनपा वने Bhāg. 3. 12. 43; फेनपानामृषीणां यो धर्मः Mb. 13. 141. 96.

फेणी, फेनिका *f.* A kind of sweetmeat; L. D. B.

फेनायितम् *p. p.* of a denominative from फेन, applied to an elephant's roar produced in the back of the mouth; Mātaṅga L. 2. 13.

फेनि (न) ल *a.* Foamy, frothy; फेनिलमम्बुराशिम् R. 13. 2. **-लः** A kind of tree (Mar. रिठा).

फेरः, फेरण्डः A jackal.

फेरवः 1 A jackal; क्रन्दत्फेरवचण्डडात्कृति &c. Māl. 5. 19. -2 A rogue, rascal, cheat. -3 A demon, goblin.

फेरुः A jackal; गृहेषु येष्वतिथयो नार्चिताः सलिलैरपि। यदि निर्यान्ति ते नूनं फेरुराजगृहोपमाः ॥ Bhāg. 8. 16. 7.

फेल् 1 P. (फेलति) To go, move.

फेलम्, फेला, फेलिका, फेली (alos फेलकः, फेलिः according to L. D. B.) Remnants of food, leavings of a meal, orts.

फेला *f.* (or छेला) The vault of a foundation pit.

फेलुकः The scrotum.

ब

बः 1 N. of Varuṇa. -2 Water. -3 A water-jar; (the meanings of this letter are given in the following verse; बः पुमान् वरुणे सिन्धौ भगे तोये गते तु वा। गन्धने तन्तुसंताने पुंस्येव वपने स्मृतः ॥ Medinī.

बंह् 1 Ā. (बंहते, बंहित). To increase, grow. -*Caus.* 1 To increase. -2 To strengthen, make firm, fix.

बंहिमन् *m.* Abundance, multitude; P. VI. 4. 157.

बंहिष्ठ *a.* 1 Most abundant, very great, excessive; (superl. of बहुल q. v.). -2 Very low or deep.

बंहीयस् *a.* 1 More numerous or abundant, much more, exceeding; (compar. of बहुल q. v.). -2 Very stout or fat.

बकः 1 The Indian crane; न प्रयत्नशतेनापि शुकवत् पाठ्यते बकः H. -2 A cheat, rogue, hypocrite (the crane being a very cunning bird that knows well how to draw others into its clutches). -3 N. of a demon killed by Bhīma. -4 N. of another demon killed by Kriṣṇa. -5 N. of Kubera. -6 An apparatus for subliming metals or minerals. -की = पूतना q. v. अहो बकी यं स्तनकालकूटं जिघांसयापाययदप्यसाध्वी Bhāg. 3. 2. 23. -2 A female crane. -Comp. -चरः, -वृत्तिः, -व्रतचरः, -व्रतिकः -व्रतिन् *m.* 'acting like a crane', a false devotee, religious hypocrite; अधोदृष्टिर्नैष्कृतिकः स्वार्थसाधनतत्परः। शठो मिथ्याविनीतश्च बकव्रतचरो द्विजः ॥ Ms. 4. 196. -चिञ्चिका, -चिञ्ची a kind of fish. -जित् *m.*, -निषूदनः epithets of 1 Bhīma. -2 of Krisna. -धूपः a kind of perfume. -पञ्चकम् the last five days of the bright half of the month of Kārtika (during which even the heron eats no fish). -यन्त्रम् a kind of retort. -व्रतम् 'crane-like conduct', hypocrisy; ये बकव्रतिनो विप्राः Ms. 4. 197; see also 196 (बकव्रतचर). -सहवासिन् a lotus flower; Kuval.

बकबकाय Den. Ā. To croak.

बकाची A kind of fish.

बकाय Denom. P. To act like बक.

बकुर *a.* Horrible. -रः 1 Lightning; thunderbolt. -2 A wind instrument used in battle; अभि दस्युं बकुरेणा धमन्ता Ṛv. 1. 117. 21. (Naighantuka gives the first meaning.)

बकुलः 1 A kind of tree, Mimusops Elengi, (said according to the convention of poets to put forth blossoms when sprinkled by young women with mouthfuls of wine); काङ्क्षत्यन्यो (केसरः or बकुलः) वदनमदिरां दोहदच्छद्मनाऽस्याः Me. 80; बकुलः सीधुगण्डूषसेकात् (विकसति); तव निश्वसितानुकारिभिर्बकुलैरर्धचितां समं मया R. 8. 64; (for similar conventions about other trees see the quotation under अशोक). -2 A kind of drug. -लम् The fragrant flower of this tree; कृती मालाकारो बकुलमपि कुत्रापि निदधे Bv. 1. 54. -ली A kind of drug.

बकूलः The Bakula tree.

बकेरुका 1 A small crane. -2 The branch of a tree bent by the wind.

बकोटः A crane.

बटुः A boy, lad, chap, often used as a depreciatory term or to show contempt; चाणक्यबटुः &c.; see वटु. -2 A young Brahmacharin; अव्रता बटवोऽशौचाः Bhāg. 12. 3. 33. -Comp. -मात्रः a mere boy.

बटुकः 1 A boy, lad; see वटु. -2 A stupid fellow. -Comp. -भैरवः a form of Bhairava.

बटूकरणम् Investiture with the sacred thread.

बट्टलोहकम् Damasked steel.

बडि(लि)शम् (-शः, -शा, -शी) A fish-hook; स मीनोऽप्यज्ञानाद् बडिशयुतमश्नातु पिशितम् Bh. 3. 21; तांस्ते भक्षयतः कण्ठे यस्तप्तबडिशायते Bm. 1. 122. गरीयसेऽपकाराय तिमीनां बडिशं यथा Śiva B. 26. 45. -2 A surgical instrument.

बत *ind.* A particle expressing:— 1 Sorrow, regret (alas!); वयं बत विदूरतः क्रमगता पशोः कन्यका Mal. 3. 18; अहो बत महत् पापं कर्तुं व्यवसिता वयम् Bg. 1. 45. -2 Pity or compassion; क्व बत हरिणकानां जीवितं चातिलोलम् Ś. 1. 10. -3 Addressing, calling; बत वितरत तोयं तोयवाहा नितान्तम् G. M.; R. 9. 47. -4 Joy or satisfaction; अपि बत मधुपुर्यामार्यपुत्रोऽधुनास्ते Bhāg. 10. 47. 21; अहो बतासि स्पृहणीयवीर्यः Ku. 3. 20. -5 Wonder or surprise; वनजे नेति बलं बतास्ति सत्त्वे Ki. 13. 8; अहो बत महच्चित्रम् K. 154. -6 Censure. -7 Truth (सत्यार्थे); कल्याणी बत गाथेयं लौकिकी प्रतिभाति माम् Rām. 5. 34. 6. For the meanings of बत with अहो see under अहो.

बद् 1 P. To be steady or firm.

बदरः [बद् स्थैर्ये अरच्] 1 The jujube tree. -2 The kernel of the fruit of the cotton-plant. -रा The cotton shrub. -रम् 1 The fruit of jujube; करबदरसदृशमखिलं भुवनतलं यत् प्रसादतः कवयः। पश्यन्ति सूक्ष्ममतयः सा जयति सरस्वती देवी Vās. 1; बदरामलकाम्रदाडिमानामपहृत्य श्रियमुन्नतां क्रमेण Bv. 2. 8. -2 The pod of the cotton shrub. -3 The berry used as a weight. -Comp. -कुणः the time when the fruit of the jujube becomes ripe. -पाचनम् N. of a sacred bathing-place.

बदरिका 1 The jujube tree or its fruit; अन्ये बदरिकाकारा बहिरेव मनोहराः H. 1. 90. -2 N. of one of the many sources of the Ganges and of the neighbouring

hermitage of the sages Nara and Nārāyana. –Comp. –आश्रमः the hermitage at Badarikā.

बदरिः *f.* The jujube tree.

बदरी The jujube tree; see बादरायण. –2 = बदरिका (2) above. –3 The cotton shrub. –Comp. –छदः a kind of perfume. –तपोवनम् the penance grove at Badarī; बदरीतपोवननिवासनिरतमवगात मान्यथा Ki. 12. 33. –नाथः N. of a temple at Badarī. –नारायणः N. of a sacred place. –पत्रम् a kind of perfume (नखरी). –फलम् a fruit of the jujube tree. –वनम् (–णम्) a wood or thicket of jujube trees. –वासा an epithet of Durgā. –शैलः a rocky eminence at Badarī.

बद्बम् A large number (according to Sāyaṇa 100 kotis, others 10,000 millions; 13084 according to Bhāg. com. 9. 20. 26).

बध् I. 1 A. (बीभत्सते; strictly the desiderative base of बध् used in a primitive sense) To abhor, loathe, detest, shrink from, be disgusted with (with abl.); येभ्यो बीभत्समानाः U. 1. –II. 10 P. (बाधयति) To bind, check, restrain.

बधिर *a.* Deaf; ध्वनिभिर्जनस्य बधिरीकृतश्रुतेः Śi. 13. 3; Ms. 7. 149.

बधिरयति Den. P., बधिरीकृ 8 U. To deafen (fig. also); बधिरिताशेषदिगन्तरालम् K.; Mv. 6. 30.

बधिरित *a.* Made deaf, deafened.

बधिरिमन् *m.* Deafness.

बन्द् 1 P. To divide; L. D. B.

बन्दिन् See वन्दिन्. A bard, herald; धर्मच्छेदात् पटुतरगिरो बन्दिनो नीलकण्ठाः V. 4. 13.

बन्दिः, –न्दी *f.* 1 Bondage, confinement. –2 A prisoner, captive; मोक्ष्यते सुरबन्दीनां वेणीर्वीर्यविभूतिभिः Ku. 2. 61. –Comp. –ग्रहः taking prisoner, capture. –ग्राहः a house breaker, robber. –पालः a jailor. –शूला a harlot, prostitute. –स्थित *a.* imprisoned.

बन्ध् 9 P. (बध्नाति, बबन्ध, अभांत्सीत्, भंत्स्यति, बन्द्धुम्, बद्ध; *pass.* बध्यते) 1 To bind, tie, fasten; बन्द्धुं न संभावित एव तावत् करेण रुद्धोऽपि च केशपाशः Ku. 7. 57, 25; R. 7. 9; Bk. 9. 75. –2 To catch, capture, imprison, ensnare, make captive; कर्मभिर्न स बध्यते Bg 4. 14; बलिर्बबन्धे Bk. 2. 39; 14. 56. –3 To chain, fetter. –4 To check, stop, suppress; as in बद्धकोप, बद्धकोष्ठ &c. –5 To put on, wear; न हि चूडामणिः पादे प्रभवामीति बध्यते Pt. 1. 72; बबन्धुरङ्गुलित्राणि Bk. 14. 7. –6 To attract, arrest (as eyes &c.); बबन्ध चक्षूंषि यवप्ररोहः Ku. 7. 17; or बध्नाति मे चक्षुः (चित्रकूटः) R. 13. 47. –7 To fix or set upon, direct towards (as the eyes or mind), cast upon (with loc.); दृष्टिं लक्ष्येषु बध्नन् Mu. 1. 2; R. 3. 4; 6. 36; Bk. 20. 22. –8 To bind or fasten together (as hair); पूर्णप्रतिज्ञेन मया केवल बध्यते शिखा Mu. 7. 17. –9 To build, construct, form, arrange; बद्धोर्मिनाकवनितापरिभुक्तमुक्तम् Ki. 8. 57; छायाबद्धकदम्बकं मृगकुलम् Ś. 2. 6; तस्याञ्जलिं बन्धुमतो बबन्ध R. 16. 5; 4. 38; 11. 35, 78; Ku. 2. 47; 5. 30; Bk. 7. 77. –10 To put together, compose, construct (a poem, verse &c.); तुष्टैर्बद्धं तदलघु रघुस्वामिनः सच्चरित्रम् Vikr. 18. 107; श्लोक एवास्त्वयं बद्धः Rām. 1. 2. 31. –11 To form, produce, bear (as fruit &c.); काले खलु समारब्धाः फलं बध्नन्ति नीतयः R. 12. 69; Ku. 5. 60 (v. l.) Ś. 6. 3. –12 To have, possess, entertain, cherish, feel. –13 To punish, chastise. –14 To offer, sacrifice (as an animal). –15 To shut, close, stop. –16 To oppress, overpower. –17 To join, unite. –18 To produce, cause, effect. –19 To strike (as root). –20 To display, exhibit, show. (The senses of बन्ध् are variously modified according to the noun with which it is connected; *e. g.* भ्रुकुटिं बन्ध् to knit or bend the eyebrows, to frown; मुष्टिं बन्ध् to clench the fist; अञ्जलिं बन्ध् to fold the hands together in supplication; चित्तं, धियं, मनः, हृदयं बन्ध् to set the heart on; प्रीतिं, भावं, रागं बन्ध् to fall in love with, be enamoured of; सेतुं बन्ध् to construct or build a bridge; वैरं बन्ध् to conceive hatred, contract enmity; सख्यं, सौहृदं बन्ध् to form friendship; गोलं बन्ध् to form a globe; मण्डलं बन्ध् to form a circle, sit or stand in a circle; मौनं बन्ध् to maintain silence; परिकरं, कक्षां बन्ध् to gird up one's loins, prepare oneself for any thing; see the compounds under बद्ध also). –*Caus.* To cause to bind, form, construct, build &c.; स सेतुं बन्धयामास प्लवगैर्लवणाम्भसि R. 12. 70.

बद्ध *p. p.* [बन्ध्-कर्मणि क्त] 1 Bound, tied, fastened. –2 Chained, fettered. –3 Captured, caught. –4 Confined, imprisoned. –5 Put or girt on. –6 Restrained, suppressed, withheld. –7 Formed, built; शरबद्धमिवाभाति द्वितीयं भास्वदम्बरम् Rām. 6. 107. 24. –8 Cherished, entertained. –9 Combined, united. –10 Firmly rooted, firm. –11 Shut, stopped, closed. –12 Inlaid, studded. –13 Composed (as verses). –14 Formed, contracted; असूत सा नागवधूपभोग्यं मैनाकमम्भोनिधिबद्धसख्यम् Ku. 1. 20. –15 Manifested, displayed. –16 Entangled, involved. –17 Congealed, clotted (as blood). –18 Effected, caused, formed, produced; बद्धं जालकम् Ś. 1. 29; 2. 6; U. 6. 17; Māl. 3. 7. –19 Possessed, preserved; बद्धं सन्तं मन्यते लब्धमर्थम् Mb. 5. 92. 23. –Comp. –अङ्गुलित्र, –अङ्गुलित्राण *a.* having a finger-guard fastened. –अञ्जलि *a.* folding the hands together in supplication, with the hands joined in humble entreaty or raised to the forehead as a mark of respect. °पुट *a.* forming a cup with the hollowed hands. –अनुराग *a.* having the affection fixed upon, feeling or manifesting love for. –अनुशय *a.* 1 feeling repentant. –2 of a fixed resolve. –अम्बु *n.* water derived from a current. –अवस्थिति *a.* constant. –आदर *a.* attaching great value to. –आनन्द *a.* joyful. –आयुध *a.* accoutred with arms. –आशङ्क *a.* one whose

suspicions have been roused, grown suspicious. –उत्सव *a.* enjoying or observing a festival or holiday. –उद्यम *a.* making united efforts. –कक्ष, –कक्ष्य *a.* see बद्धपरिकर. –कदम्बक *a.* forming groups; छायाबद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यतु Ś. 2. 6. –कलापिन् *a.* one who has his quiver tied on. –केसर *a.* 1 forming hair. –2 having the filaments formed. –कोप, –मन्यु, –रोष *a.* 1 feeling anger, entertaining a feeling of anger. –2 suppressing or governing one's wrath. –गुदम् a kind of obstruction of the bowels; निरुध्यते तस्य गुदे पुरीषं, निरेति कृच्छ्रादपि चाल्पमल्पम्। हृन्नाभिमध्ये परिवृद्धिमेति तस्योदरं बद्धगुदं वदन्ति॥ Bhāva. P. –ग्रह *a.* insisting on something. –चित्त, –मनस् *a.* having the mind intently fixed on, rivetting the mind on. –जिह्व *a.* tongue-tied. –तूणीर *a.* equipped with a quiver. –दृष्टि, –नेत्र, –लोचन *a.* having the eyes intently fixed on, looking with a steadfast gaze at; ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः Ś. 1. 7. –धार *a.* continuously or incessantly flowing. –निश्चय *a.* firmly resolved, resolute. –नेपथ्य *a.* attired in a theatrical dress. –परिकर *a.* having the girdle girded on, one who has girded up his loins; *i. e.* ready, prepared. –पुरीष *a.* having the bowels constipated. –प्रतिज्ञ *a.* 1 one who has made a vow or promise. –2 firmly resolved. –प्रतिश्रुत् *a.* resonant with echoes. –भाव *a.* having the affection or heart fixed upon, enamoured of (with loc.); दढं त्वयि बद्धभावोर्वशी V. 2. –भूः *f.* 1 the lowest floor. –2 ground prepared for the site of a house. –3 pavement. –मण्डल *a.* ranged in circles. –मुष्टि *a.* 1 having a closed fist. –2 close-fisted, covetous. –मूत्र *a.* obstructing the urine. –मूल *a.* deep-rooted, striking root firmly; बद्धमूलस्य मूलं हि महद्वैरतरोः स्त्रियः Śi. 2. 38. –मौन *a.* holding the tongue, keeping silence, silent; अदृश्यत त्वच्चरणारविन्दविश्लेषदुःखादिव बद्धमौनम् R. 13. 23. –राग *a.* having the desire fixed on, enamoured, impassioned; गल्लस्थलेषु मदवारिषु बद्धरागमत्तभ्रमद्भ्रमरपादतलाहतोऽपि Pt. 1. 123. –वसति *a.* fixing an abode. –वाच् *a.* tongue-tied, maintaining silence. –वेपथु *a.* seized with tremour. –वैर *a.* one who has conceived bitter hatred or contracted confirmed hostility. –शिख *a.* 1 one whose hair is tied up (into a knot on the crown of the head). –2 one who is still in childhood, young. –सूतः a particular preparation of quicksilver. –स्नेह *a.* forming an attachment, conceiving affection for.

भागिनेयः [भगिन्या अपत्यं ढक्] A sister's son. –यी A sister's daughter.

भागीरथी [भगीरथेन सानीता तेन भागीरथी स्मृता] 1 N. of the river Ganges; भागीरथीनिर्झरशीकराणाम् Ku. 1. 15. –2 N. of one of the three main branches of the Ganges; cf. भागीरथी भोगवती जाह्नवी त्रिजटेश्वरी। विष्णुपादाब्जसंभूता गङ्गा त्रिपथगामिनी ॥ Stotra.

भागुरिः N. of a famous author of a Smṛiti and Vyākaraṇa; वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः Sk.

भाग्यम् *a.* [भज्-ण्यत् कुत्वम्] 1 To be divided, divisible. –2 Entitled to a share. –3 Forming a part. –4 Subject to fractional deduction. –5 Lucky, fortunate. –ग्यम् 1 Fate, destiny, luck, fortune; स्त्रियाश्चरित्रं पुरुषस्य भाग्यं देवो न जानाति कुतो मनुष्यः Subhāṣ; oft. in pl.; सा निन्दन्ती स्वानि भाग्यानि बाला Ś. 5. 30. –2 Good fortune or luck; R. 3. 13. –3 Prosperity, affluence; भाग्येष्वनुत्सेकिनी Ś. 4. 18. –4 Happiness, welfare. (भाग्येन fortunately, happily). **–Comp.** –आयत्त *a.* dependent on fate; भाग्यायत्तमतः परम् Ś. 4. 17; cf. also भाग्येषु शेषमायत्तं दृष्टपूर्वं न चान्यथा Pratijñā Y. 2. 5. –उदयः 1 dawn of good fortune, lucky occurrence. –ऋक्षम् (भाग्यर्क्षम्) the asterism पूर्वाफल्गुनी. –क्रमः course or turn of fortune; भाग्यक्रमेण हि धनानि भवन्ति यान्ति Mk. 1. 13. –पञ्चः a kind of pavilion; Vastuvidyā. –योगः a lucky or fortunate juncture. –रहित a. deserted by fortune, miserable; प्रायो गच्छति यत्र भाग्यरहितस्तत्रैव यान्त्यापदः Bh. 2. 90. –विप्लवः ill-luck, adverseness of fate; अथवा मम भाग्यविप्लवादशनिः कल्पित एष वेधसा R. 8. 47. –वशात् *ind.* through the will of fate, luckily, fortunately. –संक्षयः bad fortune, calamity. –संपद् good fortune, prosperity.

भाग्यवत् *a.* (–ती *f.*) 1 Fortunate, blessed, happy. –2 Prosperous.

भाङ्ग *a.* (–ङ्गी *f.*) [भङ्गाया इदम् अण्] Made of hemp, hempen.

भाङ्गीनम् [भङ्गाया भवनं क्षेत्रं खञ्] A field of hemp.

भाङ्गकः A tattered cloth, shred, rag.

भाज् 10 U. To divide, distribute; see भज् *caus.*

भाज् *a.* (Usually at the end of comp.) 1 Sharing or participating in, liable to. पाप°; cf. न केवलं यो महतोऽपभाषते शृणोति तस्मादपि यः स पापभाक् Ku. 5. 83; दोष° guilty. –2 Having, enjoying, possessing, obtaining; सुख°, रिक्थ°. –3 Entitled to. –4 Feeling, experiencing, being sensible of. –5 Devoting oneself to. –6 Living in, inhabiting, dwelling in; as in कुहरभाज् (U. 2. 21.); दरीभाज् &c. –7 Going or resorting to, seeking. –8 Worshipping. –9 Falling to the lot of. –10 What must be done, a duty (कर्तव्य); (न्यरंसीत्) कृताऽकृतेभ्यः क्षितिपालभाग्भ्यः Bk. 3. 21.

भाजक् *ind.* Quickly, swiftly.

भाजकः [भाज्-ण्वुल्] 1 Dividing. –2 (In arith.) A divisor.

भाजनम् [भाज्यतेऽनेन भाज्-ल्युट्] 1 Sharing, dividing. –2 Division (in arith). –3 A vessel, pot, cup, plate; पुष्पभाजनम् Ś. 4; R. 5. 22. –4 (Fig.) A receptacle, recipient, repository; स श्रियो भाजनं नरः Pt. 1. 243; कल्याणानां त्वमसि महतां भाजनं विश्वमूर्ते Māl. 1. 3; ऐहिकस्य सुखस्याभाजनमयं जनः Dk.; U. 3. 15; M. 5. 8. –5 A fit or deserving person, a fit object or person; भवादृशा एव भवन्ति भाजनान्युपदेशानाम् K. 108; गुरुणा ज्ञानसर्वस्वे सन्तोषाद्भाजनीकृतः Bm. 1. 40. –6 Representation. –7 A measure equal to 64 *palas*. –लेखितम् A variety of diamonds capable of scratching on the surface of vessels; Kau. A. 2. 11. 29. –लोकः the world of inanimate things (opp. to सत्वलोक); Buddh. **–Comp.** –विषमः One of the ways of embezzlement, namely use of false cubic measures such as भाजन; Kau. A. 2. 8. 26.

भाजित *a.* Shared, divided. –तम A share, portion.

भाजिन् *m.* [भज्-णिनि] A servant.

भाजी 1 Rice, gruel. –2 A kind of seasoned food; L. D. B.

भाज्य *a.* [भज्-ण्यत्] Divisible. –ज्यम् 1 A portion, share. –2 An inheritance. –3 (In arith.) The dividend.

भाटम्, भाटकम् Wages, hire, rent; गृहवाप्यापणादीनि गृहीत्वा भाटकेन यः । स्वामिनो नार्पयेद् यावत् तावद् दाप्यः स भाटकम् ॥ Vṛiddhamanu.

भाटिः *f.* 1 Wages, hire. –2 The earnings of harlots.

भाट्टः [भट्टस्यानुयायी, अण्] A follower of Bhaṭṭa, a follower of that school of the Mīmāṁsā philosophy which was founded by Kumārila Bhaṭṭa.

भाणः, भाणिका A species of dramatic composition; in it only one character is introduced on the stage which supplies the place of interlocutors by a copious use of आकाशभाषित q. v.; भाणः स्याद्धूर्तचरितो नानावस्थान्तरात्मकः । एकाङ्क एक एवात्र निपुणः पण्डितो विटः ॥ S. D. 513; see the next stanzas also; *e. g.* वसन्ततिलक, मुकुन्दानन्द, लीलामधुकर &c.

भाणकः A declarer, proclaimer.

भाण्डम् [भाण्ड्-अच् भण्-ड स्वार्थे अण् वा Tv.] 1 A vessel, pot, utensil (plate, dish, can &c.); ब्रह्मा येन कुलालवन्नियमितो ब्रह्माण्डभाण्डोदरे Bh. 2. 95; नीलीभाण्डम् 'an indigo-vat'; so क्षीरभाण्डम् 'milk-pail'; सुरा,° मद्य° &c. –2 A box, trunk, chest, case; क्षुरभाण्डम् Pt. 1. –3 Any tool or instrument, an implement. –4 A musical instrument; वेणानां भाण्डवादनम् Ms. 10. 49. –5 Goods, wares, merchandise, shop-keeper's stock; भाण्डपूर्णानि यानानि तार्यं दाप्यानि सारतः Ms. 8. 405; मथुरागामीनि भाण्डानि Pt. 1. –6 A bale of goods. –7 (Fig.) Any valued possession, treasure; शान्तं वा रघुनन्दने तदुभयं तत्पुत्रभाण्डं हि मे U. 4. 24. –8 The bed of a river. –9 Trappings or harness of a horse; नानाङ्कचिह्नैर्नवहेमभाण्डैः Bu. Ch. 2. 4. –10 Buffoonery, mimicry (from भण्ड). –11 An ornament in general; नानाविकृतसंस्थानं वाजिभाण्डपरिच्छदम् । गजग्रैवेयकक्ष्याश्च रथभाण्डांश्च संस्कृतान् ॥ Rām. 6. 75. 10. –12 Paraphernalia (उपकरणजातम्); आभिषेचनिकं भाण्डं कृत्वा Rām. 2. 19. 31. –13 Capital (मूलधन); सोऽपि दृष्ट्वैव तं विप्रमायान्तं भाण्डजीवनः Mb. 12. 261. 46. –ण्डाः (*m.* pl.) Wares, merchandise. –Comp. –अ (आ) गारः, –रम् 1 a store-house, store-room (lit. where household goods and utensils &c. are kept); भाण्डागाराण्यकृत विदुषां सा स्वयं भोगभाञ्जि Vikr. 18. 45. –2 treasury; ज्ञान°. –3 a collection, store, magazine. –आगारिकः 1 a storekeeper. –2 a treasurer. –गोपकः the keeper of vessels (in a temple); Buddh. –पतिः a merchant. –पुटः 1 a barber. –2 a kind of contrivance for calcining metals. –पुष्पः a sort of snake. –प्रतिभाण्डकम् barter, computation of the exchange of goods. –भरकः the contents of a vessel. –मूल्यम् capital in the form of wares. –वादनम् playing on a musical instrument. –शाला a store-house, store.

भाण्डकः, –कम् A small vessel, cup. –कम् Goods, merchandise, wares.

भाण्डारम् A store-house, store.

भाण्डारिक = भाण्डागारिक q. v.

भाण्डारिन् *m.* The keeper of a store-house.

भाण्डिः *f.* A razor-case. –Comp. –वाहः a barber. –शाला a barber's shop.

भाण्डिकः, –लः A barber.

भाण्डिका An implement, a tool, utensil.

भाण्डिनी A chest, basket; सन्ति निष्कसहस्रस्य भाण्डिन्यो भरिताः शुभाः Mb. 2. 61. 2.

भाण्डीरः The Indian fig-tree.

भात *p. p.* [भा-क्त] Shining, brilliant, bright. –तः Dawn, morning.

भातिः *f.* [भा-क्तिन्] 1 Light, brightness, lustre, splendour. –2 Perception, knowledge (ज्ञान or प्रतीति); निरूपितेयं त्रिविधा निर्मूला भातिरात्मनि Bhāg. 11. 28. 7.

भातुः The sun.

भाद्रः, भाद्रपदः [भद्राभिर्युक्ता पौर्णमासी भाद्री सा यस्मिन् मासे अण्] N. of a lunar month (corresponding to August-September); भाद्रद्वये सागरे Jyotiṣam. –दाः (*f.* pl.) N. of the 25th and 26th lunar mansions (पूर्वाभाद्रपदा and उत्तराभाद्रपदा).

भाद्रपदी, भाद्री The day of full moon in the month of Bhādrapada.

भाद्रमातुरः The son of a virtuous or good mother (भद्रमातुरपत्यम्).

भानम् [भा-भावे ल्युट्] 1 Appearing, being visible. –2 Light, lustre. –3 Perception, knowledge.

भानतस् *ind.* In consequence of the appearance.

भानव *a.* Peculiar to the sun. –वी A kind of pace (in music).

भानवीयम् The right eye.

भानुः [भा-नु Uṇ. 3. 32] 1 Light, lustre, brightness. –2 A ray of light; मण्डिताखिलदिक्प्रान्ताश्चण्डांशोः पान्तु भानवः Bv. 1. 129; Śi. 2. 53; Ms. 8. 132. –3 The sun; भानुः सकृद्युक्ततुरङ्ग एव Ś. 5. 4; भीमभानौ निदाघे Bv. 1. 30. –4 Beauty. –5 A day. –6 A king, prince, sovereign. –7 An epithet of Śiva or Viṣṇu; अमृतांशुद्भवो भानुः V. Sah. –*f.* A handsome woman. –Comp. –केश (स) रः the sun. –जः the planet Saturn. –दिनम्, –वारः Sunday. –फला Musa Sapientum (Mar. केळ). –भूः daughter of the sun, the Yamunā river; अद्रि भानुभुवि दाशदारिकाम् N. 18. 25.

भानुमत् *a.* 1 Luminous, bright, splendid. -2 Beautiful, handsome. -*m.* 1 The sun; तुल्येऽपराधे स्वर्भानुर्भानुमन्तं चिरेण यत् Si. 2. 49; Ku. 3. 65; R. 6. 36; Rs. 5. 2. -ती N. of the wife of Duryodhana.

भाम् 1 A. (भामते) To be angry; (also 10 P. according to L. D. B.).

भामः [भाम्-घञ्] 1 Brightness, lustre, splendour. -2 The sun. -3 Passion, wrath, anger. -4 A sister's husband; अहो भगिन्यहो भाम मया वां बत पाप्मना। पुरुषाद इवापत्यं बहवो हिंसिताः सुताः॥ Bhāg. 10. 4. 15. -मा 1 A passionate woman. -2 N. of one of the wives of Krisṇa, usually called सत्यभामा. -Comp. -नी *m.* the Supreme Being; एष उ एव भामनीरेष हि सर्वेषु लोकेषु भाति य एवं वेद Ch. Up.

भामिन् *a.* 1 Passionate, angry. -2 Shining. -3 Handsome, beautiful.

भामिनी 1 A beautiful young woman; (कामिनी); क्षितिरिन्दुमती च भामिनी पतिमासाद्य तमग्र्यपौरुषम् R. 8. 28. -2 A passionate woman (often used like चण्डी as a term of endearment); उपचीयत एव कापि शोभा परितो भामिनि ते मुखस्य नित्यम् Bv. 2. 1. -Comp. -विलासः N. of a poem by Jagannātha Paṇḍita.

भामकः A sister's husband; L. D. B.

भामहः N. of the author of अलङ्कारशास्त्र and प्राकृतमनोरमा.

भारः [भृ-घञ्] 1 A load, burden, weight (fig. also); कुचभारानमिता न योषितः Bh. 3. 27; so श्रोणीभार Me. 84; भारः कायो जीवितं वज्रकीलम् Mal. 9. 37. -2 Brunt, thickest part (as of a battle); N. 5. 5. -3 Excess, pitch; सा मुक्तकण्ठं व्यसनातिभाराच्चक्रन्द R. 14. 68. -4 Labour, toil, trouble. -5 A mass, large quantity; विज्ञगुप्तिर्जटानां प्रचलति निबिडग्रन्थिबद्धोऽपि भारः Mal. 5. 4. कुच°, जटा°. -6 A particular weight equal to 2000 *palas* of gold; कृतं भारसहस्रस्य शूलं कालायसं महत् Rām. 6. 67. 63. -7 A yoke for carrying burdens. -8 An epithet of Viṣṇu. -9 Task imposed on anyone; आनुकूल्येन कार्याणामन्तरं संविधीयते। भारं हि रथकारस्य न व्यवस्यन्ति पण्डिताः॥ Mb. 4. 49. 4. -10 A particular manner of beating a drum. -Comp. -अवतरण -तारणम् the removal of a load from. -आक्रान्त *a.* heavily laden, over-burdened. -आक्रान्ता N. of a metre; भाराक्रान्ता मभनरसना गुरुः श्रुतिरसहयैः Chand. M. -उद्धरणम् The lifting of a load. -उद्वहः a porter, burden-carrier. -उपजीवनम् living by carrying burdens, a porter's life; वरं भारोपजीवनम् Pt. 1. 280. -ऊढिः *f.* the bearing of a load. -गः a mule. -भृत् *m.* an epithet of Viṣṇu; भारभृत् कथितो योगी V. Sah. -यष्टिः a pole for carrying burdens. °धरः one who carries loads suspended at the two ends of a pole borne on the shoulder (Mar. कावडधारी); भारयष्टिधरैश्चापि पुरुषैर्विष्टिकारिभिः Siva B. 30. 23. -वाह *a.* (-भारोही *f.*) bearer of burdens. -वाहः a burden-carrier, porter; भारवाहस्य पन्थाः Mb. 3. 133. 1. (-ही) indigo. -वाहनः a beast of burden. (-नम्) a cart, waggon. -वाहिकः a porter. -सह, -साह *a.* 'able to carry a great load', very strong or powerful; विकृष्य चापं समरे भारसाहमनुत्तमम् Mb. 6. 74. 1. -हः an ass. -साधन *a.* effecting arduous works, accomplishing great objects; कार्मुकैर्भारसाधनैः Mb. 2. 99. 20. -हरः, -हारः a burden-bearer, porter. -हारिन् *m.* an epithet of Krisṇa.

भारक *a.* (At the end of comp.) Loaded with. -कः 1 A load, burden, weight. -2 A particular weight.

भारायते Den. A. 1 To become a burden, form a load. -2 To be like a load.

भारिक, भारिन् *a.* 1 Bearing or carrying a load. -2 Heavy. -*m.* A burden-carrier, porter; Ms. 2. 188.

भारिका A heap, multitude.

भारङ्गी 1 A female supporter. -2 Clerodendrum Siphonantus (Mar. भारंगी).

भारण्डः A kind of fabulous bird. (Also भारुण्ड); एकोदराः पृथग्ग्रीवा अन्योन्यफलभक्षिणः। असंहता विनश्यन्ति भारण्डा इव पक्षिणः Pt. 5. 101.

भारत *a.* (-ती *f.*) [भरतस्येदम्, भारतान् भरतवंश्यानधिकृत्य कृतो ग्रन्थः अण्] Belonging to or descended from Bharata. -तः 1 A descendant of Bharata; (such as विदुर; सञ्जातहर्षो मुनिमाह भारतः Mb. 3. 20. 8; also धृतराष्ट्र, अर्जुन in Bg.). -2 An inhabitant of *Bharatavarṣa* or India. -3 An actor. -4 An epithet of the sun shining on the south of Meru. -5 Fire. -तम् 1 India, the country of Bharata; एतदूढगुरुभार भारतं वर्षमद्य मम वर्तते वशे Si. 14. 5. -2 N. of the most celebrated epic poem in Sanskrit which gives the history of the descendants of Bharata with innumerable episodes. (It is attributed to Vyāsa or कृष्णद्वैपायन, but the work, as we have it at present, is evidently the production of many hands); श्रवणाञ्जलिपुटपेयं विरचितवान् भारताख्यममृतं यः। तमहमरागमकृष्णं कृष्णद्वैपायनं वन्दे॥ Ve. 1. 4; व्याससिरां निर्यासं सारं विश्वस्य भारतं वन्दे। भूषणतयैव संज्ञां यदङ्कितां भारती वहति॥ Ārya. S. 31. -3 The science of music and dramaturgy founded by Bharata. -ती Speech, voice, words, eloquence; भारतीनिर्घोषः U. 3; तमर्थमिव भारत्या सुतया योक्तुमर्हसि Ku. 6. 79; नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति K. P. 1. -2 The goddess of speech, Sarasvatī; कीराननें स्फुरसि भारति का रतिस्ते Govindarāja. -3 N. of a particular kind of style; भारती संस्कृतप्रायो वाग्व्यापारो नटाश्रयः S. D. 285. -4 A quail. -5 The dramatic art in general. -6 The Sanskrit speech of an actor. -7 One of the 10 orders (दशनाम) of Gosāvins, mendicants (Mar. दसनाम गोसावी). -Comp. -आख्यानम्, -इतिहासः, -कथा the story of the Bhāratas (महाभारत). -मण्डलम्, -वर्षम् India. -सावित्री N. of a stotra; इमां भारतसावित्रीं प्रातरुत्थाय यः पठेत् Mb. 18. 5. 64.

भारद्वाजः [भरद्वाजस्यापत्यम् अण्] 1 N. of Droṇa, the military preceptor of the Kauravas and Pāṇḍavas;

यदाश्रौषं व्यूढमभेद्यमन्यैर्भारद्वाजेनात्तशस्त्रेण गुप्तम् Mb. 1. 1. 190. -2 Of Agastya. -3 The planet Mars. -4 One of the seven Ṛiṣis. -5 A sky-lark. -6 N. of the author on the science of Government mentioned by Kauṭilya; Kau. A. 1. 15. -जम् A bone. -जी The wild cotton shrub. -जाः One of the अर्थशास्त्र schools mentioned by Kauṭilya in connection with राजपुत्ररक्षण; Kau. A. 1. 17.

भारद्वाजकी A sky-lark.

भारवः A sky-lark.

भारवम् A bow-string. -वी The sacred basil.

भारविः N. of the author of the Kirātārjunīya; तावद् भा भारवेर्भाति यावन्माघस्य नोदयः । उदिते च पुनर्माघे भारवेर्भा रवेरिव ॥; भारवेरर्थगौरवम् Udb.; कविताश्रितकालिदासभारविकीर्तिः Samudragupta inscription.

भारिः A lion.

भारिटः A kind of bird.

भारुषः 1 The son of a वैश्यव्रात्य and an unmarried वैश्या. -2 A kind of Śakti worshipper.

भार्गः A king of the Bhargas.

भार्गवः [भृगोरपत्यम् अण्] 1 N. of Śukra, regent of the planet Venus and preceptor of the Asuras. -2 N. of Paraśurāma; भार्गवः प्रददौ यस्मै परमास्त्रं महाहवे Mb. 8. 2. 13; see परशुराम. -3 An epithet of Śiva. -4 An archer. -5 An elephant. -6 An epithet of Jamadagni. -7 Of Mārkaṇḍeya; तावच्छिशोर्वै श्वसितेन भार्गवः सोऽन्तः शरीरं मशको यथाविशत् Bhāg. 12. 9. 27. -8 N. of an eastern country; ब्रह्मोत्तरा प्राविजया भार्गवाज्ञेयमल्लकाः Mārk. P. -9 An astrologer, fortune-teller; 'भार्गवो शुक्रदैवज्ञौ' Vaijayantī; भार्गवो नाम भूत्वा भिक्षानिभेन तद्गृहं प्रविश्य Dk. 2. 6. -10 A potter; ब्राह्मणैः प्राविशत् तत्र जिष्णुर्भार्गववेश्म तत् Mb. 1. 190. 47; भार्गवकर्मशाला 1. 91. 1.

भार्गवम्, -भार्गवकम्, -भार्गवप्रियः A diamond.

भार्गवी 1 The Dūrvā grass. -2 An epithet of Lakṣmī. -3 Of Pārvatī. -4 Of Devayānī; सर्वत्र सङ्गमुत्सृज्य स्वप्नौपम्येन भार्गवी Bhāg. 9. 19. 28.

भार्य a. [भृ-ण्यत्] To be supported or cherished. -र्यः 1 A servant, a dependant (to be supported); स हैवालं भार्येभ्यो भवति Bṛi. Up. 1. 3. 18. -2 A mercenary, soldier; P. III. 1. 112 (com.).

भार्या [भर्तु योग्या] 1 A lawful wife; सा भार्या या गृहे दक्षा सा भार्या या प्रजावती । सा भार्या या पतिप्राणा सा भार्या या पतिव्रता ॥ H. 1. 196. -2 The female of an animal. -Comp. -आट a. living by the prostitution of his wife. -ऊढ a. married (as a man); भार्योढं तमवज्ञाय Bk. 4. 15. -जितः, -आटिकः 1 a hen-pecked husband. -2 a kind of deer. -पतित्वम् wedlock, matrimony. -वृक्षः Caesalpina Sappan (Mar. पतंग).

भार्यारुः 1 A kind of deer. -2 The father of a child by another man's wife.

भार्द्यम् 1 Violence, vehemence. -2 Excessiveness, intensity.

भालम् [भा-लच्] 1 The forehead, brow; यद्धात्रा निजभालपट्टलिखितं स्तोकं महद्वा धनम् Bh. 2. 49; (स्मरस्य) वपुः सद्यो भालानलभसितजालास्पदमभूत् Bv. 1. 84; स्वामिन् भङ्गुरयालकं सतिलकं भालं विलासिन् कुरु S. D. -2 Light. -3 Darkness. -Comp. -अङ्कः 1 a man born with lucky lines on his forehead. -2 an epithet of Śiva. -3 a saw. -4 a tortoise. -चन्द्रः 1 an epithet of Śiva. -2 of Gaṇeśa. (-द्रा) N. of Durgā. -दर्शनः N. of Śiva. -दर्शनम् red lead. -दर्शिन् a. 'looking at or watching the brow', said of a servant who is attentive to his master's wishes. -दृश् m., -लोचनः an epithet of Śiva. -पट्टः, -ट्टम् the forehead.

भालुः The sun.

भालु (लू) कः, भाल्लु (ल्लू) कः A bear.

भालविः m. 1 A branch of Sāmaveda. -2 Those who belong to this branch of Sāmaveda; तामेतां भाल्लवय उपासते Tāṇḍya Br.

भावः [भू-भावे घञ्] 1 Being, existing, existence; नासतो विद्यते भावः Bg. 2. 16. -2 Becoming, occurring, taking place. -3 State, condition, state of being; लताभावेन परिणतमस्या रूपम् V. 4; U. 6. 23; so कातरभावः, विवर्णभावः &c. -4 Manner, mode. -5 Rank, station, position, capacity; देवीभावं गमिता K. P. 10; so प्रेष्यभावम्, किंकरभावम् &c. -6 (a) True condition or state, truth, reality; परं भावमजानन्तः Bg. 7. 24; इति मत्वा भजन्ते मां बुधा भावसमन्विताः 10. 8. (b) Sincerity, devotion; त्वयि मे भावनिबन्धना रतिः R. 8. 52; 2. 26. -7 Innate property, disposition, nature, temperament; स तस्य स्वो भावः प्रकृतिनियतत्वादकृतकः U. 6. 14. -8 Inclination or disposition of mind, idea, thought, opinion, supposition; हृदयनिहितभावा गूढमन्त्रप्रचाराः किमपि विगणयन्तो बुद्धिमन्तः सहन्ते Pt. 3. 43; Ms. 8. 25; 4. 65; निकृष्टोत्कृष्टयोर्भावं यास्तु गृह्णन्ति ताः स्त्रियः Bu. Ch. 4. 23. -9 Feeling, emotion, sentiment; एको भावः Pt. 3. 66; Ku. 6. 95; निर्विकारात्मके चित्ते भावः प्रथमविक्रिया S. D. (In the dramatic science or in poetic compositions generally, *Bhāvas* are either स्थायिन् primary, or व्यभिचारिन् subordinate. The former are eight or nine, according as the *Rasas* are taken to be 8 or 9, each *rasa* having its own स्थायिभाव. The latter are thirty-three or thirty four in number, and serve to develop and strengthen the prevailing sentiment; for definition and enumeration of the several kinds, see R. G. first *anana*, or K. P. 4). -10 Love, affection, attachment; द्वन्द्वानि भावं क्रियया विवव्रुः Ku. 3. 35; कुमुद्वती भानुमतीव भावं (बबन्ध) R. 6. 36. -11 Purport, drift, gist, substance; इति भावः (often used by commentators); जनकोऽप्युत्स्मयन् राजा भावमस्या विशेषयन् । प्रतिजग्राह भावेन भावमस्या नृपोत्तम Mb. 12. 320. 18. -12

Meaning, intention, sense, import; अन्योन्यभावचतुरेण सखीजनेन मुक्तास्तदा स्मितसुधामधुराः कटाक्षाः Māl. 1. 25. -13 Resolution, determination. -14 The heart, soul, mind; तयोर्विगलितभावत्वात् Māl. 1. 12; भावसंशुद्धिरित्येतत् तपो मानसमुच्यते Bg. 17. 16; स्व एव भावे विनिगृह्य मन्मथम् Bu. Ch. 4. 101. -15 Any existing thing, an object, a thing, substance; पश्यन्ती विविधान् भावान् Rām. 2. 94. 18; जगति जयिनस्ते ते भावा नवेन्दुकलादयः Māl. 1. 17, 36; R. 3. 41; U. 3. 32. -16 A being, living creature. -17 Abstract meditation, contemplation (= भावना q. v.). -18 Conduct, movement. -19 (a) Gesture, behaviour; अहिंसा समता... भवन्ति भावा भूतानाम् Bg. 10. 5. (b) Amorous gesture or expression of sentiment, gesture of love; कामं प्रिया न सुलभा मनस्तु तद्भावदर्शनाश्वासि Ś. 2. 1. -20 Birth; तवाहं पूर्वके भावे पुत्रः परपुरंजय Rām. 7. 104. 2. -21 The world, universe. -22 The womb. -23 Will; घोरैर्विन्ध्यधनुर्बाणैः कृतभावावुभौ जये Rām. 6. 90. 38. -24 Superhuman power; मिथो घ्नतं न पश्यन्ति भाविर्भावं पृथग्दृशः Bhāg. 10. 4. 27. -25 Advice, instruction. -26 (In dramas) A learned or venerable man, worthy man, (a term of address); भाव अयमस्मि V. 1; तां खलु भाविन तथैव सर्वे वर्ग्याः पाठिताः) Māl. 1. -27 (In gram.) The sense of an abstract noun, abstract idea conveyed by a word; भावे क्तः. -28 A term for an impersonal passive or neuter verb. -29 (In astr.) An astronomical house. -30 A lunar mansion. -31 An organ of sense. -32 Welfare (कल्याण); भावमिच्छति सर्वस्य नाभावे कुरुते मनः Mb. 5. 36. 16. -33 Protection; श्रेणस्याभावभावे तु प्रसक्तानां यथाऽभवत् Mb. 7. 25. 64. -34 Fate, destiny (प्रारब्ध); नातिप्रक्षीणरश्मिः स्यात्तथा भावविपर्यये Mb. 5. 77. 14. -35 Consciousness of past perceptions (वासना); येभ्यः सृजति भूतानि काले भावप्रचोदितः। महाभूतानि पञ्चेति तान्याहुर्भूतचिन्तिकाः॥ Mb. 12. 275. 4. -36 Lordship (प्रभुत्व); तेऽपि भावाय कल्पन्ते राजदण्डनिपीडिताः Rām. 2. 67. 32. -37 The six states (अवस्थाषट्क); A. Rām. 1. 7. 31. -Comp. -अनुग *a.* not forced, natural. (-गा) a shadow. -अन्तरम् a different state. -अद्वैतम् 1 a natural cause. -2 material cause (as thread of a cloth). -3 identity of conception, oneness of view. -अर्थः 1 the obvious meaning or import (of a word, phrase &c.). -2 the subject matter; सर्वेषामपि वस्तूनां भावार्थो भवति स्थितः Bhāg. 10. 14. 57. -आकूतम् (secret) thoughts of the mind; हृदयनिहितं भावाकूतं वमद्भिरिवेक्षणैः Amaru. 4. -आख्यः One of the two types of creation according to the Sāṅkhya philosophy; लिङ्गाख्यो भावाख्यस्तस्माद् द्विविधः प्रवर्तते सर्गः Sāṅ. K. 52. -आत्मक *a.* real, actual. -आभासः simulation of a feeling, a feigned or false emotion. -आलीना a shadow. -एकरस *a.* influenced solely by the sentiment of (sincere) love; ममात्र भावैकरसं मनः स्थितम् Ku. 5. 82. -कर्तृकः an impersonal verb; Kāśi. on P. II. 3. 54. -गतिः *f.* power to convey human feelings; भावगतिराकृतीनाम् Pratimā 3. -गम्भीरम् *ind.* 1 heartily, from the bottom of the heart. -2 deeply, gravely. -गम्य *a.* conceived by the mind; मत्सादृश्यं विरहतनु वा भावगम्यं लिखन्ती Me. 87. -ग्राहिन् *a.* 1 understanding the sense. -2 appreciating the sentiment. -ग्राह्य *a.* to be conceived with the heart; भावग्राह्यमनीडाख्यं भावाभावकरं शिवम् Śvet. Up. 5. 14. -चेष्टितम् amorous gesture. -जः 1 love. -2 the god of love. -ज्ञ, -विद् *a.* knowing the heart. -दर्शिन् *a.* see आलदर्शिन्. -निर्वृत्तिः the material creation (Sāṅ. phil.); न विना लिङ्गेन भावनिर्वृत्तिः Sāṅ. K. 52. -नेरिः a kind of dance. -बन्धन *a.* enchanting or fettering the heart, linking together the hearts; रत्याङ्गनाम्नोरिव भावबन्धनं बभूव यत्प्रेम परस्पराश्रयम् R. 3. 24. -बोधक *a.* indicating or revealing any feeling. -मिश्रः a worthy person, a gentleman (used in dramas); प्रसीदन्तु भावमिश्राः Ś. 6. -रूप *a.* real, actual. -वचनम् denoting an abstract idea, conveying the abstract notion of a verb. -वाचकम् an abstract noun. -विकारः a property of a being; षड् भावविकारा भवन्तीति वार्ष्यायणिः। जायतेऽस्ति विपरिणमते वर्धतेऽपक्षीयते नश्यति। -वृत्तः an epithet of Brahman. -शबलत्वम् a mixture of various emotions (भावानां बाध्यबाधकभावमापन्नानामुदासीनानां वा व्यामिश्रणम् R. G., *vide* examples given *ad loc.*). -शुद्धिः *f.* purity of mind, honesty, sincerity. -शून्य *a.* devoid of real love; उपचारविधिर्मनस्विनीनां न तु पूर्वाभ्यधिकोऽपि भावशून्यः M. 3. 3. -संधिः the union or co-existence of two emotions (भावसंधिरन्योन्यानभिभूतयोरन्योन्याभिभावनयोर्वयोः सामानाधिकरण्यम् R. G., see the examples there given). -समाहित *a.* abstracted in mind, devout. -सर्गः the mental or intellectual creation; *i. e.* the creation of the faculties of the human mind and their affections (opp. भौतिकसर्ग or material creation). -स्थ *a.* attached; devoted (to one); न वेत्सि भावस्थमिमं कथं जनम् Ku. 5. 58. -स्थिर *a.* firmly rooted in the heart; Ś. 5. 2. -स्निग्ध *a.* affectionately disposed, sincerely attached; भावस्निग्धैरुपकृतमपि द्वेष्यतां याति किंचित् Pt. 1. 285. -आवंगम *a.* charming, lovely.

भावक *a.* [भाव-स्वार्थे क] 1 Effecting, bringing about. -2 Promoting any one's welfare; नैते भूतस्य भावकाः Mb. 12. 88. 24. -3 Fancying, imagining. -4 Having a taste for the sublime and beautiful, having a poetic taste. -कः 1 A feeling, sentiment. -2 The external manifestation of one's sentiments (especially of love).

भावन *a.* (-नी *f.*) [भू-णिच्-ल्यु ल्युट् वा] Effecting &c; भूतभव्यभविष्याणां भावानां भुवि भावनाः Mb. 14. 37. 15; यत् पृच्छसे भागवतान् धर्मांस्त्वं विश्वभावनान् Bhāg. 11. 2. 11; 8. 1. 16; see भावक above. -नः 1 An efficient cause. -2 A creator; जय देव भुवनभावन Māl. 9. 4. -3 An epithet of Śiva. -4 Of Viṣṇu. -नम्, -ना 1 Creating, manifesting; भावनं ब्रह्मणः स्थानम् Bhāg. 3. 26. 46. -2 Promoting any one's interests. -3 Conception, imagination, fancy, thought, idea; मधुरिपुरहमिति भावनशीला Gīt. 6; or भावनया त्वयि लीना 4; Pt. 3. 162. -4 Feeling of devotion, faith; नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना Bg. 2. 66; यादृशी भावना यस्य सिद्धिर्भवति तादृशी Pt. 5. 105. -5 Meditation, contemplation, abstract meditation. -6 A supposition, hypothesis. -7 Observing, investigating. -8 Settling, determining;

विभागभावना ज्ञेया Y. 2. 149. –9 Remembering, recollection. –10 Direct knowledge, perception or cognition. –11 The cause of memory which arises from direct perception (in logic); see भावना and स्मृति in T. S; भावनाख्यस्तु संस्कारो जीववृत्तिरतीन्द्रियः Bhāṣā. P. –12 Proof, demonstration, argument. –13 Steeping, infusion, saturating a dry powder with fluid; द्रवेण यावन्मानेन चूर्णं सर्वं प्लुतं भवेत्। भावनायाः प्रमाणस्तु चूर्णे प्रोक्तं भिषग्वरैः Bhāva. P. –14 Scenting; decorating with flowers and perfumes. –15 (In arith.) Finding by combination or composition. –16 Nature, essence (at the end of comp.). –17 Reason, cause; परावरेशं प्रकृतिमस्योत्पत्त्यन्तभावनम् Bhāg. 3. 32. 7. –18 Growth, prosperity (वर्धन); तस्यैषा निष्कृतिः कृत्स्ना भूतानां भावनं पुनः Mb. 12. 97. 7. –ना 1 A crow. –2 Water. –नम् Apprehension, perception. –Comp. –आश्रयः N. of Siva. –मय a. imaginary. –युक्त a. 1 thoughtful –2 anxious.

भावयितृ a. A protector, promoter; क्रोधो हन्ता मनुष्याणां क्रोधो भावयिता पुनः Mb. 3. 29. 1.

भावाटः [भावं भावेन वा अटति, अट्-अण् अच् वा] 1 Emotion, passion, sentiment. –2 The external indication of the feeling of love. –3 A pious or holy man. –4 An amorous man. –5 An actor. –6 Decoration, dress.

भाविक a. (–की f.) [भावेन निर्वृत्तं ठक्] 1 Natural, real, inherent, innate. –2 Sentimental, pervaded by a feeling or sentiment; विभावितभाविकस्फुटरसमृशाभ्यक्ता वैतालिकैर्जगिरे गिरः N. 19. 1; Si. 4. 33. –3 Future. –कः An equation involving the products of unknown quantities. –कम् 1 Language full of love or passion. –2 (In Rhet.) A figure of speech which consists in describing the past or future so vividly that it appears to be actually present. It is thus defined by Mammaṭa; प्रत्यक्षा इव यद्भावाः क्रियन्ते भूतभाविनः। तद् भाविकम् K. P. 10.

भावित p. p. [भू-णिच् कर्मणि-क्त] 1 Created, produced; obtained, got. –2 Manifested, displayed, exhibited; भावितविषवेगविक्रियः Dk.; (भजे) भक्तेष्वलं भावितभूतभावनम् Bhāg. 5. 17. 18. –3 Cherished, fostered; तेषां दृष्ट्वा भावितानीङ्गितानि प्रोवाच राजा जनमेजयोऽथ Mb. 1. 55. 17. –4 (a) Conceived, imagined, supposed, presented to the imagination; तं तमेवैति कौन्तेय सदा तद्भावभावितः Bg. 8. 6. (b) Known, recognized, acknowledged. –5 Thought of, meditated upon. –6 Made to become, transformed into. –7 Sanctified by meditation; अनन्यभावे निजधर्मभाविते मनस्यवस्थाप्य भजस्व पूरुषम् Bhāg. 4. 8. 22; see भावितात्मन्. –8 Proved, established. –9 Pervaded by, filled or saturated with, inspired by. –10 Soaked, steeped, infused in; किंचित् स्निग्धं यथा च स्याच्छुष्कचूर्णमभावितम् Mb. 12. 195. 18. –11 Perfumed, scented. –12 Mixed with. –13 (In math.). Involving the products of unknown quantities. –14 Directed towards, fixed upon; यदीश्वरे भगवति कर्म ब्रह्मणि भावितम् Bhāg. 1. 5. 32. –15 Possessed, captured (वशीकृत); ततोऽन्ये च यथाकामं दुदुहुः पृथुभावितम् Bhāg. 4. 18. 13. –16 Engrossed, filled; रथाङ्गपाणेरनुभावभावितम् Bhāg. 12. 10. 42. –17 Pleased, gladdened; इष्टान् भोगान् हि वो देवा दास्यन्ते यज्ञभाविताः Bg. 3. 12. –तम् Product obtained by multiplication, a factum. –Comp. –आत्मन्, –बुद्धि a. 1 one whose soul is purified by meditating on the Supreme Spirit, one who has perceived the Supreme Soul; तदथ देवप्रभावस्य तपसा भावितात्मनः Rām. 3. 5. 4. –2 pure, devout, holy; एको भावः सदा ह्यत्तो यतीनां भावितात्मनाम् Pt. 3. 65. –3 thoughtful, meditative; भावितात्मा भुवो भर्तुरथैनं प्रत्यबोधयत् R. 1. 74. –4 engaged in, occupied with; स्वगोत्रसंकीर्तनभावितात्मनः Si. 12. 38. (–m.) a sage, saint. –भावन a. being one's self furthered and furthering others.

भावितकम् The product of a multiplication, a factum.

भावित्रम् [भू-णि त्रन्] The three worlds (heaven, earth, and lower regions); Uṇ. 4. 179.

भाविता 1 The state of being or becoming. –2 Futurity. –3 Predestination.

भावित्वम् Inevitableness, necessity.

भाविन् [भू-भविष्यति णिनि] 1 Being, becoming; भूतभावि R. 11. 49. –2 To be or to come to pass in future, what will take place; लोकेन भावी पितुरेव तुल्यः R. 18. 38; प्रस्थानं ते कथमपि सखे लम्बमानस्य भावि Me. 43. –3 Future; समतीतं च भवच्च भावि च R. 8. 78; प्रत्यक्षा इव यद्भावाः क्रियन्ते भूतभाविनः K. P. 10; N. 3. 11. –4 Capable of taking place. –5 What must take place or is destined to happen, predestined; यदभावि न तद्भावि भावि चेन्न तदन्यथा H. 1. –6 Noble, beautiful, illustrious. –7 Attached or devoted to; श्राद्धे निवर्तन्ति न भाविनस्ते Mb. 12. 202. 2. –8 Possessed of (at the end of comp.). –m. N. given to every vowel except अ and आ. –नी 1 A handsome woman; Mb. 1. 6. 9. –2 A noble or virtuous lady; अनेन धर्मः सविशेषमद्य मे त्रिवर्गसारः प्रतिभाति भाविनि Ku. 5. 38. –3 A wanton woman. –4 A particular musical composition.

भावुक a. [भू-उकञ्] 1 About to be or happen. –2 Becoming. –3 Prosperous, happy. –4 Auspicious, blessed. –5 Having a poetic taste, appreciative; मुहुरहो रसिका भुवि भावुकाः Bhāg. 1. 1. 3. –कः A sister's husband (used chiefly in dramas); स्वकुटुम्बवियोगेन क्लिश्यते तव भावुकः Gaṇeśa P. (The story of Pāṭaliputra). –कम् 1 Happiness, welfare, prosperity; स रातु वो दुश्च्यवनो भावुकानां परंपराम् K. P. 7 (given as an instance of the fault of composition called अप्रयुक्तत्व). –2 Language full of love and passion.

भाव्य a. [भू-ण्यत्] 1 About to be or happen; मनुस्त्रयोदशो भाव्यः Bhāg. 8. 13. 30; oft. used impersonally like भवितव्यम् q. v.; किं तैर्भाव्यं मम सुदिवसैः Bh. 3. 41. –2 Future. –3 To be performed or accomplished. –4 To be conceived or imagined –5 To be proved or

demonstrated. -6 To be determined or investigated. -7 To be convicted; त्र्यवरैः साक्षिभिर्भाव्यो नृपब्राह्मणसंनिधौ Ms. 8. 60. -व्यम् 1 What is destined or sure to happen in the future; it is to be; सदा प्रहृष्टया भाव्यं गृहकार्येषु दक्षया Ms. 5. 150. -2 Futurity.

भाव्यता Futurity.

भावत a. (-ती f.), **भावत्क** a. (-की f.) Your honour's, your (respectfully); भावत्कं दृष्टवत्स्वेतदस्मास्वधि सुजीवितम् Bk. 5. 69.

भावाव a. Delicate, tender.

भाष् 1 A. (भाषते, भाषित) 1 To say, speak, utter; त्वय्यैकमीशं प्रति साधु भाषितम् Ku. 5. 81; oft. with two acc.; भीतां प्रियामित्य वचो बभाषे R. 7. 66: आखण्डलः काममिदं बभाषे Ku. 3. 11; Bk. 9. 122. -2 To speak to, address; किंचिद्विहस्यार्थपतिं बभाषे R. 2. 46; 3. 51. -3 To tell, announce, declare; क्षितिपालमुच्चैः प्रीत्या तमेवार्थमभाषतेव R. 2. 51. -4 To speak or talk about. -5 To name, call. -6 To describe. -With अनु 1 to speak, say. -2 to communicate, announce; यथा यथा नरोऽधर्मं स्वयं कृत्वानुभाषते Ms. 11. 228.

भाषक a. [भाष्-ण्वुल्] (At the end of comp.) Speaking, talking about.

भाषणम् [भाष्-भावे ल्युट्] 1 Speaking, talking, saying. -2 Speech, words, talk. -3 Kind words. -4 (In drama) Expression of satisfaction after the attainment of an object. -णी Resembling.

भाषा [भाष्-अ] 1 Speech, talk; as in चारुभाषः. -2 Language, tongue; - सत्या न भाषा भवति यद्यपि स्यात् प्रतिष्ठिता Ms. 8. 164. -3 A common or vernacular dialect; (a) the *spoken* Sanskrit language (opp. छन्दस् or वेद); विभाषा भाषायाम् P. VI. 1. 181; (b) any Prākrita dialect (opp. संस्कृत); भाषाश्च विविधा नृणाम् Ms. 9. 332; see प्राकृत. -4 Definition, description; स्थितप्रज्ञस्य का भाषा Bg. 2. 54. -5 An epithet of Sarasvatī, the goddess of speech. -6 (In law) The first of the four stages of a law-suit; the plaint, charge or accusation; यदावेदयते राज्ञे तद्भाषेत्यभिधीयते Y. -7 (In music) N. of a Rāgiṇī. -Comp. -अन्तरम् 1 another dialect or language. -2 translation (?). -चित्रकम् a play on words, conundrum. -पत्रम् application (Mar. अर्ज); भाषापत्रं तु तज्ज्ञेयमथवाविदनार्थकम् Śukra. 2. 309. -पादः a charge, plaint; see भाषा (6) above. -समः a figure of speech, which consists in so arranging the words of a sentence that it may be considered and read either as Sanskrit or Prākrita (one or more of its varieties); *e. g.* मञ्जुलमणिमञ्जीरे कलगम्भीरे विहारसरसीतीरे। विरसासि केलिकीरे किमालि धीरे च गन्धसारसमीरे॥ S. D. 642 (एष श्लोकः संस्कृतप्राकृतशौरसेनीप्राच्यावन्तीनागरापभ्रंशेष्वेकविध एव); किं त्वां भणामि विच्छेददारुणायासकारिणि। कामं कुरु वरारोहे देहि मे परिरम्भणम् Mal. 6. 11 (which is in Sanskrit or Saurasenī); so 6. 10. -समितिः f. (with Jainas) moderation in speech.

भाषिक a. Belonging to common or vernacular speech. -कम् General rule.

भाषिका Speech, language.

भाषित p. p. [भाष्-कर्मणि-क्त] Spoken, said, uttered. -तम् Speech, utterance, words, language; आकारैरिङ्गितैर्गत्या चेष्टया भाषितेन च। नेत्रवक्त्रविकारैश्च गृह्यतेऽन्तर्गतं मनः॥ Ms. 8. 26. -Comp. -ईशा Sarasvatī; N. 11. 16. -पुंस्क = उक्तपुंस्क q. v.

भाषितृ a. A speaker, talker.

भाषिन् a. 1 (At the end of comp.) Speaking, talking; as in अल्प° &c. -2 Loquacious, talkative.

भाष्यम् [भाष्-ण्यत्] 1 Speaking, talking. -2 Any work in the common or vernacular language. -3 Exposition, gloss, commentary; as in वेदभाष्य. -4 Especially, a commentary which explains *Sūtras* or aphorisms word by word with comments of its own; (सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुसारिभिः। स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः॥); संक्षिप्तस्याप्यतोऽस्यैव वाक्यस्यार्थगरीयसः। सुविस्तरतरा वाचो भाष्यभूता भवन्तु मे Śi. 2. 24; फणिभाषितभाष्यफक्किका N. 2. 95. -5 N. of the great commentary of Patañjali on Pāṇini's Sūtras. -6 A sort of house. -Comp. -करः, -कारः, -कृत् m. 1 a commentator, scholiast. -2 N. of Patañjali. -भूत a. serving as a commentary; सुविस्तरतरा वाचो भाष्यभूता भवन्तु मे Śi. 2. 24.

भास् 1 A. (भासते-भासित) 1 To shine, glitter, be bright; तावत् कामनृपातपत्रसुषमं बिम्बं बभासे विधोः Bv. 2. 74; 4. 18; Ku. 6. 11; Bk. 10. 61. -2 To become clear or evident, come into the mind; त्वदङ्गमार्दवे दृष्टे कस्य चित्ते न भासते। मालतीशशभृल्लेखाकदलीनां कठोरता Chandr. 5. 42. -3 To appear. *-Caus.* (भासयति-ते) 1 To brighten, irradiate, illuminate; अविरतसंस्तनुभ्रवरदीक्षितामसमभासमभासयदीश्वरः R. 9. 21; न तद् भासयते सूर्यो न शशाङ्को न पावकः Bg. 15. 6. -2 To show, make clear or evident, manifest; अवभासन् स्वकाः शक्तीः Bk. 15. 42.

भास् f. [भास्-भावे-क्विप्] 1 Light, lustre, brightness; यदि भाः सदृशी सा स्याद् भासस्तस्य महात्मनः Bg. 11. 12; दृशा निशेन्दीवरचारुभासा N. 22. 43; R. 9. 21; Ku. 7. 3. -2 A ray of light; रविकरसंवलिताः फलन्ति भासः Ki. 5. 38, 46; 9. 6; अस्तापास्तसमस्तभासि नभसः पारं प्रयाते रवौ Ratn. 1. 24; 4. 16. -3 A reflection, an image. -4 Majesty, glory, splendour. -5 Wish, desire. -Comp. -करः 1 the sun; परिणतमदिराभं भास्करेणांशुबाणैः Śi. 11. 49; R. 11. 7; 12. 25; Ku. 6. 49; स स्तौति भास्करं भक्त्या नौति पापहरं हरम्। -2 a hero. -3 fire. -4 an epithet of Śiva. -5 N. of a celebrated Hindu astronomer who is said to have flourished in the eleventh or twelfth century A. D. (-रम्) 1 gold. -2 a kind of breach (made by thieves in a wall); पद्मव्याकोशं भास्करं बालचन्द्रम्...... तत्कस्मिन् देशे दर्शयाम्यात्मशिल्पम् Mk. 3. 13. °अध्वन् the sky; स भास्कराध्वानमनुप्रपन्नः Rām. 6. 74. 65. °आवर्तः N. of a disease of the head (Mar. अधाशिशी). °द्युतिः N. of Viṣṇu; चन्द्रांशुर्भास्करद्युतिः V.

Sah. °प्रियः a ruby. °लवणम् a kind of salt or mixture. °सप्तमी the seventh day in the bright half of Māgha. -करिः 1 the planet Saturn. -2 Vaivasvata Manu. -3 Karṇa. -4 N. of Sugrīva.

भासः [भास्-भावे घञ्] 1 Brightness, light, lustre. -2 Fancy. -3 A cock; Mb. 12. 36. 23; Bhāg. 8. 10. 10. -4 A vulture. -5 A cow-shed (गोष्ठ). -6 N. of a poet; भासो हासः कविकुलगुरुः कालिदासो विलासः P. R. 1 22; M. 1. -7 A kind of bird; कृत्रिमं भासमारोप्य वृक्षाग्रे शिल्पिभिः कृतम् Mb. 1. 132. 68 (com. भासं नीलपक्षं पक्षिणं शकुन्तमित्यन्ये गृध्रमित्यपरे).

भासक a. (-सिका f.) [भास्-ण्वुल्] 1 Enlightening, brightening, illuminating. -2 Showing, making evident. -3 Making intelligible. -कः N. of a poet.

भासता Vulturous nature, rapacity; स याति भासतां विप्रः Ms. 11. 25.

भासनम् [भास्-ल्युट्] 1 Shining, glittering. -2 Illuminating.

भासन्त a. (-न्ती f.) 1 Shining. -2 Beautiful, handsome. -न्तः 1 The sun. -2 The moon. -3 An asterism, a star. -4 The bird भास q. v. -न्ती An asterism (नक्षत्र).

भासस् n. Brightness, light; भासांसि वस्ते सूर्यो न शुक्रः Ṛv. 6. 4. 3.

भासुः The sun.

भासुर a. [भास्-घुरच्] 1 Shining, bright, splendid; मणिमयूखचयांशुकभासुराः Ki. 5. 5; तं भूपतिर्भासुरहेमराशिं (दिदेश) R. 5. 30. -2 Terrible. -रः 1 A hero. -2 A crystal.

भास्वत् a. Bright, shining, luminous, resplendent; भास्वन्ति रत्नानि महौषधीश्च पृथूपदिष्टां दुदुहुर्धरित्रीम् Ku. 1. 2; 6. 60. -m. 1 The sun; भास्वानुदेष्यति हसिष्यति चक्रवालम् Subhāṣ; R. 16. 44. -2 Light, lustre, splendour. -3 A hero. -4 Ved. Dawn. -ती The city of the sun.

भास्वर a. [भास्-वरच्] Shining, bright, radiant, brilliant. -रः 1 The sun. -2 A day. -3 Fire.

भास्मन a. (-नी f.) [भस्मनो विकारोऽण्] Consisting or made of ashes, ashy; अहिपरिकरभाजो भास्मनैरङ्गरागैः Śi. 4. 65.

भिक्ष् 1 Ā. (भिक्षते, भिक्षित) 1 To ask, beg or ask for (with two acc.); भिक्षमाणो वनं प्रियाम् Bk. 6. 9. -2 To beg (as alms); न यज्ञार्थं धनं शूद्राद्विप्रो भिक्षेत कर्हिचित् Ms. 11. 24, 25. -3 To ask without obtaining. -4 To be weary or distressed. -5 To obtain.

भिक्षणम् [भिक्ष्-ल्युट्] Begging, begging alms, mendicancy.

भिक्षा [भिक्ष्-अ] 1 Asking, begging, soliciting; वृत्ते शरावसंपाते भिक्षां नित्यं यतिश्चरेत् Ms. 6. 56. -2 Anything given as alms, alms; भवति भिक्षां देहि. -3 Wages, hire. -4 Service. -5 A means of subsistence; अपेतक्रमसंतापाः सुभिक्षाः सुप्रतिश्रयाः Rām. 2. 92. 6. -Comp. -अटनम् wandering about beg-ging for alms; रुद्रो येन कपालपाणिपुटके भिक्षाटनं कारितः Bh. 2.9[illegible] (-नः) a beggar, mendicant. -अन्नम् food obtained b[illegible] begging, alms. -अयनम् (णम्) = भिक्षाटन q. v. -अर्थिन् [illegible] begging for alms or charity. (-m.) a beggar. -अर्ह [illegible] worthy of alms, a fit object of charity. -अशनम् th[illegible] food obtained by begging; भिक्षाशनं तदपि नीरसमेकवार[illegible] Bh. 3. 19. -आशिन् a. 1 living on alms; भिक्षाशी जनमध्य[illegible] संगरहितः Bh. 3. 86. -2 dishonest. -आहारः begged food Bh. 3. 144. -उपजीविन् a. living on alms, a beggar -करणम् asking alms, begging. -चरः, -चारः a beggar or mendicant. -चरणम्, -चर्यम्, -चर्या wandering about begging for alms. -पात्रम् a begging-bowl, an alms-dish; so भिक्षाभाण्डम्, भिक्षाभाजनम्. -भुज् a. living on alms. -माणवः a young beggar (used as a term of contempt); P. VI. 2. 69 com. -वासस् n. a beggar's dress. -वृत्तिः f. living by begging, a mendicant's life.

भिक्षाकः (-की f.) A beggar, mendicant; P. III. 2. 155.

भिक्षित p. p. Begged, asked, &c.

भिक्षुः [भिक्ष्-उन्] 1 A beggar, mendicant in general; भिक्षां च भिक्षवे दद्यात् Ms. 3. 94. -2 A religious mendicant, a Brāhmaṇa in the fourth order of his religious life (when he quits his house and family and lives only on alms), a *Sannyāsin*. -3 The fourth order or stage in the religious life of a Brāhmaṇa (संन्यास). -4 A Buddhist mendicant. -Comp. -चर्या begging, a mendicant's life. -भावः monk-hood, priest-hood. -सङ्घः a society of Buddhist mendicants. -सङ्घाती old or tattered clothes (चीवर). -सूत्रम् a collection of rules for mendicants; P. IV. 3. 110.

भिक्षुकः [भिक्ष्-उक] A beggar, mendicant; आकीर्णं भिक्षुकैर्वान्यैरगारमुपसंव्रजेत् Ms. 6. 51. -की A female mendicant; cf. भिक्षुणी A Buddhist nun.

भिङ्गिसी A variety of कम्बल; Kau. A. 2. 11. 29.

भिण्डः, भिण्डकः, भिण्डा Abelmoschus Esculentus (Mar. भेंडा); एरण्डभिण्डार्कनलैः प्रभूतैरपि संचितैः। दारुकृत्यं यथा नास्ति तथैवाज्ञैः प्रयोजनम् Pt. 1. 96.

भिद् I. 1 P. (भिन्दति) To divide or cut into parts. -II. 7 U. (भिनत्ति, भिन्ते, बिभेद, बिभिदे, अभैत्सीत्, अभिनत्, अभिन्त, भेत्स्यति-ते, भेत्तुम् भिन्न) 1 To break, cleave, split, cut asunder, rend, pierce, break through or down; अतिशीतलमप्यम्भः किं भिनत्ति न भूभृतः H. 3. 38; तेषां कथं नु हृदयं न भिनत्ति लज्जा Mu. 3. 34; Śi. 8. 39; Ms. 3. 33; R. 8. 93; 12. 77. -2 To dig or tear up, excavate; U. 1. 23. -3 To pass through; यदि रोहिण्याः शकटं भिनत्ति रविनन्दनो गगनवीथ्याम् Pt. 1. 211, 212. -4 (a) To divide, separate; द्विधा भिन्ना शिखण्डिभिः R. 1. 39. (b) To displace; आनन्दजः शोकजमश्रु बाष्पस्तयोरशीतं शिशिरो बिभेद R. 14. 3. -5 To violate, break, infringe; समयं लक्ष्मणोऽभिनत् R. 15. 94; निहतश्च स्थितिं भिन्दन् दानवोऽसौ बलद्विषा Bk. 7. 68. -6 To remove, take away; धैर्यमभिनदुदितं शिशुना Śi. 15. 87.

–7 To disturb, interrupt; as in समाधिभेदिन्; असिपत्रवने चैव भिद्यमानानधार्मिकान् Rām. 7. 21. 15. –8 To change, alter; (न) भिन्दन्ति मन्दां गतिमश्वमुख्यः Ku. 1. 11; or विश्वासोपगमादभिन्नगतयः शब्दं सहन्ते मृगाः Ś. 1. 14. –9 To expand, cause to open or blossom, open; सूर्यांशुभिर्भिन्नमिवारविन्दम् Ku. 1. 32; नवोषसा भिन्नमिवैकपङ्कजम् Ś. 7. 16; Me. 109. –10 To disperse, scatter, scare away; भिन्नसारङ्गयूथः Ś. 1. 32; V. 1. 16. –11 To disjoin, disunite, set at variance; भेत्स्यामि स्वमतेन भेदकुशलो ह्येष प्रतीपं द्विषः Mu. 3. 13. –12 To loosen, relax, dissolve; पर्यङ्कबन्धं निबिडं बिभेद Ku. 3. 59. –13 To disclose, divulge. –14 To perplex, distract. –15 To distinguish, discriminate. –16 To explain or to understand; बचांसि योगग्रथितानि साधो न नः क्षमन्ते मनसापि भेत्तुम् Bhāg. 5. 10. 18. –*Pass.* (भिद्यते) 1 To be split, rent or shivered; धरा धारापातैर्मणिमयशरैर्भिद्यत इव Mk. 5. 22. –2 To be divided or separated. –3 To expand, blossom, open. –4 To be loose or relaxed; प्रस्थानभिन्नां न बबन्ध नीविम् R. 7. 9, 66. –5 To be different from (with abl.); न कारणात् स्वाद् बिभिदे कुमारः प्रवर्तितो दीप इव प्रदीपात् R. 5. 37; U. 4. –6 To be destroyed. –7 To be divulged or betrayed, get abroad; षट्कर्णो भिद्यते मन्त्रः &c. Pt. 1. 99. –8 To be harassed, pained or afflicted. –9 To be frightened or alarmed; अम्भसा भिद्यते सेतुस्तथा मन्त्रोऽप्यरक्षितः। पैशुन्याद् भिद्यते स्नेहो वाचा भिद्येत कातरः॥ Pt. 1. 102. –10 To separate oneself from, keep aloof from. –*Caus.* (भेदयति-ते) 1 To split, cleave, divide, tear &c. –2 To destroy, dissolve. –3 To disunite, set at variance. –4 To perplex. –5 To seduce. –*Desid.* (बिभित्सति-ते) To wish to break &c.

भित्तम् [भिद्-क्त नि॰ तस्य न नः) 1 A part, portion; गृहाः शशमृद्भित्तनिरङ्कभित्तयः N. 2. 74. –2 A fragment, bit. –3 A wall, partition.

भित्ति *f.* [भिद्-क्तिन्] 1 Breaking, splitting; dividing. –2 A wall, partition; समया सौधभित्तिम् Dk.; Śi. 4. 67. fort-wall; इष्टकोपलमृद्भित्तिप्राकारं पारिघं स्मृतम् Śukra. 4. 849. –3 (Hence) Any place, spot or ground (आश्रय) to work anything upon; चित्रकर्मरचना भित्तिं विना वर्तते Mu. 2. 4. –4 A fragment, bit, piece, portion. –5 Anything broken. –6 A rent, fissure. –7 A mat (made of split reeds). –8 A flaw, defect. –9 An opportunity. –10 A wall-like surface; कपोलभित्ति, गण्डभित्ति &c.; सिंहः शिशुरपि निपतति मदमलिनकपोलभित्तिषु गजेषु Bh. 1. 38. –Comp. –खातनः a rat. –चौरः a house-breaker. –पातनः 1 a kind of rat. –2 a rat.

भित्तिका 1 A wall, partition. –2 A small house-lizard.

भिद् *a.* (At the end of comp.) Breaking, splitting; destroying &c.; तुरगविचयव्यग्रानुर्वीभिदः U. 1. 23. –*f.* 1 Breaking, splitting, dividing. –2 Difference. –3 A sort, kind.

भिदकः [भिद्-क्वुन्] A sword. –कम् 1 A diamond. –2 Indra's thunderbolt.

भिदा [भिद्-भावे अङ्] 1 Breaking, bursting, rending, tearing; विरहिणां हृदयस्य भिदाभृतः कपिशितं पिशितं मदनामिना Śi. 6. 5. –2 Separation. –3 Difference. –4 Kind, species, sort. –5 Coriander.

भिदापनम् Causing to break or trample on.

भिदिः, भिदिरम्, भिदुः Indra's thunderbolt.

भिदुर *a.* [भिद्-कुरच्] 1 Breaking, bursting, splitting. –2 Fragile, brittle. –3 Blended, variegated, mixed, mingled; नीलाश्मद्युतिभिदुराम्भसोऽपरत्र Śi. 4. 26; 19. 58; 20. 1. –रः 1 The *Plakṣa* tree. –2 A chain for an elephant's feet. –रम् A thunderbolt.

भिदेलिम *a.* Fragile, brittle.

भिद्यः 1 A rushing river. –2 N. of a particular river; तोयदागम इवोद्ध्यभिद्ययोर्नामधेयसदृशं विचेष्टितम् R. 11. 8; (see Malli.); Kir. K. 4. 58. –द्यम् Splitting, breaking.

भिद्रम् A thunderbolt.

भिन्द (न्दि) पालः 1 A small javelin thrown from the hand; वानरान् भिन्दिपालैश्च शूलैश्चैव व्यदारयन् Rām. 6. 42. 45. –2 A sling, an instrument like a sling for throwing stones; उल्कावाणैश्च शतशः भिन्दिपालैश्च भूरिशः Śiva B. 14. 20; भिन्दिपालासिपट्टिशैः Parṇāl. 4. 76.

भिन्दु *a.* Destroying. –न्दुः 1 A breaker, destroyer; पुरां भिन्दुर्युवा कविरमितौजा अजायत Ṛv. 1. 11. 4. –2 A drop; cf. बिन्दु. –न्दुः *f.* A woman bringing forth a dead child.

भिन्न *p. p.* [भिद्-क्त] 1 Broken, torn, split, rent; संछिन्नभिन्नसर्वाङ्गाः सर्त्विक्सभ्या भयाकुलाः। स्वयंभुवे नमस्कृत्य Bhāg. 4. 6. 2. –2 Divided, separated. –3 Detached, disunited, disjoined; scattered; भिन्नं च वानरानीकम् Rām. 6. 67. 80. –4 Expanded, blown, opened; भिन्नैलासुरभिमुवाह गन्धवाहः Ki. 7. 38. –5 Different from, other than (with abl.); तस्मादयं भिन्नः. –6 Different, varied; भिन्नरुचिर्हि लोकः R. 6. 30. –7 Loosened. –8 Mingled, mixed, blended; एकत्र स्फटिकतटांशुभिन्ननीरा नीलाश्मद्युतिभिदुराम्भसोऽपरत्र Śi. 4. 26. –9 Deviating from. –10 Changed. –11 Furious; दुरुर्बभिन्नमात्मानं यः समाधातुमीश्वरः Bhāg. 11. 23. 2. –12 Without, deprived of. –13 Undutiful, vicious; भिन्नवृत्तिता Ms. 12. 33; नैतत् खलायोपदिशेत्......न भिन्नाय Bhāg. 3. 32. 39. –14 Stood up (as hair); खरोष्ट्राश्वतरा राजन् भिन्नरोमाः स्रवन्ति च Rām. 6. 10. 18. –15 Seduced, bribed; H. (See भिद्). –न्नः 1 A defect or flaw in a gem. –न्नम् 1 A bit, fragment, part. –2 A blossom. –3 A wound, stab; शक्तिकुन्तेषुखड्गाग्रविषाणैराशयो हतः। यत् किंचित् प्रसवेत् तद्धि भिन्नमित्यभिधीयते Bhāva. P. –4 A fraction. –Comp. –अञ्जनम् a kind of mixed collyrium, made of many pounded ingredients; प्रयान्ति ...... भिन्नाञ्जनवर्णतां घनाः Śi. 12. 68; Me. 61; Ṛs. 3. 5. –अर्थ *a.* clear, evident, intelligible; स्फुटभिन्नार्थमुदाहरद् वचः Śi. 16. 1. (–र्थम्) *ind.* clearly, distinctly, unenigmatically; न खल्ववगच्छामि भिन्नार्थमभिधीयताम् Ś. 2. –उदरः 'born of a different womb or mother',

a half-brother. –कट a. furious, in rut; भेजे भिन्नकटै-र्नागैरन्यानुपरुरोध यैः R. 4. 83. –करटः an elephant in rut (from whose temples ichor exudes). –कर्ण a. having divided ears (said of particular animals); P. VI. 3. 115. –कुम्भः a person who has regained his liberty by redeeming his pledge. –कूट a. 1 deprived of a leader (as an army). –2 employing a different stratagem. –क्रम a. out of order, disordered. –गति a. 1 going with broken steps. –2 going quickly. –गर्भ a. broken up (in the centre), disorganized. –गात्रिका Cucumis Usitatissimus (Mar. चिबूड). –गुणनम् multiplication of fractions; अंशाहतिश्छेदवधेन भक्ता लब्धं विभिन्ने गुणने फलं स्यात् Līlā. –घनः the cube of a fraction. –दर्शिन् a. making or seeing a difference, partial. –देश a. belonging to different places; कृत्ययोर्भिन्नदेशत्वाद् द्वैधीभवति मे मनः। Ś. 2. 18. –देह a. wounded. –नौ a. ship-wrecked. –परिकर्मन् n. any one of the arithmetical operations with fractions. –प्रकार a. of a different kind or sort. –भागहरः division of fractions. –भाजनम् a potsherd. –मन्त्र a. one who has betrayed a plan; Rām. –मर्मन् a. wounded in vital parts, mortally wounded. –मर्याद a. 1 one who has transgressed the due limits, disrespectful; आः, तातापवादभिन्नमर्याद U. 5. –2 unrestrained, uncontrolled. –रुचि a. having different tastes; भिन्नरुचिर्हि लोकः R. 6. 30. –लिङ्गम्, –वचनम् incongruity of gender or number in a composition; see K. P. 10. –वर्गः the square of a fraction. –वर्चस्, वर्चस्क a. voiding excrement. –वर्ण a. 1 discoloured, pale. –2 of a different caste or tribe. –वृत्त a. 1 leading a bad life, abandoned. –2 containing a metrical fault. –वृत्ति a. 1 leading a bad life, following evil courses; तदन्तःपुरेषु चामी भिन्नवृत्तेषु मन्दत्रासा बहुसुखैरवर्तन्त Dk. 2. 8. –2 having different feelings or tastes or emotions. –3 having different occupations. –व्यवकलितम् subtraction of fractions. –संहति a. disunited, dissolved. –संकलनम्, –संकलितम् addition of fractions. –स्वर a. 1 having a changed voice, faltering. –2 discordant. –हृतिः f. division of fractions. –हृदय a. pierced through the heart; बाणभिन्नहृदया निपेतुषी R. 11. 19.

भिन्नकः 1 A Buddhist. –2 N. of a musical mode or Rāga.

भिरिण्टिका N. of a plant (श्वेतगुंजा).

भिल्लः N. of a wild tribe (who lives in the Vindhya hills, in the forests of Mālawa, Mewar, Khandesha and the Deccan); मलये भिल्लपुरन्ध्री चन्दनतरुकाष्ठमिन्धनं कुरुते Subhāṣ. –ल्ली 1 The *lodhra* tree. –2 A woman of the Bhil tribe; भिल्ली पल्लवशङ्कया वितनुते सान्द्रद्रुम...Udb. –Comp. –गवी the female of the *Bos gavæus*. –तरुः the *lodhra* tree. –भूषणम् the *gunja* plant.

भिल्लोटः, –टकः The *lodhra* tree.

भिषज् m. [बिभेत्यस्मात् रोगः, भी-षुक् ह्रस्वश्च Uṇ. 1. 134] 1 A physician, doctor; भिषजामसाध्यम् R. 8. 93; गतस्पृहो धैर्यधरः कृपालुः शुद्धोऽधिकारी भिषगीदृशः स्यात्। –2 N. of Viṣ... –3 Medicine, a remedy. –m. *dual*. The two Aśv... (physicians of gods). –Comp. –जितम् a drug or me... cine. –पाशः a quack doctor. –प्रिया f. A species ... moonseed (Mar. गुळवेल). –मातृ f. N. of a pla... (Mar. अडुळसा). –वरः an excellent physician. (–रौ ... the two Aśvins. –वरा N. of a plant (Mar. हिरडा... –विद् m. a physician.

भिषजावर्तः N. of Kṛiṣṇa.

भिषज्यम् 1 Healing, curing. –2 A remedy, cure.

भिस्सा, भिस्सिका, –टा, भिस्सटा, भिस्सिटा Parche... or fried grain.

भिस्सा Boiled rice.

भी I. 3 P. (बिभेति, बिभाय-बिभयांचकार, अभैषीत्, भेष्यति... भीत) 1 To fear, dread, be afraid of; मृत्योर्बिभेषि किं बा... न स भीतं विमुञ्चति; रावणाद्बिभ्यती भृशम् Bk. 8. 70; Śi. 3. 4... –2 To be anxious or solicitous about (Ā.). –II. 10 P... To fear (भाययति, भययति). –Caus. (भाययति) To frighte... (any one) with anything; कुञ्चिकयैनं भाययति Sk.; (भापयते... भीषयते) to frighten, terrify, intimidate; मुण्डो भापयते... Sk.; स्तनितेन भीषयित्वा धाराहस्तैः परामृशसि Mk. 5. 28.

भियस् n. Ved. Fear.

भिया Fear, apprehension.

भी f. Fear, dread, alarm, fright, terror; अभीः 'fearless' R. 15. 8; वपुष्मान् वीतभीर्वाग्मी दूतो राज्ञः प्रशस्यते Ms. 7. 64. –Comp. –कर a. causing fear.

भीत p. p. [भी-क्त] 1 Frightened, terrified, alarmed, afraid of (with abl.); न भीतो मरणादस्मि Mk. 10. 27. –2 Fearful, timid. –3 Placed in danger, imperilled. –तम् Fear, dread. –तम् ind. Timidly. –Comp. –गायनः a shy singer. –चारिन् a. acting timidly. –चित्त a. afraid in mind. –भीत a. 1 exceedingly afraid. –2 rather shy (भीततुल्य); चकुराक्षेपिकाश्चेष्टा भीतभीता इवाङ्गनाः Bu. Ch. 4. 25; cf. also; भीतभीत इव शीतदीधितिः Śi.

भीतंकार a. Making (one) afraid; तं भीतंकारमाक्रुश्य... Bk. 5. 39.

भीतंकार ind. Calling (one) a coward.

भीतिः f. [भी-क्तिन्] 1 Fear, apprehension, dread, terror; न भेजिरे भीमविषेण भीतिम् Bh. 2. 80. –2 Shaking, tremour. –3 Danger, risk. –Comp. –कृत् a. causing or exciting fear. –छिद् a. keeping away fear. –नाटितकम् a gesticulation or representation of fear.

भेतव्य a. To be feared, be afraid of; तावद् भयस्य भेतव्यं यावद् भयमनागतम् H.

मन्थः [मन्थ्-करणे घञ्] 1 Churning, shaking about, stirring, agitating; मन्थादिव क्षुभ्यति गाङ्गमम्भः U. 7. 16; R. 10. 3. –2 Killing, destroying. –3 A mixed beverage; पुंसा नक्षत्रेण मन्थं संनीय जुहोति Bri. Up. 6. 3. 1. –4 A churning-stick (मन्था also). –5 The sun. –6 A ray of the sun. –7 Excretion of rheum from the eyes, mucus (from the eyes), cataract. –8 An instrument for kindling fire by attrition. –9 A spoon for stirring. –10 A kind of antelope. –11 A medical preparation of drink; चूर्णे चतुष्पले शीते क्षुणद्रव्यं पलं क्षिपेत्। मृत्पात्रे मन्थयेत् सम्यक् तस्माच्च द्विपलं पिबेत् Bhāva. P. **–Comp. –अचलः, –अद्रिः, –गिरिः, –पर्वतः, –शैलः** the Mandara mountain (used as a churning-stick); मन्थाद्रिभ्रमणभ्रमं हृदि हरिद्दन्तावलाः पेदिरे Bv. 1. 55. **–उदकः, –उदधिः** the sea of milk. **–गुणः** a churning-cord. **–जम्** butter. **–दण्डः, –दण्डकः** a churning-stick. **–विष्कम्भः** the churning post (Mar. घुसळखांब).

मन्थनः [मथ्यतेऽनेन करणे ल्युट् भावे ल्युट् वा] A churning-stick. **–नम्** 1 Churning, agitating, stirring or shaking about. –2 Kindling fire by attrition. **–नी** A churning-vessel. **–Comp. –घटी** a churning-vessel.

मन्थर *a.* [मन्थ्-अरच्] 1 Slow, dull, tardy, lazy, inactive; गर्भमन्थरा Ś. 4; प्रत्यभिज्ञानमन्थरोऽभवत् *ibid*; स्थाने खल्वयं प्रसवमन्थरोऽभूत् M. 5; दरमन्थरचरणविहारम् Gīt. 11; Śi. 6. 40; 7. 18; 5. 62; R. 19. 21. –2 Stupid, foolish, silly; मन्थरकौलिकः. –3 Low, deep, hollow, having a low tone. –4 Large, broad, wide, big. –5 Bent, crooked, curved. –6 Indicating, showing (सूचक). **–रः** 1 A store, treasure. –2 The hair of the head. –3 Wrath, anger. –4 Fresh butter. –5 A churning-stick. –6 Hindrance, an obstacle. –7 A stronghold. –8 Fruit. –9 A spy, an informer. –10 The month Vaiśākha. –11 The mountain Mandara. –12 An antelope. **–रा** N. of a humpbacked nurse or slave of Kaikeyī who instigated her mistress, on the eve of Rāma's coronation as heir-apparent, to beg of her husband by the two boons formerly promised to her by him, the banishment of Rāma for fourteen years and the installation of Bharata on the throne; मन्थरां प्रविशस्वादौ कैकेयीं च ततः परम् A. Rām. **–रम्** Safflower. **–Comp. –विवेक** *a.* slow in judgment, void of discrimination; उन्मथ्य मन्थरविवेकमकाण्ड एव Māl. 1. 18.

मन्थरित *a.* Made slow, lazy; relaxed.

मन्थरुः The wind produced by the waving of a *chowrie*.

मन्थानः [मन्थ्-आनच्] 1 A churning-stick; प्रविवेशाथ पातालं मन्थानः पर्वतोपमः Rām. –2 An epithet of Śiva.

मन्थानकः A kind of grass.

मन्थिन् *a.* [मन्थ् णिनि] 1 Churning, stirring. –2 Afflicting, annoying. *–m.* 1 Semen virile. –2 Ved. Soma juice. **–नी** A churning-vessel.

मन्द् 1 Ā. (मन्दते) (mostly Vedic) 1 To be drunk. –2 To be glad, to rejoice. –3 To languish, be languid.

–4 To shine. –5 To move slowly, loiter, tarry. –6 To be praised or celebrated. –7 To praise. –8 To sleep,

मन्द *a.* [मन्द्-अच्] 1 Slow, tardy, inactive, lazy, dull, loitering; (न) भिन्दन्ति मन्दां गतिमश्वमुख्यः Ku. 1. 11; तच्चरितं गोविन्दे मनसिजमन्दे सखी प्राह Git. 6. –2 Cold, indifferent, apathetic. –3 Stupid, dull-witted, foolish, ignorant, weak-brained; प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते Subhās.; मन्दोऽप्यमन्दतामेति संसर्गेण विपश्चितः M. 2. 8; मन्दः कवियशःप्रार्थी गमिष्याम्युपहास्यताम् R. 1. 3; द्विषन्ति मन्दाश्चरितं महात्मनाम् Ku. 5. 75. –4 Low, deep, hollow (as sound). –5 Soft, faint, gentle; as in मन्दस्मितम्. –6 Small, little, slight; मन्दोदरी; see अ *ind.* 1 (*d*) also. –7 Weak, defective, feeble, as मन्दाग्नि. –8 Unlucky, unhappy. –9 Faded. –10 Wicked, vile. –11 Addicted to drinking. –12 Weak, slack (as a bow). –13 Sick, afflicted with disease. –14 Independent (स्वतन्त्र). **–न्दः** 1 The planet Saturn. –2 An epithet of Yama. –3 The dissolution of the world. –4 A kind of elephant; मन्दोऽपि नाम न महानवगृह्य साध्यः Śi. 5. 49 (where मन्द means 'a fool' also). –5 The apsis of a planet's course. **–न्दा** A pot, vessel. **–न्दम्** *ind.* 1 Slowly, gradually, by degrees; यातं यच्च नितम्बयोर्गुरुतया मन्दं विलासादिव Ś. 2. 2. –2 Gently, softly, not violently; मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वाम् Me. 9. –3 Faintly, feebly, weakly, lightly. –4 In a low tone, deeply. **–Comp. –अक्ष** *a.* weak-eyed. **(–क्षम्)** sense of shame, modesty, bashfulness; मन्दाक्षं ह्रीस्त्रपा व्रीडा लज्जा साऽपत्रपाऽन्यतः Ak; मन्दाक्षमन्दाक्षरमुद्रमुक्त्वा N. 3. 61; 14. 47; 22. 33. **–अग्नि** *a.* having a weak digestion. **(–ग्निः)** slowness of digestion. **–अनिलः** a gentle breeze. **–असु** *a.* having weak or faint breath. **–आक्रान्ता** N. of a metre; see App. I; सुवंशा कालिदासस्य मन्दाक्रान्ता प्रवल्गति। सदश्वदमकस्येव काम्बोजतुरगाङ्गना ॥ According to prof. Sukumāra Sen, Kālidāsa is the inventor of this metre. **–आचार** *a.* badly conducted. **–आत्मन्** *a.* dull-witted, silly, ignorant; मन्दात्मानुजिघृक्षया Malli. **–आदर** *a.* 1 having little respect for, disregarding, caring little for. –2 neglectful. **–आस्यम्** shyness. **–उच्चः** the upper apsis of the course of a planet. **–उत्साह** *a.* discouraged, dispirited; मन्दोत्साहः कृतोऽस्मि मृगयापवादिना माढव्येन Ś. 2. **–उदरी** N. of the wife of Rāvaṇa, regarded as one of the five very chaste women; cf. अहल्या. She advised her husband to deliver Sītā to Rāma and thus save himself from certain ruin, but he did not heed her; मन्दोदरीकुटिलकोमलकेशपाशमन्दारदाममकरन्दरसं पिबन्तः P. R. 1. 58. **–उष्ण** *a.* tepid, lukewarm. **(–ष्णम्)** gentle heat. **–औत्सुक्य** *a.* slackened in eagerness, cast down, disinclined; मन्दौत्सुक्योऽस्मि नगरगमनं प्रति Ś. 1. **–कर्ण** *a.* slightly deaf; (Proverb:— बधिरान्मन्दकर्णः श्रेयान् 'something is better than nothing'). **–कर्मन्** *a.* inactive. *–n.* the process for determining the apsis of a planet's course. **–कान्तिः** the moon. **–कारिन्** *a.* acting slowly or foolishly. **–गः** Saturn. **–गति, –गामिन्** *a.* walking slowly, slow of pace. **–चेतस्** *a.* 1 dull-witted, silly, foolish. –2 absent-minded. –3 fainting away, scarcely conscious. **–छाय** *a.* dim, faint, lustreless; Me. 82 (v. l.). **–जननी** the mother of Saturn. **–जरस्** *a.* slowly growing old. **–धार** *a.* flowing in a slow stream. **–धी, –प्रज्ञ, –बुद्धि, –मति, –मेधस्** *a.* dull-witted, silly, foolish. **–परिधिः** *m.* (in astr.) the epicycle of the apsis. **–पुण्य** *a.* unfortunate, ill-fated. **–फलम्** equation of the apsis. **–भागिन्, –भाग्य, –भाज्** unfortunate, ill-fated, wretched, miserable. **–भास्** *a.* dim, of fading lustre; सेनानिवेशान् पृथिवीक्षितोऽपि जग्मुर्विभातग्रहमन्दभासः R. 7. 2. **–मन्दम्** *ind.* slowly, leisurely. **–रश्मि** *a.* dim. **–विचेष्टित** *a.* slowly moving. **–विभव** *a.* poor, impoverished; नश्यति विपुलमतेरपि बुद्धिः पुरुषस्य मन्दविभवस्य Pt. 5. 5. **–विभ्रंश** *a.* slightly purgative. **–विसर्पिन्** *a.* creeping along slowly (as a louse); cf. Pt. 1. 252 (N. of a louse). **–वीर्य** *a.* weak. **–वृष्टिः** *f.* slight rain. **–स्मितम्, –हासः, –हास्यम्** a gentle laugh, a smile.

मन्दक *a.* 1 Simple, silly, foolish. –2 One without any feeling (विकार); Mb. 12. 35. 37 (com. मन्दकः रागद्वेषमानापमानशून्यः).

मन्दता, –त्वम् 1 Slowness, inactivity. –2 Dulness. –3 Foolishness, stupidity, simplicity; उच्चैरस्यति मन्दतामरसताम् Chandrāloka. 1. 1. –4 Weakness. –5 Littleness, smallness; मन्दत्वमापन्नः Pt. 2. 167 'became less, subsided'.

मन्दयति Den. P. 1 To weaken, slacken, diminish. –2 To retard.

मन्दायते Den. Ā. 1 To go slowly, tarry, lag behind, loiter, delay; मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः Me. 40; V. 3. 15. –2 To be weak or faint, grow dim; दिशि मन्दायते तेजो दक्षिणस्यां रवेरपि R. 4. 49.

मन्दीकृ 8 U. 1 To weaken, diminish, relax, slacken; रथस्य मन्दीकृतो वेगः Ś. 1; मन्दीचकार मरणव्यवसायबुद्धिम् Ku. 4. 45; Ve. 1. 24.

मन्दीभू 1 P. 1 To become weak, be relaxed or slackened. –2 To grow less, diminish, subside, abate; अपि कालविप्रकर्षान्मन्दीभूतः पितृमरणशोकः Mv. 5; मन्दीभूतशोकः K. 63.

मन्दटः The coral tree.

मन्दनम् 1 Praise, eulogium. –2 Chatter of husband and wife (variant of मन्मनः); L. D. B.

मन्दयन्ती An epithet of Durgā.

मन्दर *a.* 1 Slow, tardy, dull. –2 Thick, dense; firm. –3 Large, bulky. **–रः** 1 N. of a mountain (used by the gods and demons as a churning stick when they churned the ocean for nectar); पृषतैर्मन्दरोद्धूतैः क्षीरोर्मय इवाच्युतम् R. 4. 27; अभिनवजलसुन्दर धृतमन्दर ए Git. 1; शोरैः मन्दरक्षुब्धक्षुभिताम्भोधिवर्णना Śi. 2. 107; Ki. 5. 30. –2 A necklace of pearls (of 8 or 16 strings). –3 Heaven. –4 A mirror. –5 One of the five trees in Indra's

paradise; see मन्दार. **-रम्** *ind.* Slowly, sluggishly. **-Comp. -आवासा, -वासिनी** Durgā.

मन्दसानः 1 N. of fire. -2 Life. -3 Sleep; (also written मन्दसानु).

मन्दाकः 1 A current, stream. -2 Praise.

मन्दाकिनी [मन्द+अकति अक्-णिनि] 1 The river Ganges; मन्दाकिनी भाति नगोपकण्ठे मुक्तावली कण्ठगतेव भूमेः R. 13. 48; Ku. 1. 29. -2 The river of heaven, celestial Ganges (मन्दाकिनी वियद्गङ्गा); मन्दाकिन्याः सलिलशिशिरैः सेव्यमाना मरुद्भिः Me. 69.

मन्दामणिः A big jar, earthern water vessel; Gīrvāṇa.

मन्दारः [मन्द्-आरक्] 1 The coral tree, one of the five trees in Indra's paradise; हस्तप्राप्यस्तवकनमितो बालमन्दारवृक्षः Me. 77, 69; V. 4. 35; वृन्दारकारिविजये सुरलोकलब्धमन्दारमाल्यमधुवासितवासभूमिः Rām. Ch. -2 The plant called Arka, Calotropis Gigantea -3 The Dhattūra plant. -4 Heaven. -5 An elephant. **-रम्** A flower of the coral tree; विनिद्रमन्दाररजोरुणाङ्गुली Ku. 5. 80; R. 6. 23. **-Comp. -माला** a garland of Mandāra flowers; मन्दारमाला हरिणा पिनद्धा Ś. 7. 2. **-षष्ठी** and **-सप्तमी** the sixth and seventh days in the bright half of Māgha.

मन्दारकः, -मन्दारवः, -मन्दारुः The coral tree; see मन्दार.

मन्दिकुकुरः A kind of fish (also read as मल्लिकुल्कुडः).

मन्दिमन् *m.* [मन्द-इमनिच्] 1 Slowness, tardiness. -2 Dulness, stupidity, folly.

मन्दिरम् [मन्द्यतेऽत्र मन्द् किरच्] A dwelling house, habitation, place, mansion; प्रावेशयन्मन्दिरमृद्धमेनम् Ku. 7. 55; Bk. 8. 96; R. 12. 83; मणिमयमन्दिरमध्ये पश्यति पिपीलिका छिद्रम् Subhāṣ. -2 An abode, a dwelling in general; as in क्षीराब्धिमन्दिरः. -3 A town; विनिक्षिप्य बलं सर्वं बहिरन्तश्च मन्दिरे Rām. 6. 12. 3. -4 A camp. -5 A temple. -6 The body. **-रः** 1 The sea. -2 The hollow of the knee, ham. **-Comp. -पशुः** a cat. **-मणिः** an epithet of Śiva.

मन्दिरा A stable.

मन्दुरकम् A kind of mat; Buddh.

मन्दुरा [मन्द् उरच् Uṇ. 1. 38] 1 A stable for horses, a stable in general; प्रभ्रष्टोऽयं प्लवङ्गः प्रविशति नृपतेर्मन्दिरं मन्दुरायाः Ratn. 2. 2; R. 16. 41; क्षुराग्रलैः क्षोभितमन्दुरोदरम् N.; मन्दुरायां निरुद्धोऽपि विद्रुतोऽभूद्धरिर्हरेः Śiva B. 21. 74. -2 A bed, mattress. **-Comp. -पतिः, -पालः** the manager of a stable; a groom; शुश्राव...... । असौ परस्परालापं मन्दुरायामपालयोः Dharmābhyudayamahākāvya 2. 42. **-भूषणम्** a species of monkey.

मन्द्र *a.* [मन्द् रक् Uṇ. 2. 13] Low, deep, grave, hollow, rumbling (as sound); पयोदमन्द्रध्वनिना धरित्री Ki. 16. 3; 7. 22; Me. 101; R. 6. 56. -2 Ved. Delightful, pleasing, pleasant; एवं ब्रुवाणे वैकुण्ठे भृगुस्तन्मन्द्रया गिरा Bhāg. 10. 89. 13. -3 Praiseworthy. **-न्द्रः** 1 A deep sound, low tone. -2 A kind of drum. -3 A kind of elephant; 'भद्रा मन्द्रा मृगाश्चेति विज्ञेयास्त्रिविधा गजाः'; cf. Rām. 1. 6. 25.

मन्धातृ *m.* Ved. 1 An intelligent man. -2 A devout or pious man.

मन्मथः 1 Cupid, the god of love; मन्मथो मां मथ्नन्निजनाम सान्वयं करोति Dk. 1; Me. 75; न मन्मथस्त्वं स हि नास्तिमूर्तिः N. 8. 29. -2 Love, passion; प्रबोध्यते सुप्त इवाद्य मन्मथः Ṛs. 1. 8; so परोक्षमन्मथः जनः Ś. 2. 19. -3 The wood apple. -4 N. of a संवत्सर. **-था** N. of Dakṣāyaṇī. *-a.* Enchanting, attractive; साक्षान्मन्मथमन्मथः Bhāg. 10. 32. 2. **-Comp. -आनन्दः** a kind of mango tree. **-आलयः** 1 the mango tree. -2 pudendum muliebre. **-कर** *a.* exciting love. **-बन्धुः** the moon. **-युद्धम्** amorous strife, sexual union, copulation. **-लेखः** a love letter; क्रान्तो मन्मथलेख एष नलिनीपत्रे नखैरर्पितः Ś. 3. 26.

मन्मथिन् *a.* Amorous, enamoured.

मन्मन् *n.* Ved. 1 Wish, desire. -2 Hymn, prayer &c.

मन्मनः 1 Confidential whispering (दंपत्योर्जल्पितं मन्दम्); करोति सहकारस्य कलिकोत्कलिकोत्तरं । मन्मनो मन्मनोऽप्येष मत्तकोकिलनिस्वनः Kāv. 3. 11. -2 The god of love.

मन्मनत्वम् A particular defect of the organs of speech.

मन्य *a.* (At the end of comp.) 1 Thinking oneself to be, as in पण्डितंमन्य. -2 Appearing as.

मन्या [मन्यतेऽनया मन्या गलपार्श्वशिरा P. III. 3. 59 Sk.] 1 The nape or back of the neck; दोषास्तु दुष्टास्त्रय एव मन्या Suśruta (also मन्याका). -2 Knowledge. **-Comp. -ग्रहः** Contraction of the neck. **-स्तम्भः** Stiffness of the neck.

मन्युः [मन्-युच् Uṇ. 3. 20] 1 Anger, wrath, resentment, indignation, rage; बाहुप्रतिष्टम्भविवृद्धमन्युः R. 2. 32, 49; 11. 46; नियमितमनोमन्युर्दृष्टा मया रुदती प्रिया Nāg. 2. 6. -2 Grief, sorrow, affliction, distress; निकृन्तन्मर्माणि क्रकच इव मन्युर्विरमति U. 4. 3; Ki. 1. 35; यास्यन् सुतस्तप्स्यति मां सुमन्युम् Bk. 1. 23; also 3. 49. -3 Wretched or miserable state, meanness. -4 A sacrifice; प्रसहेत रणे तवानुजान् द्विषतां कः शतमन्युतेजसः Ki. 2. 23. -5 Spirit, mettle, courage (as of horses). -6 Ardour, zeal. -7 Pride. -8 An epithet of Śiva. -9 Of Agni. **-Comp. -सूक्तम्** the hymns of Manyu (Ṛv. 10. 83 and 84).

मन्युमत् *a.* 1 Angry, wrathful. -2 Sorrowful, distressed. -3 Spirited, energetic; यशस्विनी मन्युमती कुले जाता विभावरी Mb. 5. 133. 2. -4 Vehement, passionate. *-m.* An epithet of Agni.

मप (पु) ष्टः, -ष्टकः A kind of bean.

मभ्र् 1 P. (मभ्रति) To go, move.

मम (Gen. sing. of अस्मद् the first personal pronoun) My, mine. **–Comp. –कारः, –कृत्यम्** interesting oneself about anything, self-interest.

ममता [मम भावः तल्] 1 The feeling of '*meum*', the sense of ownership, self-interest, selfishness. –2 Pride, arrogance, self-sufficiency. –3 Individuality. **–Comp. –युक्त** *a.* 1 a miser. –2 an egoist. **–शून्य** *a.* devoid of interest (for us).

ममत्वम् 1 Regarding as 'mine' or one's own, sense of ownership. –2 Affectionate regard, attachment to, regard for; क्षुद्रेऽपि नूनं शरणं प्रपन्ने ममत्वमुच्चैःशिरसां सतीव Ku. 1. 12. –3 Arrogance, pride; ममत्वं कृ 1 To be attached to. –2 To envy.

ममापतालः An object of sense.

मब् 1 P. To go, move.

मम्मटः N. of the author of the Kāvyaprakāśa.

मय् 1 Ā. (मयते) To go, move.

मय *a.* (–यी *f.*) An affix used to indicate 'made of', 'consisting or composed of', 'full of'; कनकमय, काष्ठमय, तेजोमय, जलमय &c. **–यः** 1 N. of a demon, the architect of the demons. (He built the 'three cities' for the demons; cf. त्रिपुर. He is also said to have built a splendid hall for the Pāṇḍavas); सानन्दं देवताभिर्मयपुरदहने धूर्जटिः पातु युष्मान् Ve. 1. 3. –2 A horse. –3 A camel- –4 A mule. **–या** Medical treatment. **–यी** A mare.

मयटः A hut of grass or leaves.

मय (ष्ठु) ष्टः, –ष्टकः A kind of bean.

मयस् *n.* Ved. Pleasure, delight, satisfaction; सरस्वती नः सुभगा मयस्करत् Ṛv. 1. 89. 3. **–Comp. –भ (भु) व, –भु, –भू** *a.* causing pleasure, delighting; आपो हि ष्ठा मयोभुवः Ṛv. 10. 9. 1.

मयिवसु *a.* Good in me.

मयुः 1 A *Kinnara,* a celestial musician. –2 A deer, an antelope. **–Comp. –राजः** an epithet of Kubera.

मयूखः [मा ऊख मयादेशः Uṇ. 5. 25] 1 A ray of light, beam, ray, lustre, brightness; विसृजति हिमगर्भैरग्निमिन्दुर्मयूखैः Ś. 3. 4; R. 2. 46; Śi. 4. 56; Ki. 5. 5, 8. –2 Beauty. –3 A flame. –4 The pin of a sun-dial. **–Comp. –ईशः, –मालिन्** the sun.

मयूखिन् *a.* Radiant, brilliant.

मयूरः [मी ऊरन् Uṇ 1. 67] 1 A peacock; स्मरति गिरिमयूर एष देव्याः U. 3. 20; फणी मयूरस्य तले निषीदति Ṛs. 1. 13. –2 A kind of flower. –3 N. of a poet (author of the सूर्यशतक); यस्याश्चोरश्चिकुरनिकरः कर्णपूरो मयूरः P. R. 1. 22. –4 A kind of instrument for measuring time. –5 (In music) A kind of gait. **–री** A pea-hen; (Proverb:- वरं तत्कालोपनता तित्तिरी न पुनर्दिवसान्तरिता मयूरी Vb. 1., or वरमद्य कपोतो न श्वो मयूरः 'a bird in the hand is worth two in the bush'). **–रम्** A particular posture in sitting. **–Comp. –अरिः** a lizard. **–उल्लासकः** the rainy season. **–केतुः** an epithet of Kārtikeya. **–गतिः** N. of a metre. **–ग्रीवकम्** blue vitriol. **–घृतम्** a kind of medicine. **–चटकः** the domestic cock. **–चूडा** 1 a peacock's crest. –2 =मयूरीशिखा q. v. **–तुत्थम्** blue vitriol. **–नृत्यम्** the dance of a peacock; a position comparable to it; तदेतन्मयूरनृत्यमापद्यते। तद्यथा मयूरस्य नृत्यतोऽन्यदपात्रियतेऽन्यत् संत्रियते। एवमिहापि इदं संत्रियते तदपात्रियते। ŚB. on MS. 7. 4. 10. **–पत्रिन्** *a.* feathered with peacock's feathers (as an arrow); जहार चान्येन मयूरपत्रिणा शरेण शक्रस्य महाशनिध्वजम् R. 3. 56. **–पदकम्** a scratch in the form of a peacock's foot (made with the fingernails). **–पिच्छम्** a peacock's tail or feather. **–रथः** an epithet of Kārtikeya. **–व्यंसकः** a cunning peacock. **–शिखा** 1 a peacock's crest. –2 a cock's comb. –3 N. of a medicinal plant, Celosia Cristata; cf. नीलकण्ठशिखा लघ्वी पित्तश्लेष्मातिसारजित् Bhāva.P.; Mātaṅga L. 10.10. **–सारिन्** *a.* strutting like a peacock.

मयूरकः 1 A peacock. –2 A cock's comb. **–कः, कम्** Blue vitriol.

मयूरिका *f.* 1 A nose-ring; मनोज्ञनासिकान्यस्तचित्ररत्नमयूरिकाम् Śiva B. 20. 5. –2 A kind of venomous insect. –3 Hibiscus Cannabinus (Mar. भेंडी, अंबाडी).

मरः Ved. 1 Death. –2 The earth.

मरकः [मृ-वुन्] A plague, murrain, pestilential disease, an epidemic.

मरकतम् [मरकं तरत्यनेन तृ-ड] An emerald; वापी चास्मिन् मरकतशिलाबद्धसोपानमार्गा Me. 78; Śi. 4. 56; Ṛs. 3. 21; (sometimes written मरक्त.) **–Comp. –मणिः** *m., f.* an emerald. **–शिला** an emerald slab. **–श्याम** *a.* dark or green as an emerald.

मरणम् [मृ-भावे ल्युट्] 1 Dying, death; मरणं प्रकृतिः शरीरिणाम् R. 8. 87; or संभावितस्य चाकीर्तिर्मरणादतिरिच्यते Bg. 2. 34. –2 A kind of poison. –3 Passing away, cessation (as of rain). –4 (In astrol.) The 8th mansion. –5 A refuge, asylum. **–Comp. –अन्त, –अन्तक** *a.* ending in death. **–अभिमुख, –उन्मुख** *a.* on the point of death, near death, moribund. **–आत्मक** *a.* causing death, fatal. **–दशा** the time or hour of death. **–धर्मः** the law of death. **–धर्मन्** *a.* mortal. **–निश्चय** *a.* determined to die; Pt. 1. **–मण्डनम्** Wearing dress and ornamants as a Satī usually wears; अथ मदम्बा मरणमण्डनमनुष्ठाय Dk. 2. 10, 4. **–शील** *a.* mortal.

मरतः Death.

मरणीय, –मरिष्णु *a.* Mortal.

मरिमन् *m.* Death, dying

मरन्द, -न्दकः The juice of flowers; अयि दलदरविन्द स्यन्दमानं मरन्दं तव किमपि लिहन्तो मञ्जु गुञ्जन्तु भृङ्गाः Bv. 1. 5, 10, 15. **-Comp. -ओकस्** *n.* a flower.

मरारः A granary.

मराल *a.* [मृ-आलच्] 1 Soft, greasy, unctuous. -2 Bland, tender. **-लः** (**-ली** *f.*) A swan, flamingo, goose; मरालकुलनायकः कथय रे कथं वर्तताम् Bv. 1. 3; विधेहि मरालविकारम् Gīt. 11; N. 6. 72. -2 A kind of duck (कारण्डव). -3 A horse. -4 A cloud. -5 Collyrium. -6 A grove of pomegranate trees. -7 A rogue, cheat. -8 A particular mode of joining the hands.

मरालकः A gander, swan.

मरालिका N. of a plant and its pod (Mar. शिककाई); Gīrvāṇa.

मरि (री) चः The pepper-shrub. **-चम्** Black pepper; खर्जूरं मरिचं पूगं देवदारु च नागरम् Śiva B. 30. 16; N. 18. 118.

मरीचिः (Rarely मरीची also) *m. f.* [मृ-इनि Uṇ. 4. 70] 1 A ray of light; न चन्द्रमरीचयः V. 3. 10; सवितुर्मरीचिभिः Ṛs. 1. 16; R. 9. 13; 13. 4. -2 A particle of light. -3 Light. -4 Mirage. -5 A spark of fire; मरीच्य इव निष्पेतुरग्नेर्धूमाकुलार्चिषः Rām. 1. 56. 18. **-चिः** 1 N. of a Prajāpati, one of the ten patriarchs created by the first Manu, or one of the ten mindborn sons of Brahman; he was father of Kaśyapa. -2 N. of a lawgiver. -3 N. of Kṛṣṇa. -4 A miser. **-Comp. -गर्भ** *a.* containing particles of light (N. of a world). **-तोयम्** a mirage; मरीचितोयान्यभिधावति क्वचित् Bhāg. 5. 13. 5. **-प** *a.* drinking in particles of light; वैखानसा वालखिल्याः संप्रक्षाला मरीचिपाः (तापसाः) Rām. 3. 6. 2. **-मालिन्** *a.* encircled by rays, radiant, shining. (*-m.*) the sun.

मरीचिका Mirage.

मरीचिन्, मरीचिमत् *a.* Radiant, lustrous. *-m.* The sun.

मरीमृज *a.* Repeatedly rubbing.

मरीसम् Milk.

मरुः [म्रियन्तेऽस्मिन् भूतानीति मरुः निर्जलदेशः, मृ-उ Uṇ. 1. 7] 1 A desert, sandy desert, a wilderness, any region destitute of water. -2 A mountain or rock. -3 A kind of plant (कुरबक). -4 Abstinence from drinking; मरुं साधयतो राजन् नाकपृष्ठमनाशके Mb. 13. 57. 14; 142. 44. *-m.* pl. N. of a country or its inhabitants. **-Comp. -उद्भवा** 1 the cotton shrub. -2 a cucumber. **-कच्छः** N. of a district. **-जः** a kind of perfume. **-जुष्, -भवः** the inhabitant of a desert. **-देशः** 1 N. of a district. -2 any region destitute of water. **-देश्यः** bdellium. **-द्विपः, -प्रियः** a camel. **-धन्वः, -धन्वन्** *m.* a wilderness, desert. **-पथः, -पृष्ठम्** a sandy desert, wilderness; मरुपृष्ठान्युदम्भांसि (चकार) R. 4. 31. **-प्रपतनम्** the act of throwing one's self from a rock; Mark. P. 40. 3. **-भू** (pl.) the country called Mārwār. **-भूमिः** *f.* a desert, sandy desert. **-भूरुह्, -हः** a tree in the desert; सत्पुंसो मरुभूरुह इव जीवनमात्रमाशास्यम् Aryā. S. **-संभवः** a kind of horse-radish. **-स्थलम्, -स्थली** a wilderness, desert, waste; तत् प्राप्नोति मरुस्थलेऽपि नितरां मेरौ ततो नाधिकम् Bh. 2. 49; मरुस्थल्यां यथा वृष्टिः क्षुधार्ते भोजनं तथा H. 1. 11.

मरुकः 1 A peacock. -2 A deer, antelope.

मरुटा, मरुण्डा A woman with a high forehead.

मरुत् *m.* [मृ-उति Uṇ. 1. 94] 1 Wind, air, breeze; दिशः प्रसेदुर्मरुतो ववुः सुखाः R. 3. 14. -2 Vital air or breath, life-wind; (वशमनयत्) अपरः प्रणिधानयोग्यया मरुतः पञ्च शरीरगोचरान् R. 8. 19; Ku. 3. 48. -3 The god of wind; इति दर्शितविक्रियं सुतं मरुतः कोपपरीतमानसम् Ki. 2. 25. -4 A god, deity; वैमानिकानां मरुतामपश्यदाकृष्टलीलान्नरलोकपालान् R. 6. 1; 12. 101. -5 A kind of plant (मरुबक). -6 Gold. -7 Beauty. *-n.* A kind of plant (ग्रन्थिपर्ण). **-Comp. -आन्दोलः** a kind of fan (of a deer's or buffalo's skin). **-इष्टम्** bdellium. **-करः** a kind of bean. **-कर्मन्** *n.*, **-क्रिया** flatulency. **-कोणः** the northwest quarter. **-गणः** the host of the gods. **-तनयः, -पुत्रः, -सुतः, -सूनुः** 1 epithets of Hanumat. -2 of Bhīma; पृषात्मजो मर्मसु निर्बिभेद मरुत्सुतं चायुतशः शराग्र्यैः Mb. 8. 89. 76. **-ध्वजम्** the down of cotton floating in the air. **-पटः** a sail. **-पतिः, -पालः** an epithet of Indra; Bhāg. 3. 19. 25. **-पथः** sky, atmosphere. **-प्लवः** a lion. **-फलम्** hail. **-बद्धः** 1 an epithet of Viṣṇu. -2 a kind of sacrificial vessel. **-रथः** 1 a car in which idols of gods are moved about. -2 a horse. **-लोकः** the world of the Maruts. **-वर्त्मन्** *n.* sky, atmosphere. **-वाहः** 1 an epithet of fire. -2 of Indra. **-वृद्धा, -वृधा** The river Kāverī; अभ्रंलिहानहह पश्य मरुद्वृधायाः Viś. Guṇā. 448.

मरुतः 1 Wind. -2 A god.

मरुत्तः N. of a king of the solar race, who is said to have performed a sacrifice in which the gods took the part of waiters &c.; cf. तदप्येष श्लोकोऽभिगीतो मरुतः परिवेष्टारो मरुत्तस्यावसन् गृहे। आविक्षितस्य कामप्रेर्विश्वेदेवाः सभासद इति ॥

मरुत्तकः The Marubaka plant.

मरुत्वत् *m.* 1 A cloud. -2 N. of Indra; महेन्द्रमोक्षं विजयं मरुत्वतः Bhāg. 6. 13. 22; Ki. 13. 67. -3 N. of Hanumat.

मरुल् In comp. for मरुत्. **-लोकः** the world of the gods.

मरुलः 1 A kind of duck. -2 A beast of prey. **-लम्** Water.

मरुवः 1 N of a plant; see मरुवक. -2 An epithet of Rāhu.

मरुव (ब) क *a.* Terrible, formidable. **-कः** 1 A kind of plant (Marjoram) and flower also; नितोतसंधौ नवमरुवके

वर्तते पुष्पकार्यम्. –2 A variety of lime. –3 A tiger. –4 Rāhu. –5 A crane.

मरूकः 1 A peacock. –2 A kind of stag. –3 A frog.

मरोलिः, –लिकः The sea-monster Makara.

मर्क *a.* Ved. 1 Cleaning, purifying. –2 Perishing, dying away. **–र्कः** 1 The vital breath, life-wind. –2 An ape, a monkey; मर्कान् भोक्ष्यन् विभजति स चेत्राति भाण्डं भिनत्ति Bhāg 10. 8. 29.

मर्ककः A spider.

मर्कटः 1 An ape, a monkey; हारं वक्षसि केनापि दत्तमज्ञेन मर्कटः । लेढि जिघ्रति संक्षिप्य करोत्युन्नतमासनम् Bv. 1. 99. –2 A spider. –3 A kind of crane. –4 A kind of coitus or mode of sexual enjoyment. –5 A kind of poison. **–टी** 1 A female ape. –2 N. of various plants. –3 An iron bolt. **–Comp. –आस्य** *a.* monkey-faced. (**–स्यम्**) copper. **–इन्दुः** ebony. **–कर्ण** *a.* monkey-eared. **–तिन्दुकः** a kind of ebony. **–पिप्पली** the Apāmarga tree. **–न्यायः** the mokey-rule (opp. to मार्जारन्यायः). **–पोतः** a young monkey. **–वासः** a cobweb. **–शीर्षम्** vermilion.

मर्कटकः 1 An ape. –2 A spider. –3 A kind of fish. –4 A kind of grain.

मर्करा 1 A pot, vessel. –2 A subterranean hole, cavity, cavern, hollow. –3 A barren woman.

मर्च् 10 U. (मर्चयति-ते) 1 To take. –2 To cleanse. –3 To sound. –4 To go, move. –5 Ved. To threaten, menace. –6 To injure, hurt. –7 To endanger, imperil.

मार्जि (ज्जि) का (ता) A king of dish (Mar. श्रीखंड); Gīrvāṇa.

मर्जः 1 A washerman. –2 A catamite. –*f.* Cleansing, washing, purification.

मर्तः [मृ-तन्] 1 A man, human being, mortal. –2 The earth, the world of mortals.

मर्तव्यम् Death (being inevitable); रावणाद्विनिवृत्तार्था मर्तव्ये कृतनिश्चया Rām. 5. 58. 61.

मर्त्य *a.* [मर्ते-भवः यत्] Mortal. **–र्त्यः** 1 A mortal, a human being, man; शौचाशौचं हि मर्त्यानां लोकेशप्रभवाप्ययम् Ms. 5. 97. –2 The world of mortals, the earth. **–र्त्यम्** The body; अन्ने प्रलीयते मर्त्यमन्नं धानासु लीयते Bhāg. 11. 24. 22. **–Comp. –धर्मः** mortality. **–धर्म (र्मि) न्** *a.* mortal, any human being; किं पुनर्मर्त्यधर्मिणः Mb. 3. 32. 56; न कश्चिदासायते मर्त्यधर्मा K. **–निवासिन्** *m.* a mortal, human being. **–भावः** human nature. **–भुवनम्** the earth. **–महितः** a god. **–मुखः** a *kinnara*, a being having the face of a man and the figure of an animal, and regarded as an attendant of Kubera. **–लोकः** the world of mortals, the earth; क्षीणे पुण्ये मर्त्यलोकं विशन्ति Bg. 9. 21.

मर्द *a.* [मृद्-घञ्] Crushing, pounding, grinding, destroying &c. (at the end of comp.). **–र्दः** 1 Grinding, pounding. –2 A violent stroke, friction; सूर्यं हतप्रभं पश्य ग्रहमर्दं मिथो दिवि Bhāg. 1. 14. 17. –3 A kind of instrument useful for calculation about eclipses.

मर्दक *a.* = मर्द.

मर्दन *a.* (**–नी** *f.*) [मृद्-ल्यु ल्युट् वा] Crushing, grinding, destroying, tormenting, rubbing, &c.; सलक्ष्मणं राघवमाजिमर्दनम् Rām. 5. 37. 67. **–नम्** 1 Crushing, grinding. –2 Rubbing, shampooing; मर्दनं गुणवर्धनम्. –3 Anointing (with unguents &c.). –4 Pressing, kneading. –5 Paining, tormenting, afflicting. –6 Destroying. –7 Devastating, laying waste. –8 Opposition of planets. –9 Breaking up (as of ice &c.).

मर्दित *a.* 1 Crushed, pounded. –2 Rubbed. –3 Strung or tied together.

मर्दलः A kind of drum; कृतसमार्जनमर्दलमण्डलध्वनिजया Śi. 6. 31; तडित्पताकोऽशनिशब्दमर्दलः Ṛs. 2. 1.

मर्दिनी A kind of musical composition.

मर्ब् 1 P. (मर्बति) To go, move.

मर्मन् *n.* [मृ-मनिन्] 1 (*a*) A vital part of the body, the vitals, weak or tender point of the body); तथैव तीव्रो हृदि शोकशङ्कुर्मर्माणि कृन्तन्नपि किं न सोढः U. 3. 35; Y. 1. 153; Bk. 16; स्वहृदयमर्मणि वर्म करोति Gīt. 4. (*b*) Any vital member or organ. –2 Any weak or vulnerable point, a defect, failing; तेऽन्योन्यमभिसंसृत्य क्षिपन्तो मर्मभिर्मिथः Bhāg. 8. 10. 27. –3 The core, quick. –4 Any joint (of a limb). –5 The secret or hidden meaning, the pith or essence (of anything); काव्यमर्मप्रकाशिका टीका; नत्वा गङ्गाधरं मर्मप्रकाशं तनुते गुरुम्—नागेशभट्ट. –6 A secret, a mystery. –7 Truth. **–Comp. –अतिग** *a.* piercing deeply into the vital parts; तथा मर्मातिगैर्भीष्मो निजघान महारथान् Mb. 6. 90. 85; मर्मातिगैरनृजुभिर्नितरामशुद्धैर्वाक्सायकैरथ ततोद तदा विपक्षः Śi. 20. 77. **–अन्वेषणम्** 1 probing the vital parts. –2 seeking weak or vulnerable points. **–आवरणम्** an armour, a coat of mail. **–आविध्, –उपघातिन्** *a.* piercing the vitals (of the heart); अपि मर्माविधो वाचः सत्यं रोमाञ्चयन्ति माम् Mv. 3. 10; चिरं क्लिशित्वा मर्माविध् (v. l. मर्मविद्) रामो विलुभितप्लवम् Bk. 5. 52. **–कीलः** a husband. **–ग** *a.* piercing to the quick, very acute, poignant. **–घातः** wounding the vitals. **–घ्न** *a.* piercing the vitals, excessively painful. **–चरम्** the heart. **–छिद्, –भिद्** (so **–छेदिन्, –भेदिन्**) *a.* 1 piercing the vitals, cutting to the quick, excessively painful; प्रहरति विधिर्मर्मच्छेदी न कृन्तति जीवितम् U. 3. 31; Māl. 9. 12. –2 wounding mortally, mortal. **–जम्** blood. **–ज्ञ** *a.*, **–विद्** *a.* 1 knowing the weak or vulnerable points of another; Pt. 1. 248. –2 knowing the most secret portions of a subject. –3 knowing secrets or mysteries. –4 having a deep insight into anything, exceedingly acute or clever. (**–ज्ञः**) any acute or learned man; ते ह्यस्य मर्मज्ञभयात् नापराध्यन्ति Kau. A. 1. 8. **–ज्ञानम्** knowledge of a secret. **–त्रम्** a coat of mail. **–पारग** *a.* having a deep insight

into, thoroughly conversant with, one who has entered into the secret recesses of anything. **–पीडा** pain in the inmost soul. **–भेदः** 1 piercing the vitals. –2 disclosing the secrets or vulnerable points of another. **–भेदनः, –भेदिन्** *m.* an arrow. **–विद्** see मर्मज्ञ. **–संधिः** *m.* (pl.) joints and articulations. **–स्थलम्, –स्थानम्** 1 a sensitive or vital part. –2 a weak or vulnerable point. **–स्पृश्** *a.* 1 piercing the vitals, stinging to the quick; त एते हृदयमर्मस्पृशः संसारभावाः U. –2 very cutting, poignant, sharp or stinging (words &c.).

मर्मिक *a.* 1 Knowing secrets or weak points. –2 Very acute, intelligent; see मर्मज्ञ.

मर्मर *a.* [मृ-अरन् मुट् च] 1 Rustling (leaves, garments &c.); तीरेषु तालीवनमर्मरेषु R. 6. 57; 4. 73; 19. 41; मदोद्धताः प्रत्यनिलं विचेरुर्वनस्थलीर्मर्मरपत्रमोक्षाः Ku. 3. 31. –2 Murmuring. **–रः** 1 A rustling sound. –2 A murmur. –3 A kind of garment. **–रा** Coarse ground meal.

मर्मरायते Den. Ā. To rustle, murmur.

मर्मरी 1 A species of pine tree. –2 Turmeric. –3 A particular vein in the external ear.

मर्मरीकः 1 A poor man, pauper. –2 A wicked man.

मर्य *a.* Ved. Mortal. **–र्यः** 1 A man. –2 A young man. –3 A male. –4 A lover, suitor. –5 A stallion, horse. –6 A camel.

मर्यकः Ved. 1 A little man. –2 A male in general; के मे मर्यकं वि यवन्त Ṛv. 5. 2. 5.

मर्या 1 A limit, boundary.

मर्यादा [मर्यायां सीमायां दीयते दा-घञर्थे क] 1 A limit, boundary (fig. also); bound, border, frontier, verge; मर्यादाव्यतिक्रमः Pt. 1. –2 End, termination, terminus. –3 A shore, bank. –4 A mark, land-mark. –5 The bounds of morality, any fixed usage or established rule, moral law; मर्यादानां च लोकस्य कर्ता कारयिता च सः Rām. 5. 35. 11. –6 A rule of propriety or decorum, bounds or limits of propriety, propriety of conduct; आस्तातापवादभिन्नमर्याद U. 5; मर्यादायाममर्यादाः स्त्रियस्तिष्ठन्ति सर्वदा Pt. 1. 142. –7 A contract, covenant, an agreement; गृह्यतां पाणिना पाणिर्मर्यादा बध्यतां ध्रुवा Rām. 4. 5. 11. **–Comp. –अचलः, –गिरिः, –पर्वतः** a frontier-mountain. **–धावनम्** running towards a mark. **–बन्धः** keeping within limits; Buddh. **–भेदकः** a destroyer of land-marks; मर्यादाभेदकश्चैव विकृतं प्राप्नुयाद्वधम् Ms. 9. 291. **–वचनम्** statement of the limit; P. III. 3. 136. **–व्यतिक्रमः** overstepping limits.

मर्यादिन् *a.* Keeping within bounds. *–m.* A neighbour, borderer; Nir. 4. 2.

मर्यादीकृ 8 U. To make anything a limit, to reach, attain to, go as far as; as in मरणं मर्यादीकृत्य आमरणम्.

मर्व् 1 P. (मर्वति) 1 To go, move. –2 To fill. *–Caus.* To sound.

मर्शः [मृश्-घञ्] 1 Deliberation. –2 Advice, counsel. –3 A sternutatory.

मर्शनम् 1 Rubbing. –2 Examination, inquiry. –3 Consideration, deliberation. –4 Advising, counselling. –5 Removing, rubbing off. –6 Explaining. –7 Touching (a woman); परस्वहारे परदारमर्शने Mb. 3. 314. 29.

मर्षः, –र्षणम् [मृष्-घञ् ल्युट् वा] Endurance, forbearance, patience; द्विषतामुदयः सुमेधसा गुरुरस्वन्ततरः सुमर्षणः Ki. 2. 8; A. Rām. 7. 4. 52.

मर्षित *p. p.* 1 Endured, patiently borne or endured. –2 Excused, forgiven. **–तम्** Endurance, patience.

मर्षिन् *a.* Enduring, forbearing.

मर्षीका A kind of metre.

मल् 1 Ā., 10 U. (मलते, मलयति-ते) To hold, possess.

मल *a.* [मृज्यते शोध्यते मृज्-कल टिलोपः Tv.] 1 Dirty, foul; आमिषं यच्च पूर्वेषां राजसं च मलं भृशम् Rām. 7. 74. 16. –2 Mean, covetous. –3 Unbelieving, infidel, godless. –4 Wicked. **–लः, –लम्** 1 Dirt, filth, impurity, dust, any impure matter; मलदायकाः खलाः K. 2; छाया न मूर्छति मलोपहतप्रसादे शुद्धे तु दर्पणतले सुलभावकाशा Ś. 7. 32. –2 Dregs, refuse, sediment, excrement, feces, dung. –3 Dross (of metals), rust, alloy. –4 Moral taint or impurity, sin; फलैधःकुसुमस्तेयमधैर्यं च मलावहम् Ms. 11. 70. –5 Any impure secretion of the body; (according to Manu these excretions are twelve:— वसा शुक्रमसृङ् मज्जा मूत्रविड् घ्राणकर्णविट्। श्लेष्माश्रुदूषिका स्वेदो द्वादशैते नृणां मलाः Ms. 5. 135). –6 Camphor. –7 Cuttle-fish bone. –8 Tanned leather; a leather-garment. –9 The three humours of the body (वात, पित्त and कफ). **–लम्** A kind of base metal. **–Comp. –अपकर्षणम्** 1 removing the dirt, purification. –2 removal of sin. **–अपहा** 1 a particular preparation. –2 N. of a river; नन्दिनी नलिनी सीता मालती च मलापहा. **–अयनम्** the rectum. **–अरिः** a kind of natron. **–अवरोधः** constipation of the bowels. **–आकर्षिन्** *m.* a sweeper, a scavenger. **–आभ** *a.* dirty-looking. **–आवह** *a.* 1 causing dirt, dirtying, soiling. –2 defiling, polluting; Ms. 11. 70. **–आशयः** the stomach; bowels. **–उद्भवम्** the rust of iron (मण्डूर). **–उत्सर्गः** evacuation of the feces, voiding the excrement. **–उद्वासा** a woman who has put off her soiled clothes. **–उपहत** *a.* soiled, tarnished with dirt; Ś. 7. 32. **–कर्षण** *a.* cleansing. **–घ्न** *a.* cleansing, detergent. (**–घ्नः**) the bulbous root of शाल्मली. (**–घ्नी**) N. of a plant (नागदमनी). **–जम्** pus, matter. **–दूषित** *a.* dirty, foul, soiled. **–द्रवः** purging, diarrhœa. **–द्राविन्** *a.* purging. (*–m.*) the Jayapāla tree. **–धात्री** a nurse who attends to a child's necessities. **–धारिन्** *m.* a religious mendicant of the Jaina sect. **–पङ्किन्** *a.* covered with dust and mire; निराहारा कृशा रूक्षा जटिला मलपङ्किनी Mb. 5. 186. 20. **–पूः (यूः)** Ficus Oppositifolia (Mar. काळा किंवा धेडउंबर). **–पृष्ठम्** the first (or outer) page of a book.

–भुज् *m.* a crow. –मल्लकः a strip of cloth covering the privities (कौपीन); Dk. 2. 2. –मासः an intercalary month (so called because during that month religious ceremonies are not performed); 'अमावास्याद्वयं यत्र रविसंक्रान्तिवर्जितम्। मलमासः स विज्ञेयः...' –सूत्रपरित्यागः evacuation of feces and urine. –वासस् *f.* a woman in her courses. –विशोधन *a.* cleansing away filth. –विष्टम्भः constipation. –विसर्गः, –विसर्जनम्, –शुद्धिः *f.* evacuation of the bowels. –हन्तृ *m.* = मलघ्नः. –हारक *a.* removing dirt or sin.

मलवत् *a.* Dirty, foul, filthy. –ती A menstruous woman. –Comp. –वासस् *f.* a menstruous woman; प्रागपरोधान्मलवद्वाससः MS. 3. 4. 18.

मलनम् Crushing, grinding. –नः A tent.

मलयः 1 N. of a mountain range in the south of India, abounding in sandal trees; (poets usually represent the breeze from the Malaya mountain as wafting the odour of sandal trees and other plants growing thereon, which peculiarly affects persons who are smit with love); स्तनाविव दिशस्तस्याः शैलौ मलयदर्दुरौ R. 4. 51; 9. 25; 13. 2; विना मलयमन्यत्र चन्दनं न प्ररोहति Pt. 1. 41; मलये भिल्लपुरन्ध्री चन्दनतरुकाष्ठमिन्धनं कुरुते Subhāṣ. –2 N. of the country lying to the east of the Malaya range, Malabar. –3 A garden. –4 The garden of Indra. –5 The side of a mountain. –6 (In music) A kind of measure. –Comp. –अचलः, –अद्रिः, –गिरिः, –पर्वतः &c. the Malaya mountain. –अनिलः, –वातः, –समीरः the wind blowing from the Malaya mountain, south-wind; ललितलवङ्गलतापरिशीलनकोमलमलयसमीरे Gīt. 1; cf. अपगतदाक्षिण्य दक्षिणानिलहतक पूर्णास्ते मनोरथाः कृतं कर्तव्यं वहेदानीं यथेष्टम् K.; Dk. 1. 1. –उद्भवम् sandal-wood. –जः a sandal tree; अयि मलयज महिमायं कस्य गिरामस्तु विषयस्ते Bv. 1. 11. (–जः, –जम्) sandal-wood. (–जम्) an epithet of Rāhu. °रजस् *n.* the dust of sandal. –द्रुमः a sandal tree. –वासिनी an epithet of Durgā.

मलाका 1 An amorous or lustful woman. –2 A female messenger, confidante. –3 A female elephant.

मलिः *f.* Possession, enjoyment.

मलिकः A king.

मलिन *a.* [मल अस्त्यर्थे इनन्] 1 Dirty, foul, filthy, impure, unclean, soiled, stained, sullied (fig. also); धन्यास्तदङ्गरजसा मलिनीभवन्ति Ś. 7. 17; किमिति मुधा मलिनं यशः कुरुध्वे Ve. 3. 4. –2 Black, dark (fig. also); मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति Ś. 1. 20; अतिमलिने कर्तव्ये भवति खलानामतीव निपुणा धीः Vās; Śi. 9. 18. –3 Sinful, wicked, depraved; धियो हि पुंसां मलिना भवन्ति H. 1. 26; मलिनाचरितं कर्म सुरभेर्नन्वसांप्रतम् Kāv. 2. 178. –4 Low, vile, base; लघवः प्रकटीभवन्ति मलिनाश्रयतः Śi. 9. 23. –5 Clouded, obscured. –नम् 1 Sin, fault, guilt. –2 Butter-milk. –3 Borax. –4 A dirty cloth; ततो मलिनसंवीतां राक्षसीभिः समावृताम् Rām. 5. 15. 18. –ना, –नी A woman during menstruation. –Comp. –अम्बु *n.* 'black water', ink. –आस्य *a.* 1 having a dirty or black face. –2 low, vulgar. –3 savage, cruel. –प्रभ *a.* obscured, soiled, clouded. –मुख *a.* =मलिनास्य q. v. (–खः) 1 fire. –2 a ghost, an evil spirt. –3 a kind of monkey (गोलाङ्गूल).

मलिनता, –त्वम् 1 Dirtiness, filthiness. –2 Sinfulness, wickedness, depravity, corruption.

मलिनयति Den. P. 1 To make dirty, soil, stain, defile, sully, spoil (fig. also); वक्त्रोष्मणा मलिनयन्ति पुरोगतानि R. 5. 73; यदा मेधाविनी शिष्योपदेशं मलिनयति तदाचार्यस्य दोषो ननु M. 1 'stains or brings discredit on' &c. –2 To corrupt, deprave.

मलिनित *a.* 1 Dirty, soiled. –2 Corrupt. –3 Wicked, depraved.

मलिनिमन् *m.* [मलिन-इमनिच्] 1 Dirtiness, foulness, impurity. –2 Blackness, darkness; मलिनिमालिनि माधवयोषिताम् Śi. 6. 4. –3 Moral impurity, sin.

मलिनीकृ 8 U. 1 To soil, stain. –2 To darken, obscure.

मलिनीभू 1 P. To become dirty or impure, be soiled.

मलिम्लुचः 1 A robber, thief; न परेषु महौजसश्छलादपकुर्वन्ति मलिम्लुचा इव Śi. 16. 52. –2 A demon. –3 A gnat, mosquito. –4 An intercalary month. –5 Air, wind. –6 Fire. –7 A Brāhmaṇa who neglects the five daily Yajñas or sacrifices. –8 The Chitraka tree. –9 Frost, snow.

मलिष्ठा A woman in her courses.

मलीमस *a.* [मल-ईमसच्] 1 Dirty, foul, impure, unclean, stained, soiled; मा ते मलीमसविकाररघना मतिर्भूत् Māl. 1. 32; R. 2. 53. –2 Dark, black, of a black colour; पणिता न जनारवैरवैदपि कूजन्तमलिं मलीमसम् N. 2. 92; महामनोमोहमलीमसान्धया K. 5; विसारितामजिहत कोकिलावलीमलीमसा जलदमदाम्बुराजयः Śi. 17. 57; 1. 38; Māl. 10. 4. –3 Wicked, sinful, wrong, unrighteous; मलीमसामाददते न पद्धतिम् R. 3. 46. –सः 1 Iron. –2 Green vitriol.

मलूकः A kind of worm; L. D. B.

मल्ल् 1 Ā. (मल्लते) To hold, possess.

मल्ल *a.* [मल्ल्-अच्] 1 Strong, athletic, robust; Ki. 18. 8. –2 Good, excellent. –ल्लः 1 A strong man. –2 An athlete, a boxer, wrestler; प्रभुर्मल्लो मल्लाय Mbh. –3 A drinking-vessel, cup. –4 The remnants of an oblation. –5 The cheek and temple. –6 N. of a mixed tribe (wrestlers) born of an outcast Kṣatriya by a Kṣatriya woman; झल्लो मल्लश्च राजन्याद् व्रात्यान्निच्छिविरेव च Ms. 10. 22; 12. 45. –7 N. of a country. –ल्ला 1 A woman. –2 The Arabian jasmine. –3 Ornamenting the person with cosmetics or coloured unguents. –Comp. –अरिः

1 an epithet of Krisṇa. –2 of Siva. –क्रीडा 1 boxing or wrestling match. –2 athletic or gymnastic exercise. –घटी a kind of dance. –जम् black pepper. –तालः (in music) a kind of measure. –तूर्यम् a kind of drum. –नागः 1 Indra's elephant. –2 a letter-carrier. –3 N. of वात्स्यायन, the author of कामसूत्र. –भूः, –भूमिः f. 1 a battle-field. –2 an arena, a wrestling ground. –3 N. of a country. –यात्रा 1 a procession of wrestlers. –2 a wrestling contest; L. D. B. –युद्धम् a wrestling or boxing match, pugilistic encounter. –विद्या the art of wrestling. –शाला a gymnasium.

मल्लकः 1 A lamp-stand. –2 An oil-vessel, a lamp-vesssel. –3 A lamp. –4 A cup made out of a cocoa-nut shell. –5 A tooth. –6 A kind of jasmine. –7 A bowl; मोदकमल्लकं निक्षिप्य Pratijñā. Y. 3.

मल्लारः N. of one of the six Rāgas.

मल्लारी *f.* N. of a Rāgiṇī.

मल्लिः, –ल्ली *f.* [मल्ल्-इन् वा ङीप्] A kind of jasmine; किं मल्लीमुकुलैः स्मितं विकसितं किं मालतीकुड्मलैः Rājendrakarṇa-pūra. –*m.* A Jain saint. –Comp. –गन्धि *n.* a kind of agallochum. –नाथः N. of a celebrated commentator who probably lived in the fourteenth or fifteenth century; (he has written commentaries on रघुवंश, कुमारसंभव, मेघदूत, किरातार्जुनीय, नैषधचरित, and शिशुपालवध). –पत्रम् a mushroom.

मल्लिकः, –मल्लिका 1 A kind of goose with brown legs and bill. –2 The month Māgha. –3 A shuttle. –4 N. of a musical instrument; L. D. B. –Comp. –अक्षः, –आख्यः 1 a kind of goose with brown legs and bill; एतस्मिन् मदकलमल्लिकाक्षपक्षव्याधूतस्फुरदुरुदण्डपुण्डरीकाः (भुवो विभागाः) U. 1. 31; Māl. 9. 14. –2 a particular breed of horses (with white spots on the eyes); पद्मपत्र-निभांश्वाश्वान् मल्लिकाक्षान् स्वलंकृतान् Mb. 7. 23. 6. (–क्षी) a female dog (with white spots on the eyes). –अर्जुनः N. of a *Liṅga* of Siva on the mountain Śrīśaila. –आख्या a kind of jasmine. –आमोदः a kind of measure.

मल्लिका 1 A kind of jasmine; वनेषु सायंतनमल्लिकानां विजृम्भणोद्गन्धिषु कुड्मलेषु R. 16. 47; वनमल्लिकामतल्लिकोद्वेल्लितधम्मिल्लः Bhāratachampū; मल्लिकाकुसुमदुण्डुभकेन N. 21. 43. –2 A flower of this jasmine; विन्यस्तसायंतनमल्लिकेषु (केशेषु) R. 16. 50; Kāv. 2. 215. –3 A lamp-stand. –4 An earthen vessel of a particular form. –Comp. –गन्धम् a kind of agallochum. –छद्, –छदनम् *n.* a shade for a lamp.

मल्लीकरः A thief.

मल्लुः A bear.

मल्लूरः Rust of iron.

मव् 1 P. (मवति) To fasten, bind.

मवित *p. p.* Bound, strung, tied.

मव्य् 1 P. (मव्यति) To bind.

मश् 1 P. (मशति) 1 To buzz, hum, make a sound. –2 To be angry.

मशः 1 A mosquito. –2 Hum, humming. –3 Anger. –Comp. –हरी a mosquito-curtain.

मशकः [मश्-वुन्] 1 A mosquito, gnat; सर्वं खलस्य चरितं मशकः करोति H. 1. 78; Ms. 1. 45. –2 A particular disease of the skin. –3 A leather water-bag. –4 N. of a district in Śākadvīpa inhabited by Kṣatriyas. –5 Gadfly, any fly that stings (दंशमशक); Mb. 3. 141. 27. –की A female mosquito; मद्देहे मशकीव मूषकवधूः...... Sūkti. 5. 19. –Comp. –कुटिः, –टी *f.*, –चरणम् a whisk for scaring away mosquitos. –हरी a mosquito-curtain.

मशकिन् *m.* The *Udumbara* tree.

मशनम् Sound.

मशी See मसी.

मशुनः A dog.

मष् 1 P. (मषति) To hurt, injure, kill, destroy.

मषिः, –षी *f.* = मसी q. v.

मस् 4 P. (मस्यति) 1 To weigh, measure, mete. –2 To change form.

मसः A measure, weight.

मसनम् 1 Measuring, weighing. –2 A species of medicinal plant. –3 Hurting.

मसरा A kind of pulse.

मसारः, मसारकः An emerald; मसारताराक्षि ससारमात्मना N. 9. 104 and मसारमालावलितोरणां पुरम् ibid. 16. 122; चन्द्रमसारचितां श्रियम् Haravijaya 5. 47.

मसिः *m. f.* 1 Ink. –2 Lampblack, soot. –3 A black powder used to paint the eyes; अहैरुपात्तमषिभिः कुचकुङ्कुमानि (मृजन्त्यः) Bhāg. 10. 29. 29. –Comp. –आधारः, –कूपी, –धानम्, –धानी, –मणिः an ink-bottle, an ink-stand. –जलम् ink. –पण्यः a writer, scribe. –पथः a pen. –प्रसूः *f.* 1 a pen. –2 an ink-bottle. –लेख्यदलः a particular palm-leaf (for writing). –वर्ण *a.* black as ink, inky. –वर्धनम् myrrh.

मसी See मसि above. –Comp. –कूर्चकः an ink-brush. –गुडिका a blot of ink. –जलम् ink. –धानी an ink-stand. –पटलम् a coating of soot; शिरसि मसीपटलं दधाति दीपः Bv. 1. 74. –भावुक *a.* becoming as black as ink.

मसी (षी) भू To become black; स्वमसारतया मषीभवन्तः Si. 20. 63.

मसिकः A serpent's hole.

मसिन *a.* Pounded, well-grounded. –नम् kinship through the right of presenting the पिण्ड to the common progenitor (सापिण्ड्य).

मसीना Linseed.

मसुः (सू) रः 1 A kind of pulse. –2 A pillow. **–रा** 1 A lentil. –2 A harlot. **–Comp. –विदलः, –लम्** a split lentil; मसूरविदलाकारललाटक्लिक्लकलेवरः Raj. T. 6. 187.

मसूरकः A pillow. **–कम्** 1 A kind of ornament on Indra's banner. –2 A variety of pearls; Kau. A. 2. 11. 29. –3 A lintel, *i. e.* the piece of timber or stone that covers an opening and supports a weight above it; मसूरकमधिष्ठानं वस्त्वाधारं धरातलम् Kāmikāgama 55. 202.

मसूरिका 1 A kind of small-pox (erection of small pustules). –2 A mosquito-curtain. –3 A procuress, bawd.

मसूरी 1 A kind of small-pox. –2 Ipomoea Turpethum (Mar. तेंड, तिधारें).

मसृणः *a.* 1 Unctuous, oily; मसृणचन्दनचर्चिताङ्गीम् Ch. P. 7; or सरसमसृणमपि मलयजपङ्कम् Gīt. 4. –2 Soft, tender, smooth; अयं बाहुः कण्ठे शिशिरमसृणो मौक्तिकसरः U. 1. 38. –3 Bland, mild, sweet; भण मसृणवाणि करवाणि चरणद्वयं सरसलसदलक्तकरागम् Gīt. 10. –4 Lovely, charming; विनयमसृणो वाचि नियमः U. 2. 2; 4. 21. –5 Beaming, glistening; मसृणमुकुलितानां प्रान्तविस्तारभाजाम् (आलोकितानाम्) Māl. 1. 27; 4. 2. **–णा** Linseed.

मसृणयति Den. P. To make soft or smooth.

मसृणित *a.* Softened, polished; एतस्मिन् मसृणितराजपट्टकान्ते U. 5. 18.

मस्क् 1 P. (मस्कति) To go, move.

मस्करः [मस्क्-अरच्] 1 A bamboo. –2 A hollow bamboo; सुस्तम्भां मस्करैर्दीर्घैः कृतवंशां सुशोभनाम् Rām. 3. 15. 21. –3 Going, motion. –4 Knowledge (ज्ञान).

मस्करिन् *m.* 1 An ascetic or religious mendicant, a Brāhmaṇa in the fourth order; धारयन् मस्करिव्रतम् Bk. 5. 63. –2 The moon.

मस्ज् 6 P. (मज्जति, मग्न; *caus.* मज्जयति; *desid.* मिमङ्क्षति) 1 To bathe, plunge, dip or throw oneself into water; यद्गोप्रतरकल्पोऽभूत् संमर्दस्तत्र मज्जताम् R. 15. 101; Bv. 2. 95. –2 To sink, sink into or down, sink under, plunge (with loc. or acc.); सीदन्नन्धे तमसि विधुरो मज्जतीवान्तरात्मा U. 3. 38; Māl. 9. 20; सोऽसंवृतं नाम तमः सह तेनैव मज्जति Ms. 4. 81; R. 16. 72. –3 To be drowned, perish (in water). –4 To sink into misfortune. –5 To despond, be discouraged or disheartened. *–Caus.* (मज्जयति) 1 To cause to sink, immerse, dip, drown. –2 To deluge, inundate, overwhelm. –3 To thrust, to pass into; ततो मर्मसु मर्मज्ञो मज्जयन् निशितान् शरान् Rām. 6. 45. 15.

मस्तम् The head; मस्ते दुःसहवेदनाकवलिते Viś. Guṇa. 539. **–Comp. –दारुः** *n.* the *devadāru* tree. **–मूलकम्** the neck.

मस्तकः, –कम् [मस्मति परिमात्यनेन मस्-करणे त स्वार्थे क Tv.] 1 The head, skull; अतिलोभा (v. l. तृष्णा) भिभूतस्य चक्रं भ्रमति मस्तके Pt. 5. 22. –2 The head or top of anything, peak, summit; न च पर्वतमस्तके Ms. 4. 47; वृक्ष°, चुल्ली° &c. –3 The tuft of leaves growing at the top of palm trees. **–Comp. –आख्यः** the top of a tree. **–उद्भवः** the brain. **–ज्वरः, –शूलम्** an acute head-ache. **–पिण्डकः, –कम्** a round protuberance on the temples of an elephant in rut. **–मूलकम्** the neck. **–लुङ्गः** the membrane surrounding the brain. **–स्नेहः** 1 the brain. –2 an oily substance appearing on the head.

मस्तिकम् The head; see मस्तिष्क.

मस्तिः *f.* Measuring, weighing.

मस्तिष्कम् 1 The brain; महाहिमस्तिष्कविभेदमुक्तरक्तच्छटाचर्चितचण्डचञ्चुः (गरुत्मान्) Nāg. 4; Ve. 1. 27. –2 Any medicine acting upon the brain. **–Comp. –त्वच्** *f.* the membrane which surrounds the brain.

मस्तु *n.* 1 Sour cream. –2 Whey. **–Comp. –लुङ्गः, –गम्, –लुङ्गकः, –कम्** the brain.

मह् I. 1 P., 10 U. (महति, महयति-ते, महित) 1 To honour, respect, hold in great esteem, worship, revere, value greatly; गोप्तारं न निधीनां महयन्ति महेश्वरं विबुधाः Subhāṣ.; जयश्रीविन्यस्तैर्महित इव मन्दारकुसुमैः Gīt. 11; स्त्री पुमानित्यनास्थैषा वृत्तं हि महितं सताम् Ku. 6. 12; Ki. 5. 7, 21; Bk. 10. 2; R. 5. 25; 11. 49. –2 To delight, gladden. –3 To increase, aggrandize. –4 (Ātm.) To delight in; प्रशस्तिभिर्महयसे दिवे दिवे Ṛv. 6. 15. 2. –5 To be honoured. (Ved. in the last four senses.) II. 1 Ā. (महते) To grow or increase.

महः [मह्-घञर्थे क] 1 A festival, festive occasion; बन्धुताहृदयकौमुदीमहः Māl. 9. 21; U. 6. 40; स खलु दूरगतोऽप्यतिवर्तते महमसाविति वन्धुतयोदितैः Śi. 6. 19; मदनमहम् Ratn. 1. –2 An offering, a sacrifice. –3 A buffalo. –4 Light, lustre; cf. महस् also.

महकः 1 An eminent man. –2 A tortoise. –3 N. of Viṣṇu.

महकः A wide-spread fragrance.

महत् *a.* [मह्-अति] (compar. महीयस्; superl. महिष्ठ; nom. महान्, महान्तौ, महान्तः; acc. pl. महतः) 1 Great, big, large, huge, vast; महान् सिंहः, व्याघ्रः &c. –2 Ample, copious, abundant, many, numerous; महाजनः, महान् द्रव्यराशिः. –3 Long, extended, extensive; महान्तौ बाहू यस्य स महाबाहुः; so महती कथा, महानध्वा. –4 Strong, powerful, mighty; as महान् वीरः. –5 Violent, intense, excessive; महती शिरोवेदना, महती पिपासा. –6 Gross, thick, dense; महानन्धकारः. –7 Important, weighty, momentous; महत्कार्यमुपस्थितम्, महती वार्ता. –8 High, lofty, eminent, distinguished, noble; महत्कुलम्, महान् जनः. –9 Loud; महान् घोषः–ध्वनिः. –10 Early or late; महति प्रत्यूषे 'early in the morning'; महत्यपराह्णे 'late in the after-

noon'. -11 High; महार्घ. -*m*. 1 A camel. -2 An epithet of Śiva. -3 (In Sāṅ. phil.) The great principle, the intellect (distinguished from मनस्), the second of the twenty-five elements or *tattvas* recognized by the Sāṅkhyas; Ms. 1. 15; 12. 14; महदाद्याः प्रकृतिविकृतयः सप्त Sāṅ. K. 3, 8, 22 &c. -4 The superior of a monastery. -*n*. 1 Greatness, infiniteness, numerousness. -2 King-dom, dominion; 'महद्राज्यविशालयोः' Viśva; इन्द्रियाणि महत्प्रेप्सुः Mb. 5. 129. 26. -3 Sacred knoweldge. -4 The Supreme Being (परमात्मा); बुद्धेः परतरं ज्ञानं ज्ञानात् परतरं महत् Mb. 12. 204. 10. -*ind*. Greatly, excessively, very much, exceedingly; त्रैलोक्योद्वेगदं महत् Rām. 6. 111. 48. (*Note* : महत् as the first member of a Tatpuruṣa compound and a few other cases, remains unchanged, while in Karmadhāraya and Bahuvrīhi comp. it is changed to महा q. v.) **-Comp.** **-आयुधम्** a great weapon; नानाविधमहदायुधनैपुण्य.. ...Dk. 1. 1. **-आवासः** a spacious or large building. **-आशा** a high hope; महदाशापूर्णमानसः Dk. 1. 3. **-आश्चर्य** *a*. very wonderful. **-आश्रयः** dependence on or seeking protection with the great. **-उन्मदः** a kind of fish; L. D. B. **-औषधिः** *f*. a herb of wonderful power. On the Himālaya there are trees of the Devadāru family which have got resinous stems. These stems burn like oil-lamps. These sticks of pinewood, therefore, are the natural lamps of the Himālaya. cf. सरलासक्तमातङ्गग्रैवेयस्फुरितत्विषः। आसन्नोषधयो नेतुर्नक्तमस्नेहदीपिकाः॥ R. 4. 75; ज्वलितमहौषधिदीपिकासनाथाम् R. 9. 70. **-कथ** *a*. talked of or mentioned by the great, in great men's mouths. **-कार्तिकी** full moon of Kārtika combined with the asterism Rohiṇī; L. D. B. **-कुलम्** a noble family. **-कूपः** a deep well. **-क्षेत्र** *a*. occupying a wide territory. **-गदः** fever. **-जवः** 1 Bos gavaeus. -2 a kind of antelope; L. D. B. **-ज्यैष्ठी** *f*. full-moon of ज्येष्ठ under certain combinations. **-गुण** *a*. having the qualities of the great. **-तत्त्वम्** the second of the 25 principles of the Sāṅkhyas. **-दोष** *a*. highly criminal; महादोषमबुद्धबोधनम् Kau. A. 1. 17. **-द्वन्द्वः** 1 loud uproar. -2 martial band of music; L. D. B. **-फलः** the Bilva tree; L. D. B. **-बिलम्** the atmosphere. **-भद्रा** the river Gaṅgā; L. D. B. **-भीष्मः** N. of Śantanu; L. D. B. **-मण्डूकः** a kind of yellow frog; L. D. B. **-व्यतिक्रमः** a great transgression. **-सिंहः** the lion of Durgā; L. D. B. **-सिद्धिनिलयः** a mosque (the word is used by परमानन्द in Śivabhārata 18. 52). **-सेवा** service of the great. **-स्थानम्** a high place, lofty station.

महती 1 A kind of lute. -2 N. of the lute of Nārada; अवेक्षमाणं महतीं मुहुर्मुहुः Śi. 1. 10. -3 The egg-plant. -4 Greatness, importance.

मार्दवम् [मृदोर्भावः अण्] Softness (lit. and fig.), pliancy, weakness; अभितप्तमयोऽपि मार्दवं भजते कैव कथा शरीरिषु R. 8. 43 'becomes soft'; स्वशरीरमार्दवम् Ku. 5. 18. -2 Mildness, indulgence, gentleness, leniency; Bg. 16. 2.

मार्द्वीक a. (-की f.) Made of grapes. -कम् Wine; मार्द्वीकं प्रियतमसंनिधानमासन् नारीणामिति जलकेलिसाधनानि Śi. 8,30.

मार्मिक a. [मर्म जानाति ठन्] Having a deep insight into, fully conversant with the essence, beauty &c.; (=मर्मज्ञ q. v.); मार्मिकः को मरन्दानामन्तरेण मधुव्रतम् Bv. 1. 117; परिणतमकरन्दमार्मिकास्ते जगति भवन्तु चिरायुषो मिलिन्दाः 1. 8; 4. 40.

मार्षः, -मार्षकः See मारिष.

मार्ष्टिः f. [मृज्-क्तिन्] Cleansing, scouring, purifying.

मालः 1 N. of a district in the west or south-west of Bengal. -2 N. of a tribe of barbarians, a mountaineer. -3 N. of Viṣṇu. -लम् 1 A field. -2 A high ground, rising or elevated ground (मालमुन्नतभूतलम्); क्षेत्रमारुह्य मालम् Me. 16 (शैलप्रायमुन्नतस्थलम् Malli.). -3 A wood near a village. -4 Fraud, deceit. -Comp. -चक्रकम् the hip-joint. -जातकम् a civet-cat.

मालकः 1 The *Nimba* tree. -2 A wood near a village. -3 A pot made of a cocoa-nut shell. -4 An arbour, bower. -का, -कम् 1 A garland. -2 The land-growing lotus; L. D. B.

मालाका f. A garland; L. D. B.

मालकौशः N. of a Rāga or musical mode.

मालतिः, -ती f. 1 A kind of jasmine (with fragrant white flowers); तन्मन्ये क्वचिदङ्ग भृङ्गतरुणेनास्वादिता मालती G. M.; जालकैर्मालतीनाम् Me. 100; Ki. 10. 20. -2 A flower of this jasmine; शिरसि बकुलमालां मालतीभिः समेताम् Ṛs. 2. 24. -3 A bud, blossom (in general). -4 A virgin, young woman. -5 Night. -6 Moonlight. -Comp. -क्षारकः, -तीरजम् borax. -पत्रिका the shell of a nutmeg. -फलम् nutmeg. -माधवम् N. of a celebrated drama by Bhavabhūti. -माला 1 a garland of jasmine flowers. -2 a kind of metre.

मालय a. (-यी f.) [मलये भवः अण्] Coming from the Malaya mountain. -यः Sandal-wood. -यम् 1 a caravansary. -2 the unguent prepared from sandal.

मालवः 1 N. of a country, the modern Mālvā in central India. -2 N. of a Rāga or musical mode. -वाः (pl.) The people of Mālvā. -Comp. -अधीशः, -इन्द्रः, -नृपतिः a king of Mālvā. -गौडः (in music) a particular Rāga. -देशः, -विषयः the country of Mālvā.

मालवकः 1 The country of the Mālavas. -2 An inhabitant of Mālvā.

मालविका 1 N. of the heroine of Kālidāsa's Mālavikāgnimitra. -2 N. of a plant निशोत्तर, Ipomoea Turpethum.

मालसी 1 N. of a plant (केशपुष्ट). -2 N. of a Rāgiṇī.

माला [मल् संज्ञायां कर्तरि घञ्] 1 A garland, wreath, chaplet; अनधिगतपरिमलापि हि हरति दृशं मालतीमाला Vās. -2 A row, line, series, succession; गण्डोड्डीनालिमाला Māl. 1. 1; आबद्धमालाः Me. 9. -3 A group, cluster, collection. -4 A string, necklace; as in रत्नमाला. -5 A rosary, chain; as in अक्षमाला. -6 A streak; as in तडिन्माला, विद्युन्माला. -7 A series of epithets. -8 (In dramas) The offering of several things to obtain a wish. -9 A vocabulary, dictionary. -Comp. -उपमा a variety of Upamā or simile, in which one *Upameya* is compared to several *Upamānas*; e. g. अनयेनेव राज्यश्रीर्दैन्येनेव मनस्विता। मम्लौ साथ विषादेन पद्मिनीव हिमाम्भसा K. P. 10. -कण्टः N. of a plant (अपामार्ग). -करः, -कारः 1 a garland-maker, florist, gardener; कृती मालाकारो बकुलमपि कुत्रापि निदधे Bv. 1. 54; Pt. 1. 220. -2 the tribe of gardeners. -गुणः a necklace. °परिक्षिप्ता a marriageable woman. -गुणा a species of venomous spider. -तृणम् a kind of fragrant grass. -दीपकम् a variety of दीपक; Mammaṭa thus defines it:— मालादीपकमाद्यं चेद्यथोत्तरगुणावहम् K. P. 10; see the example given *ad loc.* -धर a. wearing a garland. -धरम् a kind of metre.

मालिकः [माला तन्निर्माणं शिल्पमस्य ठन्] 1 A florist, gardener. -2 A dyer, painter. -3 A garland-maker. -4 A kind of bird.

मालिका [मालेव कन् अत इत्वम्] 1 A garland; पाचाक्षमालिकाम्भोज Lakṣmīchyānam. -2 A row, line, series. -3 A string, necklace. -4 A variety of jasmine. -5 Linseed. -6 A daughter. -7 A palace. -8 A kind of bird. -9 An intoxicating drink.

मालित *a.* 1 Garlanded, crowned. -2 Surrounded by.

मालिन् *a.* [माला अस्त्यस्य इनि] 1 Wearing a garland. -2 (At the end of comp.) Crowned or wreathed with, encircled by; समुद्रमालिनी पृथ्वी; so अंशुमालिन्, मरीचिमालिन्, ऊर्मिमालिन् &c.; व्यराजतादित्य इवार्चिमाली Rām. 5. 54. 48; युवतिषु कोमलमाल्यमालिनीषु Śi. 7. 61. -*m.* 1 A gardener. -2 A garland-maker, florist. -नी 1 A female florist, the wife of a garland-maker. -2 N. of the city of Champā. -3 A girl seven years old representing Durgā at the Durgā festival. -4 N. of Durgā. -5 The celestial Ganges. -6 N. of a metre; see App. ननमययुतेयं मालिनी भोगिलोकैः V. Ratna. -7 N. of the mother of Bibhīṣaṇa. -8 N. assumed by Draupadī while residing at the Court of Virāṭa. -9 N. of a river; Ś. 3.7. -10 (In music) A particular श्रुति.

मालेयः A garland-maker, florist.

माल्य *a.* [मालायै हितं यत्] Proper for or relating to a garland. -ल्यम् 1 A garland, wreath; माल्येन तां निर्वचनं जघान Ku. 7. 19; Ki. 1. 21. -2 A flower; दिव्यमाल्याम्बरधरम् Bg. 11. 11; Ms. 4. 72. -3 A chaplet or garland worn on the head. -Comp. -आपणः a flower-market. -जीवकः a florist, garland-maker. -धारय *a.* one who wears a garland; स्रग्वी माल्यधारयः Bk. 5. 38. -पुष्पः a kind of hemp. -वृत्तिः a florist.

माल्यवत् *a.* Wreathed, crowned. -*m.* 1 N. of a mountain or mountain range; सोऽयं शैलः ककुभसुरभिर्माल्यवानाम U. 1. 33; R. 13. 26. -2 N. of a demon, son of Suketu. [He was the maternal uncle and minister of Rāvaṇa and aided him in many of his schemes. In early times he propitiated the god Brahman by his austere penance, as a reward of which the splendid island of Laṅkā was caused to be built for him. He lived there with his brothers for some years, but afterwards left it, which was then occupied by Kubera. Afterwards when Rāvaṇa ousted Kubera from the island, Mālyavat returned with his relatives and lived with him for a long time.]

मालिन्यम् [मलिनस्य भावः ष्यञ्] 1 Dirtiness, foulness, impurity. -2 Pollution, defilement. -3 Sinfulness. -4 Blackness. -5 Trouble, affliction.

माल्लुः, -माल्लः N. of a particular mixed tribe.

माल्लुः *f.* 1 A kind of creeper. -2 A woman. -Comp. -धानः a kind of snake.

मालुकाच्छदः A species of tree (Mar. आपटा).

मालूकः Ocimum Sanctum (Mar. काळी तुळस).

मालूरः 1 The *Bilva* tree. -2 The *Kapittha* tree. -रम् A Bilva fruit; ददर्श मालूरफले पचेलिमम् N. 1. 94.

मालेया Large cardamoms.

माल्लवी A wrestling or boxing match (also माल्लयात्रा).

माषः [मष् संज्ञायां कर्तरि घञ्] 1 A bean; (the sing. being used for the plant and the pl. for the fruit or seed); तिलेभ्यः प्रति यच्छति माषान् Sk.; मुद्गाभावे माषाद्याः प्रतिनिधित्वमर्हन्ति J. N. V. -2 A particular weight of gold; पञ्चकृष्णलको माषस्ते सुवर्णस्तु षोडश Ms. 8. 134; माषो विंशतिमो भागः पणस्य परिकीर्तितः or गुञ्जाभिरष्टाभिर्माषः -3 A fool, blockhead. -4 A kind of pulse. -5 A cutaneous eruption resembling beans. -Comp. -अदः, -आदः a tortoise. -आज्यम् a dish of beans cooked with ghee. -आशः a horse. -ऊन *a.* less by a Māṣa. -पर्णी Glycine Debilis (Mar. रानउडीद). -पिष्टम् a kind of sauce prepared from the flour of Māṣa (Mar. डांगर ?) Gaṇeśa P. 49. 47-51. -पेषम् *ind.* as if beans were ground; Mk. -योनिः a thin cake (पर्पट) made of Māṣa flour; Gīrvāṇa. -वर्धकः a goldsmith.

माषकः 1 A bean. -2 A kind of weight of gold; द्वे कृष्णले समधृते विज्ञेयो रौप्यमाषकः Ms. 8. 135.

माषिक *a.* (-की *f.*) Worth a Māṣa.

माषीण *a.* [माषाणां भवनं क्षेत्रं खञ्] Sown with beans. -णम् A field of beans.

माष्य *a.* [माष-यत्] 1 Fit for beans. -2 Worth a particular number of Māṣas. -ष्यम् A field of beans.

मास् *m.* 1 = मास q. v.; चतुर्थे मासि कर्तव्यं शिशोर्निष्क्रमणं गृहात् Ms. 2. 34. (This word has no forms for the first five inflections and is optionally substituted for मास after acc. dual.) -2 The moon.

मासः, -सम् [मास् एव अण्] 1 A month, (it may be चान्द्र, सौर, सावन, नाक्षत्र or बार्हस्पत्य); न मासे प्रतिपत्तासे मां चेन्मर्तासि मैथिलि Bk. 8. 95. -2 The moon (Ved.). -3 The number 'twelve'. -Comp. -अधिपः, -अधिपतिः the planet presiding over a month. -अनुमासिक *a.* monthly; पिण्डान्वाहार्यकं श्राद्धं कुर्यान्मासानुमासिकम् Ms. 3. 122. -अन्तः the day of new moon. -अवधिक *a.* lasting for or occurring in a month. -आहार *a.* eating only once a month. -उपवासिनी 1 a woman who fasts for a whole month. -2 a procuress, a lascivious or lewd woman (ironically.). -ऋक्षम् the constellation after which a month (like चैत्र, वैशाख) is named; माघे च सितसप्तम्यां मघाराकासमागमे। राकया चानुमत्या वा मासार्क्षाणि युतान्यपि ॥ Bhag. 7. 14. 22. -कालिक *a.* monthly, lasting for a month. -चारिक *a.* practising (any thing) for a month. -जात *a.* a month old, born a month ago. -ज्ञः a kind of gallinule. -देय *a.* to be paid in a month.

—पाक a. maturing in a month. —प्रमितः the new-moon. —प्रवेशः the beginning of a month. —भुक्तिः (the sun's) monthly course. —मानः a year. —संचयिक a. having provisions for a month; सद्यःप्रक्षालको वा स्यान्माससंचयिकोऽपि वा Ms. 6. 18.

मासकः A month.

मासिक a. (—की f.) [मासे भवः ठञ्] 1 Relating to a month. —2 Happening every month, monthly. —3 Lasting for a month. —4 Payable in a month. —5 Engaged for a month. —कम् A funeral rite or Srāddha performed every newmoon (during the first year of a man's death); पितॄणां मासिकं श्राद्धमन्वाहार्यं विदुर्बुधाः; मासिकान्नं तु योऽश्नीयात् Ms. 11. 157.

मासीन a. [मास-खञ्] 1 One month old. —2 Monthly.

मास्य a. [मास-यत्] (At the end of comp.) 1 Continuing for a month. —2 A month old.

मासरः 1 The scum of boiled rice, rice-gruel. —2 The meal of parched barley mixed with sour milk.

मासलः A year.

मासुरी A beard.

मासूर a. (—री f.) 1 Lentil-shaped. —2 Made of pulse.

माह् 1 U. (माहति-ते) To measure.

माहनः [मा+हन्] A Brāhmaṇa.

माहा A cow.

माहाकुल a. (—ली f.), माहाकुलीन a. (—नी f.) 1 Nobly born, of noble family, of illustrious descent.

माहाजनिक a. (—की f.) माहाजनीन a. (—नी f.) 1 Fit for merchants. —2 Fit for great persons.

माहात्मिक a. (—की f.) High-minded, magnanimous, noble, dignified, glorious; राज्ञो माहात्मिके स्थाने सद्यः शौचं विधीयते Ms. 5. 94.

माहात्म्यम् [महात्मनो भावः ष्यञ्] 1 Magnanimity, noble-mindedness, greatness; गङ्गा च यस्या विदुर्माहात्म्यम् U. 4. 5. —2 Majesty, dignity, exalted position; अजानन्माहात्म्यं पततु शलभो दीपदहने Bh. —3 The peculiar virtue of any divinity or sacred shrine; or a work giving an account of the merits of such divinities or shrines; as देवीमाहात्म्य, शनिमाहात्म्य &c. —4 Largeness, hugeness; ते दृष्ट्वा देहमाहात्म्यं कुम्भकर्णोऽयमुत्थितः। भयार्ता वानराः Rām. 6. 71. 7.

माहानस a. (—सी f.) 1 Belonging to a large carriage. —2 Relating to a kitchen. Hence माहानसिक = A superintendent of the kitchen; चिकित्सक-माहानसिक-मौहूर्तिकांश्च पश्येत् Kau. A. 1. 19. 16.

माहाप्राण a. (—णी f.) Having the aspirate or hard breathing.

माहाभाग्यम् Great prosperity, good luck.

माहायानिक a. That which propounds the view of the followers of the Mahāyāna school of Buddhism; यद्येवं प्रत्युक्तः स माहायानिकः पक्षः। SB. on MS. 1. 1. 5.

माहाराजिक a. (—की f.) Fit for a great king, imperial, royal.

माहाराज्यम् Sovereignty.

माहाराष्ट्री See महाराष्ट्री.

माहाव्रती The doctrine of the Pāśupatas.

माहिन a. Ved. 1 Joyous, joyful. —2 Great, exalted. —3 Giving delight. —नम् Sovereignty, power, dominion.

माहिरः An epithet of Indra.

माहिष a. (—षी f.) [महिष्या इदम् अण्] Coming or derived from a buffalo or a buffalo-cow; as माहिषं दधि. —षम् The female apartment.

माहिषकः A buffalo-keeper.

माहिषिकः 1 A buffalo-keeper, a herdsman. —2 The paramour of an unchaste woman; (महिषीत्युच्यते नारी या च स्याद् व्यभिचारिणी। तां दुष्टां कामयति यः स वै माहिषिकः स्मृतः॥ Kālikā Purāṇa. —3 One who lives by the prostitution of his wife; महिषीत्युच्यते नार्या भगेनोपार्जितं धनम्। उपजीवति यस्तस्याः स वै माहिषिकः स्मृतः॥ Śrīdhara on V. P.

माहिषेय A son of the first wife of a king.

माहिष्मती N. of a city, the hereditary capital of the Haihaya kings; माहिष्मतीवप्रनितम्बकाञ्चीम् (रेवाम्) R. 6. 43.

माहिष्यः A mixed caste sprung from a Kṣatriya father and Vaiśya mother.

माहेन्द्र a. (—न्द्री f.) 1 Relating to or fit for Indra; माहेन्द्रमम्भः प्रथमं पृथिव्या Ku. 7. 84; R. 12. 86. —2 Eastern. —द्रम् A kind of pearl; Kau. A. 2. 11. 29. —द्री 1 The east. —2 A cow. —3 N. of Indrāṇī.

माहेय a. (—यी f.) 1 Terrestrial. —2 Made of earth, earthen; शातकुम्भमयैः कुम्भैर्माहेयैश्चाभिमन्त्रितैः Mb. 8. 10. 44. —यः 1 The planet Mars. —2 The demon Naraka. —3 Coral.

माहेयी A cow.

माहेश्वर a. (—री f.) 1 Belonging to a great lord or to Śiva; अनेन च महाराज माहेश्वरमनुत्तमम्। इष्ट्वा यज्ञं... Rām. 6. 7. 19. —2 Worshipping Śiva. —रः A worshipper of Śiva. —री N. of Pārvatī or Durgā.

मि 5 U. (मिनोति, मिनुते; rarely used in classical literature) 1 To throw, cast, scatter. —2 To build, erect. —3 To measure. —4 To establish. —5 To observe, perceive. —6 Ved. To fix in the earth.

मिच्छ् 6 P. (मिच्छति) 1 To hinder, obstruct. -2 To annoy.

मिम्मिण *a.* Speaking indistinctly through the nose. See मिन्मिल.

मिथ् *f.* Ved. A column, post.

मित *p. p.* [मि मा-वा-क्त] 1 Measured, meted or measured out. -2 Measured off, bounded, defined. -3 Limited, measured, moderate, little, scanty, sparing, brief (words &c); पृष्टः सत्यं मितं ब्रूते स सूर्योऽर्हो महीभुजाम् Pt. 1. 87; R. 9. 34. -4 Measuring, of the measure of (at the end of comp.), as in ग्रहवसुकरिचन्द्रमिते वर्षे *i. e.* in 1889. -5 Investigated, examined. -6 Cast, thrown away. -7 Built. -8 Established, founded. -Comp. -अक्षर *a.* 1 brief, measured, short, concise; कथंचिदीशस्तनया मिताक्षरं चिरव्यवस्थापितवागभाषत Ku. 5. 63. -2 composed in verse, metrical. (-रा) N. of a celebrated commentary by Vijñāneśvara on Yājñavalkya's Smṛiti. -अर्थ *a.* of measured meaning. -अर्थकः a cautious envoy. -आहार *a.* sparing in diet. (-रः) moderation in eating. -द्रुः the sea. -भाषिन्, -वाच् *a.* speaking little or measured words; महीयांसः प्रकृत्या मितभाषिणः Śi. 2. 13. -भुक्त *a.* moderate in diet. -मति *a.* narrow-minded. -व्ययिन् *a.* frugal, economical.

मितंगम *a.* Going slowly. -मः An elephant.

मितंपच *a.* 1 Cooking a measured portion, cooking little; P. III. 2. 34. -2 Small-sized (utensils). -3 Sparing, niggardly, stingy.

मितिः *f.* [मा-मि-क्तिन्] 1 Measuring, a measure, weight. -2 Accurate knowledge. -3 Proof, evidence. -4 Determination.

मित्रः [मेद्यति स्निह्यति, मिद्-त्र, मि-त्र वा] 1 The sun; तद्दिनं दुर्दिनं मन्ये यत्र मित्रागमो हि ना Subhāṣ. -2 N. of an Āditya and usually associated with Varuṇa; cf. Ṛv. 3. 59. -3 The deity presiding over the part of rectum (गुदस्थान); गुदं पुंसो विनिर्भिन्नं मित्रो लोकेश आविशत् Bhāg. 3. 6. 20. -त्रम् 1 A friend; तन्मित्रमापदि सुखे च समक्रियं यत् Bh. 2. 68; Me. 17. -2 An ally, the next neighbour of a king; cf. मण्डल. -Comp. -अनुग्रहणम् the act of favouring friends. -अमित्रम् friend and foe; मित्राऽमित्रस्य चार्जनम् Ms. 12. 79. -आचारः conduct towards a friend. -उदयः 1 sun-rise. -2 the welfare or prosperity of a friend. -उपस्थानम् worship of the sun (part of the morning संध्या). -कर्मन्, -कार्यम्, -कृत्यम् the business of a friend, a friendly act or service; मित्रकृत्यमपदिश्य पार्श्वतः (प्रस्थितम्) R. 19. 31. -घ्न *a.* treacherous. -द्रुह्, -द्रोहिन् *a.* hating a friend, treacherous to a friend, a false or treacherous friend. -भम् the अनुराधा constellation. -भावः friendship. -भेदः breach of friendship. -युद्धम् a contest between friends. -लाभः 1 acquisition of friends, contracting of friendship. -2 N. of the first book of the Hitopadeśa. -वत्सल *a.* kind to friends, of winning manners. -विन्दः an epithet of Agni. -विषयः friendship. -सप्तमी N. of the seventh day in the bright half of मार्गशीर्ष. -साह *a.* kind or indulgent to friends; स्वैदैंहित्रैस्तारितो मित्रसाहः Mb. 1. 93. 28. -हत्या the murder of a friend.

मित्रता, -त्वम् Friendship, friendliness.

मित्रति Den. P. To be friendly, behave in a friendly manner, act as a friend towards.

मित्रयु *a.* 1 Friendly-minded. -2 Winning friends. -युः A friend.

मित्रायते Den. Ā. To act as a friend, be friendly.

मित्रीकृ 8 U. To make a friend of.

मित्रीभू 1 P. To become a friend, make friends with.

मित्रीयति Den. P. To treat (one) as a friend.

मित्रावरुणौ Mitra and Varuṇa.

मित्रिय *a.* Friendly, relating to a friend.

मिथ् 1 U. (मेथति-ते) 1 To associate with. -2 To unite, pair, copulate. -3 To hurt, injure, strike, kill. -4 To understand, perceive, know. -5 To wrangle, contradict. -6 To grasp, seize.

मिथस् *ind.* 1 Mutually, reciprocally, to each other; कामान्माता पिता चैनं यदुत्पादयतो मिथः Ms. 2. 147; oft. in comp. मिथःप्रस्थाने Ś. 2.; मिथःसमयात् Ś. 5. -2 In secret or private, secretly, privately; भर्तुः प्रसादं प्रतिनन्द्य मूर्ध्ना वक्तुं मिथः प्राक्रमतैवमेनम् Ku. 3. 2; 6. 1; R. 13. 1. -3 Alternately, by turns. -Comp. -असम्बन्धन्यायः a rule of interpretation according to which subsidiary portions (of a sentence) cannot be connected with one another. This rule is discussed by Jaimini and Śabara in 'गुणानां च परार्थत्वादसम्बन्धः समत्वात् स्यात्' MS. 3. 1. 22 and भाष्य thereon. -कृत्यम् mutual obligation. -समयः mutual agreement.

मिथिलः N. of a king. -लाः (pl.) N. of a people. -ला [मथ्यन्तेऽत्र रिपवः इति मिथिला Uṇ. 1. 57] N. of a city, capital of the country called Videha, q. v.; मिथिला वदत्ययोध्यां त्वं स्त्री परपुरुषानुरक्तासि Udb.

मिथु, मिथुः *ind.* 1 Ved. Falsely, wrongly. -2 Alternately. -3 Together, mutually (मिथः); ब्रह्मादयस्तनुभृतो मिथुरर्द्यमानाः Bhāg. 11. 6. 14.

मिथुन *a.* [मिथ्-उनन् किच्च Uṇ. 3. 55] Paired, forming a pair, or couple. -नः Ved. A pair, couple. -नम् 1 A pair, couple; मिथुनं परिकल्पितं त्वया सहकारः फलिनी च नन्विमौ R. 8. 61; Me. 18; U. 2. 5. -2 Twins. -3 Union, junction. -4 Sexual union, copulation, cohabitation -5 The third sign of the zodiac, *Gemini*. -6 (In gram.) A root compounded with a preposition. -Comp. -भावः 1 forming a couple, state of being a pair. -2 copulation. -यमकम् a particular kind of यमक; cf. Bk. 10. 12. -व्रतिन् *a.* practising cohabitation.

मिथुनायते Den. Ā. To copulate, cohabit (sexually).

मिथुनिन् m. A wagtail.

मिथुनीकृ 8 U. To cause to couple, unite together (the sexes).

मिथुनीभू 1 Ā. To pair, to be joined or arranged in couples.

मिथुनीभावः Cohabitation, sexual union.

मिथुनेचरः The ruddy goose (चक्रवाक); cf. द्वन्द्वचर.

मिथ्या ind. [मिथ्-क्यप्] 1 Falsely, deceitfully, wrongly, incorrectly; oft. with the force of an adjective; मणौ महानील इति प्रभावादल्पप्रमाणेऽपि यथा न मिथ्या R. 18. 42; यदुवाच न तन्मिथ्या 17. 42; मिथ्यैव व्यसनं वदन्ति मृगयामीदृग्विनोदः कुतः Ś. 2. 5. –2 Invertedly, contrarily. –3 To no purpose, in vain, fruitlessly; मिथ्या कारयते चारैर्घोषणां राक्षसाधिपः Bk. 8. 44; मिथ्यैष व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यति Bg. 18. 59. (मिथ्या वद्-वच् to tell a falsehood, lie. मिथ्या कृ 1 to falsify. –2 to contradict. मिथ्या भू to turn out false, be false. मिथ्या ग्रह् to misunderstand, mistake.) At the beginning of comp. मिथ्या may be translated by 'false, untrue, unreal, sham, pretended, feigned' &c. –**Comp.** –**अध्यवसितिः** f. a figure of speech, an expression of the impossibility of a thing by making it depend upon an impossible contingency; किंचिन्मिथ्यात्वसिद्ध्यर्थं मिथ्यार्थान्तरकल्पनम् । मिथ्याध्यवसितिर्वेश्यां वशयेत् खस्रजं वहन् ॥ Kuval. –**अपवादः** a false charge. –**अभिधानम्** a false assertion. –**अभियोगः** a false or groundless charge. –**अभिशंसनम्** calumny, false accusation. –**अभिशापः** 1 a false prediction. –2 a false or unjust claim. –**आचार** a. 1 acting falsely. –2 hypocritical. (–**रः**) 1 wrong treatment (in medic.). –2 wrong or impoper conduct. –3 a rogue, hypocrite; इन्द्रियार्थान् विमूढात्मा मिथ्याचारः स उच्यते Bg. 3. 6. –**आहारः** wrong diet. –**उत्तरम्** a false or prevaricating reply. –**उपचारः** 1 pretended kindness or service; मिथ्योपचारैश्च वशीकृतानां किमर्थिनां वञ्चयितव्यमस्ति H. –2 (in medic.) a wrong treatment of a malady. –**कर्मन्** n. a false act. –**कारुणिक** a. pretending to be kind; मिथ्याकारुणिकोऽसि निर्घृणतरस्त्वत्तः कुतोऽन्यः पुमान् Pt. 5. 14. –**कोपः, क्रोधः** feigned anger. –**क्रयः** a false price. –**ग्रहः** useless obstinacy or persistence. –**ग्रहः, ग्रहणम्** misconception, misunderstanding. –**चतुर्विधम्** four types of lying; मिथ्यैतत्राभिजानामि तदा तत्र न संनिधिः । अजातश्चास्मि तत्काले इति मिथ्याचतुर्विधम् ॥ –**चर्या** hypocrisy. –**जल्पितम्** a false report or speech. –**ज्ञानम्** a mistake, error, misapprehension. –**दर्शनम्** heresy. –**दृष्टिः** f. heresy, holding heretic or atheistic doctrines. –**निरसनम्** denial by oath. –**पण्डित** a. educated or learned only in appearance. –**पुरुषः** a man only in appearance. –**प्रतिज्ञ** a. false to one's promise, perfidious. –**प्रत्ययः** an erroneous perception; यो हि जनित्वा प्रध्वंसते नैतदेवमिति स मिथ्याप्रत्ययः ŚB. on MS. 1. 1. 2. –**फलम्** an imaginary advantage. –**मतिः** f. delusion, mistake, errror. –**योगः** wrong use or application. –**लिङ्गधर** a. being anything only in appearance. –**वचनम्, –वाक्यम्, –वादः** an untrue speech, a falsehood, lie. –**वाक्, –वादिन्** a. lying, false, untruthful; मिथ्यावादिनि दूति ...... K. P. –**वार्ता** a fake report. –**व्यापारः** meddling with another's affairs. –**वृत्त** a. of vicious conduct; उद्योगं तव संप्रेक्ष्य मिथ्यावृत्तं च रावणम् Ram. 6. 17. 66. –**साक्षिन्** m. a false witness.

मिथ्यात्वम् 1 Falsity, unreality. –2 Illusion, error. –3 Inversion. –4 Perversion.

मिद् I. 1 Ā., 4, 10 U. (मेदते, मेद्यति-ते, मेदयति-ते) 1 To be unctuous or greasy. –2 To melt. –3 To be fat. –4 To love, feel affection. –II. 1 U. (मेदति-ते); see मिथ्.

मिन्न p. p. 1 Fat; P. VII. 2. 16. –2 Unctuous, greasy. –3 Affectionately inclined towards (one).

मिद्धम् 1 Sloth, indolence. –2 Torpor, sleepiness, dulness (of spirits also).

मिन्द् 1, 10 U. (मिन्दति, मिन्दयति-ते). See मिद् II.

मिन्मिन (ल) a. One who speaks with nasal utterance; a snuffler; आवृत्य वायुः सकफो धमनीः शब्दवाहिनीः । नरान् करोत्यक्रियकान् मूकमिन्मिलगद्गदान् ॥

मिन्व् 1 P. (मिन्वति) 1 To sprinkle, moisten. –2 To honour, worship.

मिमंक्षा A desire to take bath or to sink.

मिमन्थिषा A desire to churn or to destroy.

मियेधः A sacrificial offering.

मियेध्य a. Partaking of sacrificial offering.

मिल् 6 U. (मिलति-ते, generally मिलति; मिलित) 1 To join, be united with, accompany; रुमण्वतो मिलितः Ratn. 4. –2 To come or meet together, meet, gather, assemble; ये चान्ये सुहृदः समृद्धिसमये द्रव्याभिलाषाकुलास्ते सर्वत्र मिलन्ति H. 1. 183; याताः किं न मिलन्ति Amaru 10; मिलितशिलीमुख &c. Git. 1; स पात्रेसमितोऽन्यत्र भोजनाभिमिलितो न यः Trik. –3 To be mixed or united with, come in contact with; मिलति तव तोयैर्मृगमदः G. L. 7. –4 To meet or encounter (as in fighting); close, close with. –5 To come to pass, happen. –6 To embrace, clasp. –7 To concur. –8 To find, fall in with. –Caus. (मेलयति-ते) To bring together, assemble, convene.

मिलत् a. 1 Meeting, joining. –2 Happening, occurring. –3 Joined, connected. –Comp. –**व्याध** a. surrounded or joined by huntsmen; Ks.

मिलनम् [मिल्-ल्युट्] 1 Joining, meeting, assembling together. –2 Encountering. –3 Contact, being mixed with, coming in contact with; व्यालनिलयमिलनेन गरलमिव कलयति मलयसमीरम् Git. 4.

मिलित p. p. [मिल्-क्त] 1 Come together, assembled, encountered, combined. –2 Met, encountered. –3 Mixed. –4 Put together, taken in all.

मिलपत्रः N. of a plant (Mar. आपटा); Gīrvāṇa.

मिलिन्दः A bee; परिणतमकरन्दमार्मिकास्ते जगति भवन्तु चिरायुषो मिलिन्दाः Bv. 1. 8, 15. –Comp. –प्रश्नः N. of a Pāli work.

मिलिन्दकः A kind of snake.

मिलीमिलिन् m. An epithet of Śiva.

मिश् 1 P. (मेशति) 1 To make a sound or noise. –2 To be angry.

मिशिः (षिः, –सिः) f. 1 Anise. –2 Spikenard.

मिश्र् 10 U. (मिश्रयति-ते; strictly a denom. from मिश्र) 1 To mix, mingle, unite, blend, combine, add; वाचं न मिश्रयति यद्यपि मे वचोभिः Ś. 1. 30; न मिश्रयति लोचने Bv. 2. 140. –2 To add to.

मिश्र a. [मिश्र्-अच्] 1 Mixed, blended, mingled, combined; गद्यं पद्यं च मिश्रं च तत् त्रिधैव व्यवस्थितम् Kāv. 1. 11, 31, 32; R. 16. 32; (स राजा) अहन्यहन्यर्थगजाश्वमिश्रैर्वृद्धिं ययौ सिन्धुरिवाम्बुवेगैः Bu. Ch. 2. 1. –2 Associated, connected. –3 Manifold, diverse; प्रसूतिमिश्राः स्त्रिय उद्विग्नचित्ता ऋजुर्विपाको वृजिनस्यैष तस्य Bhāg. 4. 5. 9. –4 Tangled, intertwined. –5 (At the end of comp.) Having a mixture of, consisting for the most part of. –6 Mixing, adulterating. –श्रः 1 A respectable or worthy person; usually affixed to the names of great men and scholars; आर्यमिश्राः प्रमाणम् M. 1; वसिष्ठमिश्रः; मण्डनमिश्रः &c. –2 A kind of elephant. –3 The group of the constellations कृत्तिका and विशाखा. –4 (In music) A kind of measure. –श्रम् 1 A mixture. –2 A kind of radish. –3 (with धन) Principal and interest.-Comp.–ओदनः a food of rice and pulse boiled (Mar. खिचडी). –चोरः, –चौरः an adulterator of grain. –जः a mule. –जाति a. of mixed breed. –धान्यम् mixed grain. –वर्ण a. of a mixed colour. (–र्णम्) 1 a kind of black aloe-wood. –2 a species of sugar-cane. –3 (in music) a kind of measure. °फला Solanum Melongena (Mar. डोरली वांगी). –वृत्तम् a mixed story (partly popular and partly supernatural). –व्यवहारः (in arith.) investigation of composition (of principal and interest). –शब्दः a mule.

मिश्रक a. [मिश्र्-ण्वुल्] 1 Mixed, mingled. –2 Mixing, adulterating. –3 Miscellaneous. –कः 1 A compounder. –2 An adulterator of mercantile goods; आतिरेक्यं तु मिश्रकः Ms. 11. 50. –कम् 1 Salt produced from salt soil. –2 The garden of Indra, (also मिश्रकावणम्). –3 Singing out of tune.

मिश्रणम् [मिश्र्-ल्युट्] 1 Mixing, blending, combining. –2 (In arith.) Addition.

मिश्रित p. p. [मिश्र्-क्त] 1 Mixed, blended, combined. –2 Added. –3 Respectable. –4 Promiscuous, miscellaneous (as taste).

मिश्रीकरणम् 1 The act of mixing, seasoning. –2 An ingredient; P. II. 1. 35.

मिश्रेया Anise (Mar. बडिशेप).

मिष् I. 6 P. (मिषति) 1 To open the eyes, wink. –2 To look at, look helplessly; जातवेदोमुखान्मायी मिषतामाच्छिनत्ति नः Ku. 2. 46; येनार्घ्यं नृपमण्डलस्य मिषतो भीष्माग्रहस्ताद् धृतम् Dūtavākyam 1. 41. –3 To rival, contend, emulate –II. 1 P. (मेषति) To wet, moisten, sprinkle.

मिषः [मिष्-क] 1 Emulation, rivalry. –2 The son of a Kṣatriya and a low woman. –षम् Pretext, disguise, deceit, trick, fraud, false or outward appearance; बालमेनमेकेन मिषेणानीय Dk. (often used like छल q. v., to indicate an उत्प्रेक्षा); न रोमकूपौघमिषाज्जगत्कृता कृताश्च किं दूषणशून्यबिन्दवः N. 1. 21; वदने विनिवेशिता भुजङ्गी पिशुनानां रसनामिषेण धात्रा Bv. 1. 111; अस्वस्थतामिषेण Dk.

मिषमिषायते Den. Ā. To crackle.

मिषिका Nardostachys Jatāmānsī (जटामांसी).

मिष्ट a. [मिष्-क्त] 1 Sweet. –2 Dainty, savoury; किं मिष्टमन्नं खरसूकराणाम्; cf. 'why cast pearls before swine.' –3 Moistened, wetted. –ष्टम् 1 A sweetmeat. –2 A dainty or savoury dish. –ष्टा Sweetness. °निम्बू sweet citron. –Comp. –अन्नम् sweet or savoury food, dainty, sweets; कन्या वरयते रूपं ... ...मिष्टान्नमितरेजनाः Subhāṣ. –कर्तृ m. a skilful cook (maker of dainties; Mar. हलवाई).

मिह् 1 P. (मेहति, मीढ) 1 To make water. –2 To wet, moisten, sprinkle. –3 To emit semen.

मीढ p. p. [मिह्-क्त] 1 Urined, watered. –2 Passed (as urine) –3 Begotten (from one's semen); cf. देवमीढ (= god-begotten); Bhāg. 10. 20. 7. –ढम् Ved. 1 A battle. –2 Prize, reward. –3 Faeces. –ढः A ram.

मिहिका 1 Mist, snow; भूपांसवः खे मिहिका द्युभासः Bhāg. 10. 14. 7. –2 Camphor; अथ चन्द्रमृणालचन्द्रिकामिहिकाचन्दनचम्पकादिभिः Śiva B. 32. 5. –Comp. –रुच् the moon; रात्रीमुचं मिहिकारुचम् N. 19. 35.

मिहिरः [मिह्-किरच् Uṇ. 1. 51] 1 The sun; मयि तावन्मिहिरोऽपि निर्दयोऽभूत् Bv. 2. 34; याते मय्यचिरान्निदाघमिहिरज्वालाशतैः शुष्कताम् 1. 16; N. 2. 36; 13. 54. –2 A cloud. –3 The moon. –4 Wind, air. –5 An old man. –6 The *Arka* plant –7 An epithet of Buddha; L. D. B. –Comp. –आपद् f. eclipse of the sun. –कुलः N. of a prince; Rāj. T.

मिहिराणः An epithet of Śiva.

मी I. 9 U. (मीनाति मीनीते; seldom used in classical literature) 1 To kill, destroy, hurt, injure. –2 To lessen, diminish. –3 To change, alter. –4 To transgress, violate. –5 To disappear, be lost. –6 To stray, go astray. –II. 1 P., 10 U. (मयति, माययति-ते) 1 To go, move. –2 To know, understand (गतिमत्योः). –III. 4 Ā. (मीयते) To die, perish; see प्रमी; जन्तोः प्रमीयमाणस्य जीवो नैवोपलभ्यते Mb. 12. 186. 3.

मीडम् Ved. In a low tone, softly.

मीढुष्टमः 1 An epithet of Śiva; तदा सर्वाणि भूतानि श्रुत्वा मीढुष्टमोदितम् Bhāg. 4. 7. 6. –2 The sun. –3 A thief.

मीढ्वस् *a.* 1 Bountiful, liberal; निशम्य कर्म तच्छम्भोर्देवदेवस्य मीढुषः Bhāg. 8. 7. 46. –2 Discharging semen; पीवानं श्मश्रुलं प्रेष्ठं मीढ्वांसं याभकोविदम् Bhāg. 9. 19. 5. –*m.* An epithet of Śiva; ललाटाक्षाय शर्वाय मीढुषे शूलपाणये (नमः) Mb. 3. 39. 77; Bhāg. 4. 7. 7.

मीनः [मी-नक्] 1 A fish; क्षुभ्यमीन इव ह्रदः R. 1. 73; मीनो नु हन्त कतमां गतिमभ्युपैतु Bv. 1. 17. –2 The twelfth sign of the zodiac (*Pisces*). –3 The first incarnation of Viṣṇu; see मत्स्यावतार. –ना A stick. –Comp. –अक्षी N. of a deity (worshipped in Madurā). –अण्डम् roe, fish-spawn. (–ण्डा) moist sugar. –आघातिन्, –घातिन् *m.* 1 a fisherman. –2 a crane. –आलयः the sea. –केतनः, –ध्वजः the god of love. –गन्धा an epithet of Satyavatī. –गन्धिका a pond, pool of water (v. l. गोधिका). –घातिन् *m.* 1 a crane. –2 a fisherman. –रङ्कः, –रङ्गः a kingfisher.

मीनरः The sea-monster called *Makara*, q. v.

मीनाम्रीणः 1 A fish-sauce. –2 A wag-tail.

मीम् 1 P. (मीमति) 1 To go, move. –2 To sound.

मीमांसकः [मान् विचारे स्वार्थे सन् ण्वुल्] 1 One who investigates or inquires into, an investigator, examiner. –2 A follower of the system of philosophy called मीमांसा, q. v. below.

मीमांसनम् Investigation, examination, inquiry. –नः An investigator, inquirer, examiner.

मीमांसिका The Mīmāṁsā system.

मीमांसा [मान्-विचारे स्वार्थे सन् अ] 1 Deep reflection, inquiry, examination, investigation; अथातो व्रतमीमांसा Bri. Up. 1. 5. 21; रसगङ्गाधरनाम्नीं करोति कुतुकेन काव्यमीमांसाम् R. G.; सैषा आनन्दस्य मीमांसा भवति Tait. Up.; so दत्तक°, अलंकार° &c. –2 N. of one of the six chief *darśanas* or systems of Indian philsophy. (It was originally divided into two systems :— the पूर्वमीमांसा or कर्ममीमांसा founded by Jaimini, and the उत्तरमीमांसा or ब्रह्ममीमांसा ascribed to Bādarāyaṇa; but the two systems have very little in common between them, the first concerning itself chiefly with the correct interpretation of the ritual of the Veda and the settlement of dubious points in regard to Vedic texts; and the latter dealing chiefly with the nature of Brahman or the Supreme Spirit. The पूर्वमीमांसा is, therefore, usually, styled only मीमांसा or *the* Mīmāṁsā, and the उत्तरमीमांसा, वेदान्त which, being hardly a sequel of Jaimini's system, is now considered and ranked separately.) मीमांसाकृतमुन्ममाथ सहसा हस्ती मुनिं जैमिनिम् Pt. 2. 34.–Comp. –कारः, –कृत् *m.* N. of Jaimini. –मांसल *a.* fat with Mīmāṁsā (a satirical term meaning 'dull'); अहो मन्दस्य मीमांसाश्रमहानिर्विजृम्भते। मीमांसामांसलं चेतः कथमित्थं प्रमाद्यति॥ Āgama Pr. –मांसलप्रज्ञः one whose intellect is fattened on the Mīmāṁsā philosophy (a term of ridicule); ब्रूथ च स्वयं, मीमांसामांसलप्रज्ञाः, ताम् N. 17. 61. –सूत्रम् N. of the 12 books of aphorisms by Jaimini.

मीमांसितव्य, मीमांस्य *a.* To be examined, thought over, refected; श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः। ते सर्वार्थेष्वमीमांस्ये ताभ्यां धर्मो हि निर्बभौ॥ Ms. 2. 10; मीमांस्यमेव ते मन्ये विदितम् Ken. 2. 1.

मीरः 1 The ocean. –2 A limit, boundary. –3 A drink, beverage. –4 A particular part of a mountain.

मील् 1 P. (मीलति, मीलित) 1 To close (as the eyes), close or contract the eye-lids, wink, twinkle; पत्रे विभ्यति मीलति क्षणमपि क्षिप्रं तदालोकनात् Gīt. 10. –2 To close, be closed or shut (as eyes or flowers); नयनयुगममीलत् Śi. 11. 2; तस्या मिमीलतुर्नेत्रे Bk. 14. 54. –3 To fade, disappear, vanish; कालेन मीलितधियामवमृश्य नृणाम् Bhāg. 2. 7. 36. –4 To meet or be collected (for मिल्). –*Caus.* (मीलयति-ते) To cause to shut, close, shut (eyes, flowers &c.); न लोचनं मीलयितुं विषेहे Ki. 3. 36; शेषान् मासान् गमय चतुरो लोचने मीलयित्वा Me. 112 (v. l.).

मीलनम् [मील् ल्युट्] 1 Closing of the eyes, winking, twinkling. –2 Closing the eyes. –3 The closing of a flower. –4 (In Rhet.) A concealed simile; see मीलित below.

मीलित *p. p.* [मील्-क्त] 1 Shut, closed. –2 Twinkled. –3 Half-opened, unblown. –4 Vanished, disappeared. –5 Assembled, gathered (for मिलित). –तम् (In Rhet.) A figure of speech in which the difference or distinction between two objects is shown to be completely obscured on account of their similarity, whether natural or artificial, in some respects; it is thus defined by Mammaṭa:—समेन लक्ष्मणा वस्तु वस्तुना यन्निगूह्यते। निजेनागन्तुना वापि तन्मीलितमिति स्मृतम्॥ K. P. 10.

मीव् 1 P. (मीवति) 1 To go, move. –2 To grow fat.

मीवन् *m.* Wind; Gīrvāṇa.

मीवर *a.* 1 Hurtful, injurious. –2 Respectable, venerable. –रः The leader of an army, a general.

मीवा 1 The tapeworm. –2 Wind.

मुः 1 An epithet of Śiva. –2 Bondage, confinement. –3 Final emancipation. –4 A funeral pile. –5 A reddish-brown or tawny colour.

मुकः The smell of cow-dung.

मुकन्दकः An onion.

मुक्‌: Liberation, deliverance; especially, final emancipation; also मुकम् *ind.*

मुकुटम् 1 A crown, tiara, diadem; मुकुटरत्नमरीचिभिरस्पृशत् R. 9. 13. [मुकुट is crescent-shaped, the किरीट is pointed and the मौलि has three points.] -2 A crest. -3 A peak, point. -Comp. **-उत्पलः** a crest-gem.

मुकुटी Cracking or snapping the fingers.

मुकुन्दः [मुकुम् दाति दा-क पृषो० मुम्] 1 N. of Viṣṇu or Kriṣṇa. -2 Quicksilver. -3 A kind of precious stone. -4 N. of one of the nine treasures of Kubera. -5 A kind of drum. -6 A kind of grain. -7 (In music) A kind of measure. -8 The resin of the गुग्गुल or कुरुन्द tree (Boswellia Thurifera); also मुकुन्दुः.

मुकुन्दकः 1 A kind of grain (कुधान्य). -2 An onion.

मुकुन्दा *f.* A kind of drum; वीणामुकुन्दामुरजादिभिश्च Bu. Ch. 1. 45.

मुकुरः 1 A mirror, looking-glass; गुणिनामपि निजरूपप्रतिपत्तिः परत एव संभवति। स्वमहिमदर्शनमक्ष्णोर्मुकुरतले जायते यस्मात् Vās.; Śi. 9. 73; N. 22. 43. -2 A bud; see मुकुलः. -3 The handle of a potter's wheel. -4 The Bakula tree. -5 The Mallikā creeper.

मुकुरायते Den. Ā. To become a mirror.

मुकुलः, -लम् 1 A bud; आविर्भूतप्रथममुकुलाः कन्दलीश्चानुकच्छम् Me. 21; R. 9. 31; 15. 99. -2 Anything like a bud; आलक्ष्यदन्तमुकुलान् (तनयान्) Ś. 7. 17. -3 The body. -4 The soul or spirit -5 A bud-like junction of the fingers. (मुकुलीकृ means 'to close in the form of a bud'; अथाग्रहस्ते मुकुलीकृताङ्गुलौ Ku. 5. 63.) *-a.* Closed (as eyes). -Comp. **-अग्रम्** a surgical instrument with a bud-like point.

मुकुलयति Den. P. To cause to close or shut, close; मुकुलयति च नेत्रे सर्वथा सुभ्रु खेदः Māl. 3. 8.

मुकुलायित = मुकुलित q. v.; Kāv.

मुकुलित *a.* 1 Having buds, budded, blossoming. -2 Half-closed, half-shut; दरमुकुलितनयनसरोजम् Gīt. 2; Ku. 3. 76; Māl. 1. 27; बाले लीलामुकुलितममी मन्थरा दृष्टिपाताः, किं क्षिप्यन्ते ...... Bh. 1. 62. -3 Closed, shut.

मुकुष्ठः, मुकुष्ठकः A kind of bean (Mar. मटकी ?).

मुक्त *p. p.* [मुच्-क्त] 1 Loosened, relaxed, slackened. -2 Set free, liberated, relaxed. -3 Abandoned, left, given up, set aside, taken off. -4 Thrown, cast, discharged, hurled. -5 Fallen down, dropped down from; विदन्ति मार्गं नखरन्ध्रमुक्तैर्मुक्ताफलैः Ku. 1. 6. -6 Drooping, unnerved; मुक्तैरवयवैरशयिषि Dk. -7 Given, bestowed. -8 Sent forth, emitted. -9 Finally saved or emancipated. -10 Ejected, spit out. -11 Deprived. -12 Absolved or emancipated (from sin or worldly existence); see मुच् also. -13 Opened, blown (as a flower); मुक्तपुष्पावकीर्णेन (शोभिता) Rām. 5. 1. 8. -14 Set up, established (प्रवर्तित); स दण्डो विधिवन्मुक्तः Rām. 7. 79. 9. **-क्तः** One who is finally emancipated from the bonds of worldly existence, one who has renounced all worldly attachments and secured final beatitude, an absolved saint; सुभाषितेन गीतेन युवतीनां च लीलया। मनो न भिद्यते यस्य स वै मुक्तोऽथवा पशुः॥ Subhāṣ. **-क्तम्** The spirit released from worldly existence. -Comp. **-अम्बरः** a Jaina mendicant of the *digambara* class. **-आत्मन्** *a.* finally saved or emancipated. (*-m.*) 1 the soul absolved from sins or from worldly matter. -2 a person whose soul is absolved. **-आसन** *a.* rising from a seat. **(-नम्)** a particular position of ascetics (सिद्धासन). **-कच्छः** a Buddhist. **-कञ्चुकः** a snake that has cast off its slough. **-कण्ठ** *a.* raising a cry. **(-ण्ठम्)** *ind.* bitterly, loudly, aloud; सा मुक्तकण्ठं व्यसनातिभाराच्चक्रन्द विग्ना कुररीव भूयः R. 14. 68. **-कर, -हस्त** *a.* open-handed, liberal, bountiful. **-केश** *a.* letting the hair hang down, having the hair dishevelled. **-चक्षुस्** *m.* a lion. **-चेतस्** *a.* absolved, emancipated. **-प्रपाकम्** an open court-yard connected with a tank; मुक्तप्रपाकमपि दारुशिलेष्टकाद्यैः। रत्नैरनेकबहुलोहविशेषकैश्च॥ Mānasāra 47. 31-32. **-बन्धन** *a.* free from bondage; यत्र भूविकमात्रेण कपोता मुक्तबन्धनाः. **-लज्ज** *a.* shameless. **-वसनः** see मुक्ताम्बर. **-शैशव** *a.* adult, grown up. **-सङ्ग** *a.* free from (wordly) ties or attachments, disinterested. **(-ङ्गः)** an ascetic of the fourth religious order (परिव्राजक).

मुक्तकम् 1 A missile, a missile weapon. -2 Simple prose (without compound words). -3 A detached stanza, the meaning of which is complete in itself; see Kāv. 1. 13; मुक्तकं श्लोक एवैकश्चमत्कारक्षमः सताम्.

मुक्ता 1 A pearl; हारोऽयं हरिणाक्षीणां लुठति स्तनमण्डले। मुक्तानामप्यवस्थेयं के वयं स्मरकिङ्कराः Amaru. 138 (where मुक्तानां means also 'of absolved saints'); Śukra. 4. 157. (Pearls are said to be produced from various sources, but particularly from oyster-shells:-करीन्द्रजीमूतवराहशङ्खमत्स्याहिशुक्त्युद्भववेणुजानि। मुक्ताफलानि प्रथितानि लोके तेषां तु शुक्त्युद्भवमेव भूरि॥ Malli.). -2 A harlot, courtezan. -3 N. of a plant (रास्ना). -Comp. **-अगारः, -आगारः** the pearl-oyster; लुठन्मुक्तागारे भवति परलोकं गतवती। हरेरद्य द्वारे शिव शिव शिवानां कलकलः Bv. 1. 32 (v. l.). **-आकारता** the state of having the shape of a pearl; मुक्ताकारतया तदेव नलिनीपत्रस्थितं राजते. **-आवलिः, -ली** *f.*, **-कलापः** a pearl-necklace. **-गुणः** a pearl-necklace, string of pearls; एकं मुक्तागुणमिव भुवः स्थूलमध्येन्द्रनीलम् Me. 48; R. 16. 18. **-जालम्** a string or zone of pearls; मुक्ताजालं चिरपरिचितं त्याजितो दैवगत्या Me. 98. **-दामन्** *n.* a string of pearls. **-दिश्** the quarter or cardinal point just quitted by the sun. **-पटलम्** a mass of pearls. **-पुष्पः** a kind of jasmine. **-प्रसूः** *f.* the pearl-oyster. **-प्रालम्बः** a string of pearls. **-फलम्** 1 a pearl; अनेन पर्यासयताश्रुबिन्दून् मुक्ताफलस्थूलतमान् स्तनेषु R. 6. 28; 16. 62; Ku. 1. 6. -2 a kind of flower. -3 the custard-apple. -4 camphor. -5 N. of a work on Bhakti by Bopadeva; चतुरेण चतुर्वर्गचिन्तामणिवणिज्यया। हेमाद्रिर्बोपदेवेन मुक्ताफलमचीकरत्॥ **-मणिः, -रत्नम्** a pearl. °सरः a necklace of pearls; अयं तावद्बाष्प-

स्त्रुटित इव मुक्तामणिसरः U. 1. 29. –मातृ *f.* the pearl-oyster. –लता, –स्रज् *f.*, –हारः a pearl-necklace. –शुक्तिः, –स्फोटः the pearl-oyster.

मुक्तिः *f.* [मुच्-क्तिन्] 1 Release, liberation, deliverance; स मुक्तिः सातिमुक्तिः Bṛi. Up. 3. 1. 3. –2 Freedom, emancipation. –3 Final beatitude or emancipation, absolution of the soul from metempsychosis; अधिगत्य जगत्यधीश्वराद्थ मुक्तिं पुरुषोत्तमात्ततः N. 2. 1 (where मुक्ति has sense 1 also). –4 Leaving, giving up, abandoning, avoiding; संसर्गमुक्तिः खलेषु Bh. 2. 62. –5 Throwing, hurling, letting off, discharging. –6 Unloosing, opening. –7 Discharge, paying off (as a debt). –Comp. –क्षेत्रम् 1 an epithet of Benaras. –2 a place where final emancipation is attainable. –पतिः lord of beatitude. –मार्गः the way to final beatitude. –मुक्तः frank-incense.

मुक्त्वा *ind.* 1 Having left, abandoned &c. –2 Excepting, except (with the force of a preposition).

मुखम् [खन् अच् डित् धातोः पूर्वं मुट् च cf. Uṇ. 5. 20] 1 The mouth (fig. also); प्रजासृजा यतः खातं तस्मादाहुर्मुखं बुधाः; ब्राह्मणोऽस्य मुखमासीत् Ṛv. 10. 90. 12; सभ्रूभङ्गं मुखमिव Me. 24; त्वं मम मुखं भव V. 1 'be my mouth or spokesman'. –2 The face, countenance; परिवृत्तार्धमुखी मयाद्य दृष्टा V. 1. 17; नियमक्षाममुखी धृतैकवेणिः Ś. 7. 21; so चन्द्रमुखी, मुखचन्द्रः &c; ओष्ठौ च दन्तमूलानि दन्ता जिह्वा च तालु च। गलो गलादि सकलं सप्ताङ्गं मुखमुच्यते॥ –3 The snout or muzzle (of any animal). –4 The front, van, forepart; head, top; (लोचने) हरति मे हरिवाहनदिङ्मुखम् V. 3. 6. –5 The tip, point, barb (of an arrow), head; पुरारिमप्राप्तमुखः शिलीमुखः Ku. 5. 54; R. 3. 57. –6 The edge or sharp point (of any instrument). –7 A teat, nipple; मध्ये यथा श्याममुखस्य तस्य मृणालसूत्रान्तरमप्यलभ्यम् Ku. 1. 40; R. 3. 8. –8 The beak or bill of a bird. –9 A direction, quarter; as in अन्तर्मुख. –10 Opening, entrance, mouth; नीवाराः शुकगर्भकोटरमुखभ्रष्टास्तरूणामधः Ś. 1. 14; नदीमुखेनेव समुद्रमाविशत् R. 3. 28; Ku. 1. 8. –11 An entrance to a house, a door, passage. –12 Beginning, commencement; सखीजनोद्वीक्षणकौमुदीमुखम् R. 3. 1; दिनमुखानि रविर्हिमनिग्रहैर्विमलयन् मलयं नगमत्यजत् 9. 25; 5. 76; Ghaṭ. 2. –13 Introduction. –14 The chief, the principal or prominent (at the end of comp. in this sense); बन्धान्मुक्त्यै खलु मखमुखान् कुर्वते कर्मपाशान् Bv. 4. 21; so इन्द्रमुखा देवाः &c. –15 The surface or upper side. –16 A means. –17 A source, cause, occasion. –18 Utterance; as in मुखसुख; speaking, speech, tongue; आत्मनो मुखदोषेण बध्यन्ते शुकसारिकाः Pt. 4. 44. –19 The Vedas, scripture. –20 (In Rhet.) The original cause or source of the action in a drama. –21 The first term in a progression (in alg.). –22 The side opposite to the base of a figure (in geom.). –Comp. –अग्निः 1 a forest conflagration. –2 a sort of goblin with a face of fire. –3 the consecrated or sacrificial fire. –4 fire put into the mouth of a corpse at the time of lighting the funeral pile. –5 a Brāhmaṇa. –अनिलः, –उच्छ्वासः breath. –अस्रः a crab. –आकारः look, mien, appearance. –आक्षेपः 1 an invective. –2 the act of throwing up soil with the ploughshare. –आसवः nectar of the lips. –आस्रवः, –स्रावः spittle, saliva. –आस्वादः kissing the mouth; Y. –इन्दुः a moon-like face, *i. e.* a round lovely face. –उच्छ्वासः breath. –उल्का a forest-conflagration. –कमलम् a lotus-like face. –खुरः a tooth. –गन्धकः an onion. –गोपनम् concealment of the face; अवधीरितमुखमण्डलमुखगोपनं किमिति Udb. –ग्रहणम् kissing the mouth. –घण्टा *f.* hurraying of women in festivities. –चन्द्रः a moon-like face. –चपल *a.* talkative, garrulous. –चपेटिका a slap on the face. –चालिः an introductory dance. –चीरिः *f.* the tongue. –चूर्णम् scented powder to smear the face with; छावकरं मुखचूर्णमृतुश्रियः R. 9. 45. –जः 1 a Brāhmaṇa. –2 a tooth. –जाहम् the root of the mouth. –दूषणः an onion. –दूषिका an eruption disfiguring the face. –दोषः fault of the tongue; आत्मनो मुखदोषेण बध्यन्ते शुकसारिकाः Pt. 4. 44. –निरीक्षकः a lazy fellow, an idler. –निवासिनी an epithet of Sarasvatī. –पटः a veil; कुर्वन् कामं क्षणमुखपटप्रीतिमैरावतस्य Me. 64. –पाकः inflammation of the mouth; द्राक्षाविपाकसमये मुखपाको भवति काकानाम् Udb. –पिण्डः a mouthful of food; cf. को न याति वशं लोके मुखपिण्डेन पूरितः Bh. 2. 118. –पुष्पकम् a kind of ornament. –पूरणम् 1 filling the mouth. –2 a mouthful of water, a mouthful in general. –प्रसादः a pleased countenance, graciousness of aspect. –प्रसाधनम् decorating the face. –प्रियः an orange. (–यम्) cloves. –प्रेक्ष *a.* observing or watching the face. –फुल्लकम् a kind of ornament. –बन्धः a preface, an introduction. –बन्धनम् 1 a preface. –2 a lid, cover. –भगा (a woman) who suffers her mouth to be used as a vulva. –भङ्गः 1 a blow on the face. –2 wry face, grimace. –भूषणम् a preparation of betel; see ताम्बूल. –भेदः 1 distortion of the face. –2 gaping. –मण्डनकः a kind of tree (तिलक). –मण्डलम् the (round) face. –मधु *a.* honey-mouthed, sweet-lipped. –माधुर्यम् a particular disease of the phlegm. –मारुतः breath. –मार्जनम् washing the face. –मुद्रा silence; यापदृष्टिरपि या मुखमुद्रा N. 5. 120. –मोदः Hyperanthera Moringa (Mar. शेवगा). –यन्त्रणम् the bit of a bridle. –रज्जुः *f.* the bridle of a horse. –रसः speech, talk; मधुरमुखरसामृतकलया चान्तस्तापमनघाईसि क्षमयितुम् Bhag. 6. 9. 41. –रागः the colour or complexion of the face; दद्दृशुर्विस्मितास्तस्य मुखरागं समं जनाः R. 12. 8; 17. 31; तव खलु मुखरागो यत्र भेदं प्रयातः Śi. 11. 31. –रेखा feature, mien, air. –रोगः a disease of the mouth or face. –लाङ्गलः a hog. –लेपः 1 anointing the face or upper side (of a drum); मृदङ्गो मुखलेपेन करोति मुखरध्वनिम् Bh. 2. 118. –2 a disease of the phlegmatic humour. –वल्लभः the pomegranate tree. –वस्त्रिका a piece of fine cloth (net) held before the face (Mar. बुरखा). –वाद्यम् 1 an instrument of music sounded with the mouth, any wind-instrument. –2 a sound made with the mouth; (Mar. बोंब). –वासः, –वासनम् a perfume used to scent breath. –विलुण्ठिका a she-goat. –विषमः one of the

ways of embezzlement namely misrepresentation of the source of income; Kau. A. 2. 8. –विष्ठा a species of cockroach. –वैरस्यम् bad taste in the mouth. –व्यादानम् gaping, yawning. –शफ *a.* abusive, foul-mouthed, scurrilous. –शाला entrance-hall, vestibule. –शुद्धिः *f.* washing or purifying the mouth. –शृङ्गः a rhinoceros. –शेषः an epithet of Rāhu. –शोधन *a.* 1 cleansing the mouth. –2 pungent, sharp. (–नः) the sharp flavour, pungency. (–नम्) 1 cleansing the mouth. –2 cinnamon. –शोधिन् *m.* the citron tree. –शोषः dryness of the mouth. –श्रीः *f.* 'beauty of countenance', a lovely face. –संदंशः forceps. –संधिः *m.* A kind of fugue; S. D. 6th Parichcheda. –संभवः a Brāhmaṇa. –सुखम् facility of pronunciation, phonetic ease. –सुरम् the nectar of the lips (अधरामृत). –स्रावः saliva. –हास्तः cheerfulness or liveliness of countenance; सकमलमुखहासं वीक्षितः पद्मिनीभिः Śi. 11. 47.

मुखंपचः A beggar, mendicant.

मुखर *a.* [मुखं मुखव्यापारं कथनं राति रा-क Tv. cf. P. V. 2. 107 Vārt. also] 1 Talkative, garrulous, loquacious; मुखरा खल्वेषा गर्भदासी Ratn. 2; मुखरतावसरे हि विराजते Ki. 5. 16; तद्रूपवर्णनामुखर K. 189; Bk. 2. 51. –2 Noisy, making a continuous sound, tinkling, jingling (as an anklet &c.); स्तम्बेरमा मुखरशृङ्खलकर्षिणस्ते R. 5. 72; अन्तःकूजन्मुखरशकुनो यत्र रम्यो वनान्तः U. 2. 25,20; Māl. 9. 5; मुखरमधीरं त्यज मञ्जीरं रिपुमिव केलिषु लोलम् Gīt. 5; Mk. 1. 35; तोयोत्सर्गस्तनितमुखरो मा स्म भूः Me. 39. –3 Sounding, resonant or resounding with (usually at the end of comp.); स्थाने स्थाने मुखरककुभो झाङ्कृतैर्निर्झराणाम् U. 2. 14; मण्डलीमुखराशिखरे (लताकुञ्जे) Gīt. 2; गोदावरीमुखरकन्दरगिरिः U. 1; R. 13. 40. –4 Expressive or indicative of. –5 Foul-mouthed, abusive, scurrilous. –6 Mocking, ridiculing. –रः 1 A crow. –2 A leader, the chief or principal person; यदि कार्यविपत्तिः स्यान्मुखरस्तत्र हन्यते H. 1. 27. –3 A conch-shell. –री The bit of a bridle.

मुखरता Talkativeness, noisiness; स्तुवञ्जिह्रेमि त्वां न खलु ननु धृष्टा मुखरता Śiva-mahimna 9.

मुखरयति Den. P. 1 To make resonant or noisy, cause to sound or echo. –2 To make (one) talk or speak; अत एव शुश्रूषा मां मुखरयति Mu. 3. –3 To notify, declare, announce.

मुखरिका 1 The bit of a bridle. –2 Conversation; सुललितमुखरिकामृतेनाप्यायमानः Bhāg. 5. 25. 7 (v. l. मुखरिता).

मुखरित *a.* Made noisy or resonant with, ringing or noisy with; गण्डोड्डीनालिमालामुखरितककुभस्ताण्डवे शूलपाणेः Māl. 1. 1.

मुखरीकृ 8 U. 1 To make resonant or noisy with. –2 To cause to resound. –3 To cause to speak or talk; इदानीं विज्ञापनायां मुखरीकरोति Mu. 7.

मुखीय *a.* Being at the top or head, being foremost or in the front.

मुख्य *a.* [मुखे आदौ भवः यत्] 1 Relating to the mouth or the face; अथ ह य एवायं मुख्यः प्राणः Ch. Up. 1. 2. 7; Ms. 5. 141. –2 Chief, principal, foremost, first, preeminent, prominent; चन्दनस्य च मुख्यस्य पादपैरुपशोभितम् Mb. 12. 169. 8; द्विजातिमुख्यः, वारमुख्या, योधमुख्याः &c. –3 Foremost, recited first; मुख्येन वा नियम्येत MS. 10. 5. 60 (where explaining मुख्य, शबर writes मुख्यत्वं नाम रथन्तरस्य प्रथमाधीतत्वम्). –ख्यः A leader, guide. –ख्यम् 1 A principal rite or ordinance. –2 Reading or teaching the Vedas. –3 The month reckoned from new moon to new moon. –4 The category called अपूर्व (in पूर्व-मीमांसा); मुख्यभेदे यथाधिकारं भावः स्यात् MS. 7. 1. 1 (where शबर explains मुख्य by अपूर्व). –Comp. –अर्थः the primary or original (as opp. गौण) meaning of a word. –उपायाः the four chief stratagems (साम, दान, भेद and दण्ड). –क्रमः the order of the principal act; मुख्यक्रमेण वाङ्गानां तदर्थत्वात् MS. 5. 1. 14. –चान्द्रः the chief lunar month. –नृपः, –नृपतिः a sovereign monarch, paramount sovereign. –मन्त्रिन् *m.* the prime minister.

मुख्यता, –त्वम् Pre-eminence, first rank or position.

मुख्यशः, मुख्यतः *ind.* Chiefly, principally, above all.

मौख *a.* Belonging to teachers; ज्ञातियौनमौखस्रौवकुलहृदयमित्रसंकीर्तनम् Kau. A. 2. 10. 28.

मुख (खु) ण्डी A kind of weapon.

मुगूहः A kind of gallinule.

मुग्ध *a.* [मुह्-क्त] 1 Stupefied, fainted. –2 Perplexed, infatuated. –3 Foolish, ignorant, silly, stupid; शशाङ्क केन मुग्धेन सुधांशुरिति भावितः Bv. 2. 29; अयि मुग्धे कास्या चिन्ता प्रियासमागमस्य V. 3. –4 Simple, artless, innocent; अपूर्वकर्मचण्डालमयि मुग्धे विमुञ्च माम् U. 1. 46; Māl. 7. 1; दृष्टोत्साहश्चकितचकितो मुग्धसिद्धाङ्गनाभिः Me. 14. –5 Erring, mistaken. –6 Attractive by youthful simplicity (not yet acquainted with love), child-like; (कः) अयमाचरत्यविनयं मुग्धासु तपस्विकन्यासु Ś. 1. 24; U. 6. 35; R. 9. 34. –7 (Hence) Beautiful, lovely, charming, pretty; हरिरिह मुग्धवधूनिकरे विलासिनि विलसति केलिपरे Gīt. 1; U. 3. 5. –8 New (as the moon); मालतीनयनमुग्धचन्द्रमाः Māl. 9. 21 (com. बालचन्द्रः). –ग्धा A young girl attractive by her youthful simplicity, a pretty young maiden; (regarded as a variety of Nāyikā in poetic compositions); काचं मणिं काञ्चनमेकसूत्रे मुग्धा निबध्नन्ति किमत्र चित्रम् Udb. –Comp. –अक्षी a lovely-eyed woman; वियोगो मुग्धाक्ष्याः स खलु रिपुघातावधिरभूत् U. 3. 44. –आनना having a lovely face. –आलोक *a.* lovely to look at; दशनमुकुलैर्मुग्धालोकं शिशुर्दधती मुखम् U. 1. 20. –दृश् *a.* fair-eyed. –धी, –बुद्धि, –मति *a.* silly, foolish, stupid, simple. –बोधम् N. of a celebrated grammar by Vopadeva. –भावः simplicity, silliness. –विलोकितम् a beautiful glance. –स्वभावः artlessness, simplicity.

मुग्धता, –त्वम् 1 Silliness. –2 Artlessness, simplicity. –3 Loveliness, charmingness.

विकृष् 1 P. 1 To draw, pull. -2 To bend (as a bow); शरासनं तेषु विकृष्यतामिदम् Ś. 6. 28. -3 To deprive of, withhold, keep back. -4 To destroy, ruin. -5 To lead (an army). -6 To plough.

विकर्षः 1 Drawing asunder, pulling apart. -2 An arrow.

विकर्षणः N. of one of the five arrows of Cupid. -णम् 1 Drawing, dragging, pulling asunder. -2 A cross throw. -3 Abstinence from food. -4 Searching.

विकृष्ट *p. p.* 1 Dragged asunder, pulled hither and thither. -2 Drawn, pulled, drawn towards or attracted. -3 Extended, protracted. -4 Making a noise; (see कृष् with वि). -Comp. -सीमान्त *a.* having extended boundaries; ग्रामान् विकृष्टसीमान्तान् Rām. 2. 49. 3.

विकृ 6 P. 1 To scatter, throw about; strew or spread about; व्यकीर्यत त्र्यम्बकपादमूले पुष्पोच्चयः पल्लवभङ्गभिन्नः Ku. 3. 61; Ki. 2. 59; Bk. 1. 3; 14. 25. -2 To split, cut to pieces; असिर्गात्रं गात्रं सपदि लवशस्ते विकिरतु Mal. 5. 34. -3 To pollute, contaminate. -4 To dissolve; एतद्यो वेद निहितं गुहायां सोऽविद्याग्रन्थिं विकिरतीह Muṇḍa. 2. 1. 10. -5 To pour out. -6 To heave (a sigh).

विकिरः 1 A scattered portion or fallen bit. -2 One who tears or scatters, a bird; कङ्कोलीफलजग्धिमुग्धविकिरव्याहारिणस्तद्भुवो भागाः Mal. 6. 19. -3 A well. -4 A tree. -5 A scattered portion of rice (offered to hostile beings in a sacrifice); उच्छिष्टं भागधेयं स्याद्दर्भेषु विकिरश्च यः Ms. 3. 245. -6 Water trickled through; Suśr.

विकिरणम् 1 Scattering, throwing about, dispersing. -2 Spreading abroad. -3 Tearing up. -4 Killing (हिंसन). -5 Knowledge. -णः The *Arka* tree.

विकीर्ण *p. p.* 1 Scattered, dispersed. -2 Diffused. -3 Celebrated. -4 Dishevelled (as hair). -र्णम् A particular fault in pronouncing vowels. -Comp. -केश, -मूर्धज *a.* tearing the hair, having dishevelled hair; विललाप विकीर्णमूर्धजा Ku. 4. 4. -रुम् a kind of perfume.

विकॢप् 1 Ā. 1 To doubt, be doubtful; कथंचित्र विकल्पन्ते विद्वद्भिश्चिन्तिता नयाः Pt. 1. 339. -2 To be optional. -*Caus.* 1 To doubt, question; एवं कृष्णसखः कृष्णो भ्रात्रा राज्ञा विकल्पितः Bhāg. 1. 15. 1. -2 To consider, reflect upon; सखीनियोगोऽपि विकल्प्यते Ś. 3. -3 To presume, conjecture. -4 To prepare or arrange differently. -5 To make, form. -6 To exchange. -7 To admit as optional. -8 To state a dilemma. -9 To reflect upon.

विकल्पः 1 Doubt, uncertainty, indecision, hesitation; तत् सिषेवे नियोगेन स विकल्पपराङ्मुखः R. 17. 49. -2 Suspicion; Mu. 1. -3 Contrivance, art; मायाविकल्परचितैः R. 13. 75. -4 Option, alternative (in gram.); तुल्यार्थयोर्हि तुल्यविषययोर्विकल्पो भवति न नानार्थयोः ŚB. on MS. 10. 6. 33. -5 Sort, variety; दण्डविकल्पः Ms. 9. 228; भूषणानां विकल्पम् Me. 76. -6 An error, a mistake, ignorance. -7 Distinction; एवं सुरासुरगणाः समदेशकालहेतुकर्ममतयोऽपि फलेऽविकल्पाः Bhāg. 8. 9. 28. -8 A division of Kalpa; यावान् कल्पो विकल्पो वा यथा कालोऽनुमीयते Bhāg. 2. 8. 12. -9 A god; वैकारिको विकल्पानाम् Bhāg. 10. 85. 11. -10 Origin (उत्पत्ति); आत्मा केवल आत्मस्थो विकल्पापायलक्षणः Bhāg. 11. 25. 27. -11 Admission, statement. -12 Fancy, imagination. -13 Mental occupation. -Comp. -उपहारः an optional offering. -जालम् a net-like indecision, a dilemma.

विकल्पक *a.* A distributor, apportioner; Mb. 3.

विकल्पनम् 1 Admitting of a doubt. –2 Allowing an option. –3 Indecision. –4 Inconsideration.

विकल्पित *a.* 1 Prepared, arranged. –2 Divided, manifold.

विकल्पिन् *a.* 1 Possessing doubt. –2 Versed in the Mīmāṁsā.

विकेश *a.* (–शी *f.*) 1 Having loose hair. –2 Having no hair, bald (as head). **–शी** 1 A woman with loose hair. –2 A woman without hair. –3 A small tress of hair tied up separately and then collected into the larger braid or *Veṇi.* –4 N. of the wife of Śiva in the form of the Earth (one of the 8 forms of Śiva; cf. यामाहुः सर्वभूतप्रकृतिः Ś. 1. 1.). **–Comp. –तारका** a comet.

विकेशिका Lint; Suśr.

विकोश, –ष *a.* 1 Without husk. –2 Unsheathed, uncovered; विकोशनिर्धौततनोर्महासेः Ki. 17. 45; R. 7. 48.

विक्कः A young elephant (in the *tenth* (?) year). M. W. gives twenty years old; विक्को विंशतिवर्षः स्यात् Abh. Chin. 1220; Mātaṅga L. 5. 11; विक्कैरिव महागजः Dharmābhyudaya-mahākāvya 2. 25.

विक्रम् 1 Ā. 1 To walk along or through; विष्णुस्त्रेधा विचक्रमे 'took 3 steps'; जले विक्रममाणाया हनूमान् शतयोजनम् Bk. 8. 24. –2 To assail, overcome, conquer. –3 To cleave; split open (P.) –4 To advance, proceed. –5 To show prowess or valour; तत्प्रहरणान्याच्छिद्य विक्रामतः Māl. 8. 9.

विक्रमः 1 A step, stride, pace; गतेषु लीलाञ्चितविक्रमेषु Ku. 1. 34; Ś. 7. 6; निष्पेषवन्त्यायतविक्रमाणि (सप्तपदानि) Bu. Ch. 1. 33; Mb. 7. 49. 5; cf. त्रिविक्रम. –2 Stepping over, walking; going, gait; ततः सुमन्त्रस्त्वरितं गत्वा त्वरितविक्रमः Rām. 1. 8. 5; गतैः सहावैः कलहंसविक्रमम् Ki. 8. 29. –3 Overcoming, overpowering. –4 Heroism, prowess, heroic valour; अनुत्सेकः खलु विक्रमालंकारः V. 1; R. 12. 87, 93. –5 N. of a celebrated king of Ujjayinī. –6 N. of Viṣṇu. –7 Strength, power. –8 Intensity. –9 Stability. –10 A kind of grave accent. –11 Non-change of the विसर्ग into an उष्मन्. –12 The third astrological house. **–Comp. –अर्कः, –आदित्यः** see विक्रम. **–कर्मन्** *n.* a heroic deed, feat of valour. **–शीलः** N. of a monastery; Buddh. **–स्थानम्** a promenade.

विक्रमणम् A stride (of Viṣṇu); छलयसि विक्रमणे बलिमद्भुतवामन Gīt. 1. –2 Heroism. –3 (With Pāśupatas) Supernatural power.

विक्रमितम् Prowess; निष्पेततुः परमविक्रमितातिवेपस्कन्धप्रवालविटपौ कृतचण्डशब्दौ Bhāg. 10. 10. 27.

विक्रमिन् *a.* 1 Chivalrous, heroic. –2 Powerful, strong. *–m.* 1 A lion. –2 A hero. –3 An epithet of Viṣṇu.

विक्रान्त *p. p.* 1 Stepped or passed beyond. –2 Powerful, heroic, valiant, chivalrous; युधामन्युश्च विक्रान्तः Bg. 1. 6; Ki. 16. 2. –3 Victorious, overpowering (one's enemies). **–न्तः** 1 A hero, warrior. –2 A lion. –3 N. of a kind of संधि which leaves विसर्ग unchanged. **–न्तम्** 1 A pace, stride; तद्विक्रान्तैर्विजितानीह त्रीणि Mb. 13. 158. 20. –2 Heroism, valour, prowess. –3 The jewel called वैक्रान्त. –4 A kind of intoxicating drink.

विक्रान्तिः *f.* 1 Stepping, striding. –2 A horse's gallop or canter. –3 Heroism, valour, prowess.

विक्रान्तृ *a.* Valiant, victorious. *–m.* 1 A lion. –2 A hero, victor.

विक्रस्नः The moon.

विक्रिया 1 Change, modification, alteration; श्मश्रुप्रवृद्धिजनिताननविक्रियान् R. 13. 71; 10. 17. –2 Agitation, excitement, perturbation, excitement of passion; अथ तेन निगृह्य विक्रियामभिशप्तः फलमेतदन्वभूत् Ku. 4. 41; 3. 34. –3 Anger, wrath, displeasure; साधोः प्रकोपितस्यापि मनो नायाति विक्रियाम् Subhāṣ; लिङ्गैर्मुदः संवृतविक्रियास्ते R. 7. 30; किमकारणमस्मासु गतवानसि विक्रियाम् Bm. 1. 911. –4 Reverse, evil; विक्रियायै न कल्पन्ते संबन्धाः सदनुष्ठिताः Ku. 6. 29 (विक्रियायै=वैकल्योत्पादनाय Malli.) –5 Knitting, contraction (of the eyebrows); भ्रूविक्रियायां विरतप्रसंगैः Ku. 3. 47. –6 Any sudden movement, as in रोमविक्रिया V. 1. 12 'thrill'. –7 A sudden affection or seizure, disease. –8 Violation, vitiation (of the proper duties); इत्याप्तवचनाद्रामो विनेष्यन् वर्णविक्रियाम् R. 15. 48. –9 A preparation or dish of rice &c. –10 Injury, harm. –11 Extinction (of a lamp). **–Comp. –उपमा** a kind of Upamā mentioned by Daṇḍin; see चन्द्रबिम्बादिवोत्कीर्णं पद्मगर्भादिवोद्धृतम्। तव तन्वङ्गि वदनमित्यसौ विक्रियोपमा ॥ Kāv. 2. 41.

विक्री 9 Ā. 1 To sell (Ātm. in this sense); गवां शतसहस्रेण विक्रीणिषे सुतं यदि Rām.; विक्रीणीत तिलाञ्शुद्धान् Ms. 10. 90; 8. 197, 222; Śānti. 1. 12. –2 To barter, exchange; नाकस्माच्छाण्डिलीमाता विक्रीणाति तिलैस्तिलान् Pt. 2. 65.

विक्रयः 1 Sale, selling; यासां नाददते शुल्कं ज्ञातयो न स विक्रयः Ms. 3. 54. –2 The selling price; Ms. 7. 127. –3 The market; विक्रयाद्यो धनं किंचिद् गृह्णीयात् कुलसंनिधौ Ms. 8. 201. **–Comp. –अनुशयः** rescission of a sale; Ms. 8. 5. **–पत्रम्** a bill of sale, sale-deed. **–वीथिः** market.

विक्र (क्रा) यिकः, –विक्रयिन् *m.* A dealer, seller, vendor.

विक्रायक *a.* Selling; पुत्रविक्रायकं ध्रुवम् Rām. 2. 12. 78.

विक्रीत *p. p.* Sold; विक्रीते करिणि किमङ्कुशे विवादः Subhāṣ. **–तम्** Sale; योगाधमनविक्रीतम् Ms. 8. 165

विक्रेय *a.* Saleable, vendible (as an article); Y. 2. 246.

विक्रीडः 1 A playing ground. –2 A plaything, toy.

विक्रुश् 1 P. 1 To call aloud, cry out loudly; आक्रोश विक्रोश लपाधिचण्डम् Mk. 1. 41; Bk. 14. 42; 16. 32. -2 To utter (with acc.). -3 To call out to (with acc.). -4 To resound. -5 To abuse, revile, censure.

विक्रुष्ट *p. p.* 1 Exclaimed, cried out. -2 Harsh, cruel, unkind. -3 Offensive; (परित्यजेत्) धर्मं चाप्यसुखोदर्कं लोकविक्रुष्टमेव च Ms. 4. 176. -ष्टम् 1 A cry for help; विक्रुष्टे नाभिधावकः Y. 2. 234. -2 Abuse.

विक्रोशः, -विक्रोशनम् 1 Calling out, exclaiming; पृष्ठतो द्रौपदी...सविक्रोशम् Mb. 14. 66. 13. -2 Abusing.

विक्रोष्टृ *m.* 1 One who calls out for help; अकारणे च विक्रोष्टा Y. 2. 234. -2 A reviler.

विक्लव *a.* 1 Overcome with fear, startled, alarmed, frightened; आचकाङ्क्ष घनशब्दविक्लवाः R. 19. 38; Ku. 4. 11. -2 Timid; तोयोत्सर्गस्तनितमुखरो मा च भूर्विक्लवास्ताः Me. 39. -3 Affected by, overcome with; निसर्गदुर्बोधमबोधविक्लवाः क्व भूपतीनां चरितं क्व जन्तवः Ki. 1. 6. -4 Agitated, excited, confused, bewildered; प्रतिषेधाक्षरविक्लवाभिरामम् Ś. 3. 24. -5 Distressed, afflicted; grieved; निराकरणविक्लवायाः प्रियायाः Ś. 6; Śi. 12. 63; Ku. 4. 39; सुतविक्लवाय राज्ञे Bu. Ch. 1. 86. -6 Disgusted with, averse from; मृगयाविक्लवं चेतः Ś. 2. -7 Faltering; प्रस्थानविक्लवगतेरवलम्बनार्थम् Ś. 5. 3. -वम् 1 Agitation, bewilderment; किमिदं देवि करोषि हृदि विक्लवम् Rām. 2. 44. 25. -2 Fear; गतविक्लवः Rām. 7. 32. 45.

विक्लवता Timidity; भवति हि विक्लवता गुणोऽङ्गनानाम् Śi.7.43.

विक्लवितम् Despondent language.

विक्लिन्न *p. p.* 1 Very moist, thoroughly wetted. -2 Decayed, withered up. -3 Old.

विक्लिष्ट *p. p.* 1 Excessively afflicted, distressed. -2 Injured, destroyed. -ष्टम् A fault in pronunciation.

विक्लेदः 1 Wetting thoroughly; पुरीषमूत्रविक्लेदम् (गर्भवासम्) Mb. 12. 213. 6. -2 Wetness, moisture. -3 Dissolution.

विक्लेदनम् The act of softening (by cooking or boiling).

विक्लेशः An incorrect pronunciation of the dentals.

विक्षत *p. p.* 1 Torn asunder, wounded, hurt, struck; विक्षतं चायसैर्बाणैर्मत्प्रयुक्तैरजिह्मगैः Mb. 3. 173. 30. -2 Beaten, stamped; महीं महाककुत्कायः कम्पयन् खुरविक्षताम् Bhāg. 10. 36. 1. -3 Affected, seized; स राजा शापविक्षतः Rām. 7. 54. 4. -तम् Wounding, a wound.

विक्षावः 1 Cough, sneezing. -2 A sound; विक्षावैस्तोयविश्रावं तर्जयन्तो महोदधेः Bk. 7. 36.

विक्षित *a.* Miserable, wretched.

विक्षिप् 6 P. 1 To throw about, scatter. -2 To throw, cast. -3 To divert. -4 To distract. -5 To extend, stretch out. -6 To reject, discard. -7 To press against. -8 To toss about. -9 To prepare, make up. -10 To bend (a bow); all these last four meanings can be seen in the following verse:—रक्षांसि वक्षांसि च विक्षिपन्ति गात्राणि कान्तासु च विक्षिपन्ति । रूपाणि चित्राणि च विक्षिपन्ति दृढानि चापानि च विक्षिपन्ति ॥ Rām. 5. 5. 12.

विक्षिप्त *p. p.* 1 Scattered, thrown about, dispersed, cast about. -2 Discarded, dismissed. -3 Sent, despatched. -4 Distracted, bewildered, agitated; प्रविक्षिप्तं चेतः प्रविशति च मोहान्धतमसम् Māl. 9. 8. -5 Refuted; (see क्षिप् with वि). -6 Extended, spread out; विक्षिप्तौ राक्षसेन्द्रस्य भुजाविन्द्रध्वजोपमौ Rām. 5. 10. 15, 18. -प्तम् One of the चित्तभूमिs in the Yogaśāstra; क्षिप्तं मूढं विक्षिप्तमेकाग्रं निरुद्धमिति चित्तभूमयः । Yogasūtrabhāṣya.

विक्षेपः 1 Throwing away or asunder, scattering about. -2 Casting, throwing, discharging (opp. संहार); संहारविक्षेपसहस्रकोटीस्तिष्ठन्ति जीवाः Mb. 12. 280. 30; संहारविक्षेपलघुक्रियेण R. 5. 45. -3 Waving, moving about, shaking, moving to and fro; बाहुविक्षेपकरणां समुद्यम्य महागदाम् Rām. 7. 32. 41. लाङ्गूल° Ku. 1. 13. -4 Sending, despatching. -5 Distraction, confusion, perplexity; Māl. 1. -6 Alarm, fear. -7 Refutation of an argument. -8 Polar latitude. -9 Looking about vaguely or wildly. -10 Neglecting (time). -11 Extension, projection. -12 A kind of weapon. -Comp. -ध्रुवः (in astr.) the greatest inclination of a planet's orbit. -शक्तिः *f.* (in Vedānta phil.) the power of Māyā (अविद्या).

विक्षेपणम् 1 Throwing, casting, discharging. -2 Despatching, sending. -3 Scattering, dispersing. -4 Confusion, perplexity.

विक्षिणकः 1 N. of the chief of a class of beings attending on Śiva. -2 An assembly of the gods. -3 A destroyer. -4 A place from which flesh-eaters are excluded.

विक्षीरः The *Arka* tree.

विक्षुभ् 1 Ā., 4, 9 P. 1 To be greatly agitated or disturbed. -2 To confuse, disturb, perplex. -*Caus.* To agitate, disturb, confuse &c.

विक्षोभः 1 Shaking, agitation, movement; वीचि° R. 1. 43. -2 Agitation of mind, distraction, alarm. -3 Conflict, struggle. -4 Tearing open; सुरारिवक्षोविक्षोभजासृक् Śi. 3. 7.

विख, विखु, विख्य, विख्र, विख्रु, विग्र *a.* Noseless. -Comp. -नस् *m.* an epithet of Brahman; विखनसार्थितो विश्वगुप्तये सख उदेयिवान् सात्वतां कुले Bhāg. 10. 31. 4.

विखण्डित *p. p.* 1 Broken up, divided. -2 Cleft in two. -3 Disfigured, mutilated; शस्त्रैरपि विखण्डिताः (न वशं योषितो यान्ति) Pt. 4. 89. -4 Refuted.

विखानसः A kind of hermit.

विखासा The tongue.

विखुरः 1 A demon, goblin. -2 A thief.

विखेद *a.* Fresh, alert.

विख्या 2 P. 1 To be well-known or famous. -2 To look at, see. -3 To call, name. -4 To celebrate. -5 To make visible, illuminate. -*Caus.* To proclaim, announce, publish.

विख्यात *p. p.* 1 Renowned, well-known, celebrated, famous. -2 Called, named. -3 Avowed, confessed.

विख्यातिः *f.* Celebrity, fame, reputation.

विख्यापनम् 1 Publishing, proclaiming. -2 Explanation. -3 Confessing, acknowledging.

विगण् 10 P. 1 To number, compute; वायवीयैर्विगण्यन्ते विभक्ताः परमाणवः Y. 3. 104. -2 To regard, consider; नन्वात्मानं बहु विगणयन्नात्मनैवावलम्बे Me. 111; R. 1. 87. -3 To disregard, not to mind. -4 To reflect, think; विगणय्य कारणमनेकगुणम् Ki. 6. 37; किमपि विगणयन्तो बुद्धिमन्तः सहन्ते Pt. 3. 43.

विगणनम् 1 Reckoning, computing, calculation. -2 Considering, deliberating. -3 Paying off a debt; P. I. 3. 36.

विगद *a.* Healthy, well.

विगन्ध *a.* 1 Having a bad smell. -2 Odourless.

विगन्धकः The tree called इङ्गुदी.

विगम् 1 P. To pass away (as time &c.); संध्ययापि सपदि व्यगमि Śi. 9. 17. -2 To go away, depart. -3 To vanish; disappear; सलज्जाया लज्जा व्यगमदिव दूरं मृगदृशः Gīt. 11; मोहोऽयं विगतो मम Bg. 11. 1. -4 To die. -*Caus.* To spend, pass; विगमयत्युन्निद्र एव क्षपाः Ś. 6. 4.

विगत *p. p.* 1 Departed, gone away, disappeared. -2 Parted, separated. -3 Dead; विगतं तु विदेशस्थं शृणुयायो ह्यनिर्दशम् Ms. 5. 75. -4 Destitute or devoid of, free from (in comp.); विगतमदः. -5 Lost. -6 Dark, obscured. **-ता** A girl in love with another (hence unfit for marriage). **-तम्** The flight of birds. **-Comp.** **-असु** *a.* dead. **-आर्तवा** a woman past child-bearing (in whom the menstrual discharge has ceased). **-कल्मष** *a.* sinless, pure. **-क्लम** *a.* relieved from fatigue; Ms. 7. 151. **-भी** *a.* fearless, intrepid. **-लक्षण** *a.* unlucky, inauspicious. **-श्रीक** *a.* unfortunate. **-स्पृह** *a.* indifferent, void of desire.

विगमः 1 Departure, disappearance, cessation, end; चारुनृत्यविगमे च तन्मुखम् R. 19. 15; ईतिविगम M. 5. 20; Rs. 6. 23. -2 Abandoning; करणाविगमात् Me. 57 (देहत्यागात्). -3 Loss, destruction. -4 Death. -5 Separation; यथा क्रीडोपस्कराणां संयोगविगमाविह Bhag. 1. 13. 43.

विगरः 1 A naked ascetic. -2 A mountain. -3 An abstemious man (abstaining from eating).

विगर्ह् 1 U. 1 To blame, censure, reproach; तं विगर्हन्ति साधवः Ms. 9. 68; 3. 46; 11. 53. -2 To despise, contemn.

विगर्हणम्, -णा, विगर्हा Censure blame, reproach, abuse; यदि भीष्मः स्त्रियं हन्यात् सन्तः कुर्युर्विगर्हणम् Mb. 5. 192. 69; प्राप्ता नाम विगर्हणा स्थितिमतां मध्येऽनुजानामपि Ve. 1. 12.

विगर्हित *p. p.* 1 Censured, reviled, abused. -2 Disdained. -3 Condemned, reprobated, prohibited. -4 Low, vile. -5 Bad, wicked. **-तम्** Censure. **-Comp.** **-आचार** *a.* of reprehensible conduct; एतान् विगर्हिताचारानपाङ्क्तेयान् द्विजाधमान् Ms. 3. 167.

विगल् 1 P. 1 To drop down, get loose; रतिविगलितबन्धे केशहस्ते सुकेश्याः V. 4. 10. -2 To ooze or trickle. -3 To vanish, disappear. -4 To melt away, be dissolved.

विगलित *p. p.* 1 Trickled, oozed. -2 Disappeared, gone away; मयि विगलितप्रत्याशत्वाद्विवाहविधेः पुरा Mal. 9. 11. -3 Fallen or dropped down. -4 Melted away, dissolved. -5 Dispersed. -6 Slackened, untied. -7 Loose, dishevelled, disordered (as hair).

विगाह् 1 Ā. To plunge or dive into, bathe; (दीर्घिकाः) स व्यगाहत विगाढमन्मथः R. 19. 9. -2 To enter, penetrate into, pervade (fig. also); विषमोऽपि विगाह्यते नयः कृततीर्थः पयसामिवाशयः Ki. 2. 3; R. 13. 1; Mu. 1. 26. -3 To stir about, agitate; विगाह्यमानां सरयूं च नौभिः R. 14. 30. -4 To follow, practise; तया मुनीनां चरितं व्यगाह्यत Ku. 5. 19. -5 To approach, set in (as season &c.).

विगाढ *p. p.* 1 Plunged into, bathed, immersed; पुगे विगाढाः सखिभिर्मरुत्वतः Ki. 8. 30, 31. -2 Deep, excessive.

विगाहः Plunging into, bathing, diving; विगाहं तूर्णि तविषीभिरावृतम् Ṛv. 3. 3. 5.

विगुण *a.* 1 Destitute of merits, worthless, bad; श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात् Bg. 3. 35; Śi. 9. 12; Mu. 6. 11. -2 Destitute of qualities. -3 Having no string; विगुणीकृतकार्मुकोऽपि जेतुं भुवि जेतव्यमसौ समर्थ एव Mu. 7. 11. -4 Unfruitful; विगुणानि च पश्यन्ति Mb. 12. 269. 37.

विगूढ *p. p.* 1 Secret, concealed, hidden. -2 Reproached, censured. **-Comp.** **-चारिन्** *a.* proceeding or acting secretly; Ms. 9. 260.

विगै 1 P. 1 To censure, reproach, blame; विगीयसे मन्मथदेहदाहिना N. 1. 79; विगायति च यो लोके यवनानां विलोकनम् Śiva B. 19. 30. -2 To sing in a discordant tone.

विगानम् 1 Censure, reproach, defamation, scandal. -2 A contradictory statement, contradiction, inconsistency; यत् पुनः कारणविषयं विगानं दर्शितं तत् परिहर्तव्यम् Ś. B. (and in several other places of the same work).

विगीत *p. p.* 1 Censured, abused, reviled. -2 Contradictory, inconsistent; यश्चाधरोत्तरानर्थान् विगीतान्नावबुध्यते Ms. 8. 53. -3 Sung badly.

विगीतिः *f.* 1 Censure, abuse, reproach. -2 Contradictory statement, contradiction.

विग्रह् 9 P. 1 To hold or seize, catch hold of; विजगृहे तिसृणां जयिनं पुराम् Ki. 18. 12. -2 To quarrel, fight, contend; विगृह्य चक्रे नमुचिद्विषा बली य इत्थमस्वास्थ्यमहर्दिवं दिवः Śi 1. 51; Bk. 6. 86; 17. 23; Ki. 14. 24. -3 To divide into parts, separate (into constituent members). -4 To dissolve, analyse, resolve in general. -5 To receive, welcome (as a guest). -6 To preceive, observe. -7 To stretch or spread out.

विगृहीत *p. p.* 1 Divided, dissolved, analysed, resolved (as a compound). -2 Seized. -3 Encountered, opposed. -4 Obstructed, stopped; see विग्रह् above.

विग्रहः 1 Stretching out, extension, expansion. -2 Form, figure, shape; यथा लोहस्य निःस्यन्दो निषिक्तो बिम्बविग्रहम् Mb. 14. 18. 9. -3 The body; त्रयी विग्रहवत्येव सममध्यात्मविद्यया M. 1. 14; गूढविग्रहः R. 3. 39; 9. 52; Ki. 4. 11; 12. 43. -4 Resolution, dissolution, analysis, separation (as of a compound word into its component parts); वृत्त्यर्थ-(समासार्थ)-बोधकं वाक्यं विग्रहः. -5 Quarrel, strife (often, love-quarrel or प्रणयकलह); विग्रहाच्च शयने पराङ्मुखीर्नानुनेतुमबलाः स तत्वरे R. 19. 38; 9. 47; Śi. 11. 35; शत्रौ मित्रे पुत्रे बन्धौ मा कुरु यत्नं विग्रहसन्धौ Śaṁkarāchārya. -6 War, hostilities, fighting, battle (opp. संधि); उग्राय विग्रहायास्मै त्वया प्रेषयता ह्यमुम् Śiva B. 17. 35; one of the six Guṇas or modes of policy; Ms. 7. 160; see गुण. -7 Disfavour; अनुग्रहं विग्रहं वा मन्यसे तद्विधेहि नः Bhāg. 10. 16. 59. -8 A part, portion, division; परिमाणं च कालस्य कल्पलक्षणविग्रहम्. -Comp. -अवरम् the back. -इच्छु *a.* eager for combat. -ग्रहणम् the assumption of a form.

विग्रहवत् *a.* Having body, incarnate, embodied; M. 1. 14.

विग्रहिन् A minister of war.

विग्रीव *a.* Decapitated.

विघट् 1 Ā. 1 To be disunited or separated. -2 To be spoiled or ruined. -3 To be stopped, break down. -4 To assume various shapes; उपरि विघटमानः प्रौढतापिच्छनीलः Māl. 9. 24; Mv. 5. 42. -*Caus.* 1 To separate, disperse, tear apart; विघटयन्त्यभ्रे नभोऽम्भोमुचः Māl. 5. 2. -2 To remove, displace. -3 To mar, frustrate.

विघटनम् Breaking up, ruin, destruction; भ्रातुर्वक्षःस्थलविघटने यच्च साक्षीकृतोऽसि Ve. 5. 33.

विघटित *p. p.* 1 Separated, severed. -2 Divided. -3 Broken, shattered; पौलस्त्यस्य जटायुषा विघटितः U.3.43.

विघटिका A measure of time equal to one-sixtieth part of a Ghaṭikā (or nearly equal to 24 seconds).

विघट्ट् 10 U. 1 To strike down, disperse, scatter, scare away; तदीयमातङ्गघटाविघट्टितैः Śi. 1. 64; Bh. 3. 54. -2 To rub, strike, rub against; कारण्डवाननविघट्टितवीचिमालाः Ṛs. 3. 8; 4. 9; विघट्टितानां सरलद्रुमाणाम् Ku. 1. 9; Ki. 8. 45; Śi. 8. 24; 13. 41. -3 To break, violate (as an agreement). -4 To break asunder, burst open (as a door).

विघट्टनम्, -ना 1 Striking asunder. -2 Striking against, friction. -3 Separating, undoing, untying. -4 Offending, hurting.

विघट्टित *p. p.* 1 Struck apart, severed, separated, dispersed; आयुर्वायुविघट्टिताभ्रपटलीलीनाम्बुवद्भङ्गुरम् Bh. 3. 54. -2 Untied, loosened, opened. -3 Rubbed, touched. -4 Shaken about, churned. -5 Hurt, offended.

विघनः 1 A mallet, hammer. -2 One who destroys, subdues or overpowers.

विघसः 1 Half-chewed morsel, the residue or leavings of food eaten; विघसो भुक्तशेषं तु Ms. 3. 285; तृष्यत्कालकरालवक्त्रविघसव्याकीर्यमाणा इव U. 5. 6; Māl. 5. 14; बकविघसपङ्कसारा न चिरात् कावेरि भवितासि Āryā S. -2 Food in general; किमद्याश्वत्थामा तदरिरुधिरासारविघसं (कर्म विधातुं) Ve. 3. 25. -सम् Bees'-wax. -Comp. -आशः, -आशिन् *m.* one who eats the remains of an offering or food eaten (a crow, dog); आमिषं विघसाशेन तद्वद्राज्यं हि नो हृतम् Mb. 3. 33. 4.

विघसीकृतः, -भूतः Reduced to dregs; निपीय दैवैर्विघसीकृतायां घृणां विधोरस्य दधे सुधायाम् N. 22. 118; सोऽयं प्राक्कवलग्रहस्य विघसीभूतेष्वपि क्षत्रियक्षुद्रेषु क्षुधितश्चिरेण परशुस्तेनायमन्विष्यते A. R. 4. 22.

विघातः 1 Destruction, removing, warding off; क्रियादधानां मघवा विघातम् Ki. 3. 52. -2 Killing, slaying. -3 An obstacle, impediment, interruption; opposition, prevention; क्रियाविघाताय कथं प्रवर्तसे R. 3. 44; अध्वरविघातशान्तये 11. 1. -4 A blow, stroke. -5 Abandoning, leaving. -6 Failure, want of success. -Comp. -सिद्धिः *f.* the removal of obstacles.

विघूणिका The nose.

विघूर्णनम् Swaying to and fro.

विघूर्णित *p. p.* 1 Rolled, shaken about, rolling (as eyes). -2 Agitated.

विघृष्ट *p. p.* 1 Rubbed excessively. -2 Sore.

विघ्नः [विहन्-क] (rarely *n.*) 1 An obstacle, interruption, impediment, a hindrance; कुतो धर्मक्रियाविघ्नः सतां रक्षितरि त्वयि Ś. 5. 14; मूर्तौ विघ्नस्तपस इव नः Ś. 1. 32; हुंकारेणैव धनुषः स हि विघ्नानपोहति Ś. 3. 1; Ku. 3. 40. -2 Difficulty, trouble. -Comp. -ईशः, -ईशानः, -ईश्वरः epithets of Gaṇeśa; विघ्नेशो वः स पायाद्विहृतिषु जलधीन् पुष्कराग्रेण पीत्वा. °वाहनम् a rat. -कर, -कर्तृ, -कारिन् *a.* opposing, obstructing. -ध्वंसः, -विघातः removal of obstacles.

–नायकः, –नाशकः, –नाशनः epithets of Gaṇeśa. –प्रतिक्रिया removal of impediments; प्रतिशुश्राव काकुत्स्थस्तेभ्यो विघ्नप्रतिक्रियाम् R. 15. 4. –राजः, –विनायकः, –हारिन् *m.* epithets of Gaṇeśa. –सिद्धिः *f.* removal of obstacles.

विघ्नयति Den. P. To obstruct, hinder, impede, oppose.

विघ्नित *a.* 1 Impeded, hindered, obstructed, opposed; मुहुर्विघ्नितकर्माणम् (नालापयेत्) Pt. 1. 387. –2 Obscured, blinded; रजःकणैर्विघ्नितदृष्टिपाताः Ku. 3. 31.

विङ्खः A horse's hoof.

विच् 3, 7 U. (वेवेक्ति, वेविक्ते, विनक्ति, विङ्क्ते, विक्त) 1 To separate, divide, sever. –2 To discriminate, distinguish, discern; प्र मे विविक्वाँ अविदन् मनीषाम् Ṛv. 3. 57. 1. –3 To deprive of, remove from (with instr.); शशास स बहून् योधान् जीवितेन विवेच च Bk. 14. 103.

विचकिलः [विशेषेण तर्पयति गन्धैः Uṇ. 1. 56] 1 A kind of jasmine. –2 N. of the tree called *Madana*.

विचक्ष् 2 Ā. 1 To tell, announce. –2 To show. –3 To perceive, conjecture; परावरे ब्रह्मणि धर्मतो व्रतैः स्नातस्य मे न्यूनमलं विचक्ष्व Bhāg. 1. 5. 7.

विचक्षण *a.* [Uṇ. 2. 120 com.] 1 Clear-sighted, far-seeing, circumspect; सुविचक्षणः सुतः H. 1. 20. –2 Wise, clever, learned; विचक्षणः प्रस्तुतमाचचक्षे R. 5. 19. –3 Expert, skilful, able; सेवाविचक्षणहरीश्वरदत्तहस्तः R. 13. 39. –णः A learned man, wise man; न दत्वा कस्यचित् कन्यां पुनर्दद्याद्विचक्षणः Ms. 9. 71.

विचक्षस् *m.* A spiritual teacher, preceptor; cf. Uṇ. 4. 240 com.

विचक्षुस् *a.* Blind, sightless. –2 Perplexed, sad.

विचट् 1 P. To break (intr.).

विचटनम् Breaking.

विचन्द्र *a.* Moonless (as a night).

विचर् 1 P. To wander about, roam over (oft. with acc.); इष्टान् देशान् विचर जलद Me. 117; विचचार दावम् R. 2. 8; Ku. 3. 31. –2 To do, perform, practise. –3 To act, deal, behave. –4 To deviate from the right path, go about wantonly; यन्मे माता प्रलुलुभे विचरन्त्यपतिव्रता Ms. 9. 20. –5 To pass through, pervade. –6 To attack, march against. –7 To associate or have intercourse with. –8 To go badly, fail. –9 To commit a mistake; हविषि व्यचरत्तेन वषट्कारं गृणन् द्विजः Bhāg. 9. 1. 15. –10 To graze or feed upon. –*Caus.* 1 To think, reflect or meditate upon; विचारमाणस्य विशुद्धभावना A. Rām. 7. 5. 45. –2 To discuss, call in question, debate; आज्ञा गुरूणां ह्यविचारणीया R. 14. 46. –3 To calculate, estimate, take into account, consider; परेषामात्मनश्चैव यो विचार्य बलाबलम् Pt. 3; सुविचार्य यत्कृतम् H. 1. 20. –4 To hesitate, doubt. –5 To examine, investigate. –6 To seduce.

विचर *a.* Wandered, swerved from; न त्वं धर्मं विचरं सञ्जयेह मत्तश्च जानासि युधिष्ठिराच्च Mb. 5. 29. 4.

विचरणम् 1 Wandering. –2 Motion.

विचरितम् Wandering, roaming.

विचारः 1 Reflection, deliberation, thought, consideration; विचारमार्गप्रहितेन चक्षुषा Ku. 5. 42. –2 Examination, discussion, investigation; तत्त्वार्थविचार. –3 Trial (of a case); विषसलिलतुलाग्निप्रार्थिते मे विचारे Mk. 9. 43. –4 Judgment, discrimination, discernment, exercise of reason; विचारमूढः प्रतिभासि मे त्वम् R. 2. 47. –5 Decision, determination. –6 Selection. –7 Doubt, hesitation. –8 Prudence, circumspection. –Comp. –ज्ञ *a.* able to decide, a judge. –भूः *f.* 1 a tribunal, seat of justice. –2 particularly, the judgment-seat of Yama. –मूढ *a.* 1 Mistaken in judgment. –2 Foolish. –शील *a.* thoughtful, considerate, prudent. –स्थलम् 1 a tribunal. –2 logical discussion.

विचारक *a.* Investigating, judging; परामृशन्तो लिङ्गानि व्यभिचारविचारकाः Udb. –कः 1 An investigator; a judge, an examiner. –2 A leader, guide. –3 A spy.

विचारणम् 1 Discussion, consideration, examination, deliberation, investigation; तच्छृण्वन् विपठन् विचारणपरो भक्त्या विमुच्येन्नरः Bhāg. 12. 13. 18. –2 Doubt, hesitation.

विचारणा 1 Examination, discussion, investigation. –2 Reflection, consideration, thought. –3 Hesitation, doubt; भवित्री तत्र वैदेहि न मेऽस्त्यत्र विचारणा Mb. 3. 282. 57; 14. 53. 21. –4 The Mīmāṁsā system of philosophy. –5 Distinction, kind.

विचारिका A household female servant.

विचारित *p. p.* 1 Considered, inquired into, examined, discussed. –2 Decided, determined; परत्रेति विचारितम् Ms. 11. 28. –तम् Deliberation, thought.

विचारिन् *a.* 1 Roaming, wandering; लोकालोकविचारिचारणगणैरुद्गीयमानं यशः Nāg. 5. 18. –2 Dissolute, wanton. –3 Deliberating, judging.

विचर्चिका, विचर्ची Itch, scab; एकं कुष्ठं स्मृतं पूर्वं गजचर्म ततः स्मृतम्। ततश्चर्मदलं प्रोक्तं ततश्चापि विचर्चिका ॥ Bhāva P.

विचर्चित *a.* Anointed, smeared.

विचर्मन् Shieldless.

विचर्षण *a.* Very active; शरीरं मे विचर्षणम् T. Up. 1.4.1.

विचल् 1 P. 1 To shake, tremble, move; पतति पतत्रे विचलति पत्रे शङ्कितभवदुपयानम् Gīt. 5. –2 To go, proceed, set out. –3 To be agitated or disturbed, be rough; (as the sea); व्यचालीदम्भसां पतिः Bk. 15. 70. –4 To deviate, swerve; नादण्ड्यो नाम राज्ञोऽस्ति धर्माद्विचलितः स्वकात् Y. 1. 358. –5 To fall off or down. –*Caus.* 1 To shake, move, wave. –2 To cause to swerve, lead away from.

-3 To excite, agitate, stir up. -4 To destroy, rescind, annul. -5 To transgress, violate; अनिष्टं चाप्यनिष्टेषु तं धर्मं न विचालयेत् Ms. 7. 13.

विचल *a.* 1 Moving about, shaking, wavering, tottering, unsteady (fig. also). -2 Conceited, proud.

विचलनम् 1 Moving; wandering from place to place; महद्विचलनं नृणां गृहिणां दीनचेतसाम् (निःश्रेयसाय कल्पते) Bhāg. 10. 8. 4. -2 Deviation. -3 Unsteadiness, fickleness. -4 Conceit, pride.

विचलित *a.* 1 Deviated, departed; Māl. 5. 1. -2 Obscured, blinded.

विचाल *a.* Intervening, intermediate. -लः 1 Separating, putting apart; P. V. 3. 43. -2 Interval.

विचालित्वम् Indefiniteness, unsteadiness, variability; संवत्सरो विचालित्वात् MS. 6. 7. 38.

विचालिन् *a.* Unsteady, indefinite (in signification), variable; विचाली हि संवत्सरशब्दः सावनोऽपि गणितदिवसकः शीतोष्णवर्षलक्षणोऽपि चान्द्रमसोऽपि ŚB. on MS. 6. 7. 38.

विचि 5 U. 1 To collect, gather, bring together, store up; सुवर्णपुष्पितां पृथ्वीं विचिन्वन्ति त्रयो जनाः। शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम्॥ Pt. 1. 45, 36. -2 To search for, look out for; विचितश्चैष समन्तात् श्मशानवाटः Māl. 5; R. 12. 61; 13. 23; प्रियतमां विचिन्वन् V. 4. -3 To seek, investigate, examine, reflect upon; नालेन सलिले मूलं पुष्करस्य विचिन्वतः Bhāg. 3. 9. 37; ज्योतिर्मयं विचिन्वन्ति योगिनस्त्वां विमुक्तये R. 10. 23; Ki. 16. 1. -4 To separate, discern, distinguish. -5 To disarrange. -6 To select, choose. -7 To destroy, efface. -8 Ved. To clear, prepare (as a way).

विचयः 1 Search, seeking, looking out for; तुरगविचयव्यग्रान् U. 1. 23. -2 Investigation.

विचयनम् Searching, seeking &c.

विचित *p. p.* Searched, searched through.

विचितिः *f.* 1 Searching, search, seeking for. -2 Inquiry, investigation.

विचिः *m., f.*, **विची** *f.* A wave; cf. वीचि.

विचिकित्सा 1 Doubt, hesitation, uncertainty; येयं प्रेते विचिकित्सा मनुष्ये अस्तीत्येके नायमस्तीति चैके Kaṭh. Up. 1. 1. 20; Bri. Up. 1. 5. 3; तुभ्यं मद्विचिकित्सायामात्मा मे दर्शितो बहिः Bhāg. 3. 9. 37. -2 Mistake, error. -3 Finding out the real state (तत्त्वनिर्णय); द्रव्यस्य विचिकित्सार्थं गुणदोषौ शुभाशुभौ Bhāg. 11. 21. 3.

विचिकित्सित Doubtful; विचिकित्सितमेतन्मे ब्रवीतु भगवान् यथा Bhāg. 2. 4. 10.

विचित्र *a.* 1 Diversified, variegated, spotted, speckled; इयमुद्ग्रथते स्रजो विचित्राः Mu. 1. 4. -2 Various, varied. -3 Painted. -4 Beautiful, lovely; क्वचिद्विचित्रं जलयन्त्रमन्दिरम् Rs. 1. 2. -5 Wonderful, surprising, strange; हतविधिलसितानां ह्री विचित्रो विपाकः Śi. 11. 64. -त्रः The Aśoka tree. -त्रा A white deer. -त्रम् 1 Variegated colour. -2 Surprise. -3 A figure of speech (implying apparently the reverse of the meaning intended). -Comp. -अङ्ग *a.* having a spotted body. (-ङ्गः) 1 a peacock. -2 tiger -अन्नम् a kind of rice food (Mar. खिचडी). -देह *a.* having a lovely body. (-हः) a cloud. -रूप *a.* diverse. -वर्षिन् raining here and there. -वीर्यः N. of a king of the lunar race. [He was a son of Śantanu by his wife Satyavatī and so half-brother of Bhīṣma. When he died childless, his mother called Vyāsa (her own son before her marriage), and requested him to raise up issue to Vichitravīrya in accordance with the practice of *Niyoga*. He complied with the request, and begot on Ambikā and Ambālikā, the two widows of his brother, two sons Dhritarāṣṭra and Paṇḍu respectively.]

विचित्रकः The birch tree. -कम् Wonder, astonishment, surprise.

विचित्रित *a.* 1 Coloured, painted. -2 Adorned, decorated.

विचिन्त् 10 U. 1 To think, consider. -2 To think of, ponder over, call to mind; विचिन्तयन्ती यमनन्यमानसा Ś. 4. 1. -3 To take into consideration, have regard to, regard; अस्मान् साधु विचिन्त्य संयमधनानुच्चैः कुलं चात्मनः Ś. 4. 17. -3 To intend, fix upon, determine. -5 To devise, find out, discover. -6 To imagine. -7 To perceive, observe (Ved.).

विचिन्तनम्, विचिन्ता 1 Thought, thinking. -2 Care for anything.

विचिन्वत्कः 1 Search. -2 Investigation. -3 A hero.

विचीर्ण *a.* 1 Occupied by, wandered through; देवैः पूर्वं विचीर्णानि मुनिभिश्च महात्मभिः Mb. 3. 156. 3. -2 Entered.

विचेतन *a.* 1 Senseless, lifeless, unconscious, dead. -2 Inanimate; प्रमदाः पतिवर्त्मगा इति प्रतिपन्नं हि विचेतनैरपि Ku. 4. 33. -3 Perplexed, confounded; एवमुक्तः स मुनिना महीपालो विचेतनः प्रत्याख्यानाय चाशक्तः Mb. 3. 97. 3. -4 Ignorant, foolish.

विचेतस् *a.* 1 Senseless, stupid, ignorant; Bg. 9. 12. -2 Perplexed, confounded, sad; सर्वे च ते बाष्पकलाः साश्रुनेत्रा विचेतसः Rām. 7. 40. 29. -3 Malevolent, wicked.

विचेयम् Investigation.

विचेष्ट् 1 Ā. 1 To stir, move, be in motion, move about. -2 To act, behave. -3 To exert oneself, strive, try. -4 To roll, wallow, struggle, writhe.

विचेष्ट *a.* Motionless.

विचेष्टनम् 1 Moving the limbs. -2 Kicking; rolling (said of horses).

विचेष्टा 1 Effort, exertion.-2 Movement.-3 Conduct, behaviour.

विचेष्टित *p. p.* 1 Striven, tried, struggled. -2 Examined, investigated. -3 Misdone, done foolishly. **-तम्** 1 An act, a deed; न हि मे शृण्वतस्तृप्तिरस्ति तेषां विचेष्टितम् Mb. 3. 160. 6. -2 Effort, movement, undertaking, enterprise. -3 Gesture. -4 Working, sensation, play; किमपि चेदमनङ्गविचेष्टितम् V. 2. 9. -5 Machination.

विच्छ् I. 6 P. (विच्छति, also विच्छायति-ते) To go, move. -II. 10 U. (विच्छयति-ते) 1 To shine. -2 To speak.

विच्छन्दः, विच्छन्दकः A palace, a large building having several stories (ईश्वरगृह).

विच्छर्दकः A palace; see विच्छन्द above.

विच्छर्दनम्, विच्छर्दिका Vomiting, ejecting.

विच्छर्दित *p. p.* 1 Vomited, ejected. -2 Neglected, disregarded. -3 Given up, abandoned, left; Māl. 7; U. 1. -4 Marred, impaired, lessened; Māl. 7.

विच्छाय *a.* 1 Shadowless. -2 Pale, dim; विलोक्योद्विग्नहृदयो विच्छायमनुजं नृपः Bhāg. 1. 14. 24; पश्याब्जानि विनिर्जितानि सहसा गच्छन्ति विच्छायताम् Ratn. 1. 24. **-यः** A gem, jewel. **-यम्** The shadow of a flock of birds; also विच्छाया; विच्छायाभिः प्रधावन्तो गच्छन्तः साधुहंसकैः Bhāg.10.12.8.

विच्छिद् 7 U. 1 To cut off, break, tear asunder, divide; यदर्धे विच्छिन्नं भवति कृतसंधानमिव तत् Ś. 1. 9; R. 16. 20; Bh. 1. 96. -2 To interrupt, break off, terminate, end, destroy, make extinct (as a family); विच्छिद्यमानेऽपि कुले परस्य Bk. 3. 52; विच्छिन्नेषु पथिष्वहःपरिणतौ ध्वान्ते समुत्सर्पति Amaru. 76.

विच्छित्तिः *f.* 1 (*a*) Cutting off or asunder, tearing off; न ध्यातं पदमीश्वरस्य विधिवत् संसारविच्छित्तये Bh. 3. 11. (*b*) Breaking off, fracture. -2 Dividing, separating. -3 Disappearance, absence, loss, wanting; विच्छित्तिर्नवचन्दनेन वपुषः Śi. 16. 84. -4 Cessation. -5 Colouring the body with paints and unguents, painting colours, rouge; विच्छित्तिशेषैः सुरसुन्दरीणाम् Ś. 7. 5; Śi. 16. 84. -6 Limit, boundary (of a house &c.) -7 A pause in a verse, cæsura. -8 A particular kind of amorous gesture, consisting in carelessness in dress and decoration (through pride of personal beauty); स्तोकाप्याकल्परचना विच्छित्तिः कान्तिपोषकृत् S. D. 138.

विच्छिन्न *p. p.* 1 Torn asunder, cut off. -2 Broken, severed, divided, separated; यदर्धे विच्छिन्नं भवति कृतसंधानमिव तत् Ś. 1. 9. -3 Interrupted, prevented. -4 Ended, ceased, terminated. -5 Variegated. -6 Hidden. -7 Smeared or painted with unguents. -8 Crooked, curved. **-Comp. -प्रसर** *a.* having its progress interrupted. **-मद्य** *a.* one who has long abstained from liquor. **-शरपातत्वम्** excessive nearness of combatants to each other.

विच्छेदः 1 Cutting asunder, cutting, dividing, separation; किं वा भणामि विच्छेददारुणायासकारिणि Māl. 6. 11. -2 Breaking; विच्छेदः सहृदयेव हारयष्टया Śi. 8. 51. -3 Break, interruption, cessation, discontinuance; विच्छेदमाप भुवि यस्तु कथाप्रबन्धः K.; पिण्डविच्छेददर्शिनः R. 1. 66. -4 Removal, prohibition. -5 Dissension. -6 A section, or division of a book. -7 Interval, space. -8 Interruption in family succession, failure of issue. -9 Distinction, difference, variety.

विच्छेदनम् Cutting off, breaking &c.; see विच्छेद.

विच्छुर् 6 P. 1 To smear, anoint, cover, coat; मनःशिलाविच्छुरिता निषेदुः Ku. 1. 55; Ch. P. 11; V. 4. 42. -2 To set, inlay.

विच्छुरणम् Besprinkling, powdering.

विच्छुरित *p. p.* 1 Covered, overspread, coated. -2 Inlaid. -3 Besmeared, anointed.

विच्यु 1 Ā. 1 To deviate or swerve from. -2 To fall to pieces. -3 To err, make mistake. *-Caus.* To throw down or destroy.

विच्युत *p. p.* 1 Fallen down, slipped off. -2 Displaced, thrown down from. -3 Deviated or swerving from. -4 Separated from the living part, sloughed. -5 Failed, perished, lost.

विच्युतिः *f.* 1 Falling down from, severance, separation. -2 Decline, decay, downfall. -3 Deviation. -4 Miscarriage, failure; as in गर्भविच्युतिः.

विज् I. 3 U. (वेवेक्ति, वेविक्ते, विक्त) 1 To separate, divide. -2 To distinguish, discern, discriminate (usually with वि and allied to विच् with वि q. v.) -II. 6 Ā., 7 P. (विजते, विनक्ति, विग्न) 1 To shake, tremble. -2 To be agitated, tremble with fear. -3 To fear, be afraid; चक्रन्द विग्ना कुररीव भूयः R. 14. 68. -4 To be distressed or afflicted. *-Caus.* (वेजयति-ते) To terrify, frighten.

विग्न *p. p.* 1 Trembling, agitated. -2 Frightened, alarmed.

विज् *m.* A bird; a die (?).

विजग्ध *p. p.* Eaten, devoured.

विजङ्घ *a.* Having no wheels (a chariot).

विजट *a.* Unplaited (hair).

विजित् *m.* 1 A discriminator, judge. -2 A partner, coheir.

विजन् 4 Ā. 1 To be born or produced. -2 To generate, produce. -3 To grow, arise, spring. -4 To be changed or transformed.

विजन *a.* Lonely, retired, solitary. **-नम्** 1 A solitary place, retreat (विजने means 'privately'). -2 Absence of witnesses.

विजननम् Birth, procreation, delivery.

विजन्मन् *a.* or *m.* A bastard, one born illegitimately; Ms. 10. 23. *-n.* Birth.

विजन्या *a.* Pregnant.

विजात *p. p.* 1 Base-born, of mixed origin. -2 Born, produced. -3 Transformed. -4 Having good qualities, virtuous; यस्ते पुत्रो गमितोऽयं विजातः स्वर्णष्ठीवी यमदात् पर्वतस्ते Mb. 12. 29. 149. **-ता** A mother, matron, a woman who has given birth to children.

विजातिः *f.* 1 Different origin. -2 Different kind, species or tribe.

विजातीय *a.* 1 Of a different kind or species, dissimilar, unlike. -2 Of different caste or tribe. -3 Of mixed origin.

विजपिलम् Mud.

विजयन्तः N. of Indra.

विजर *a.* Young, fresh. **-रम्** A stalk.

विजल *a.* Waterless; तोयाशया विजला सरिगोऽपि Bri. S. **-लम्** 1 A sauce; also विजिलम्. -2 Drought.

विजर्जर *a.* 1 Decrepit, infirm. -2 Rotten (as wood).

विजल्पः 1 Prattle, idle or foolish talk. -2 Talk or speech in general. -3 A malignant or spiteful speech.

विजल्पित *p. p.* 1 Spoken, talked; परिहासविजल्पितं सखे (वचः) Ś. 2. 19. -2 Prated, babbled.

विजातु *n.* A particular mode of fighting.

विजि 1 Ā. 1 To conquer, defeat, overcome, subdue; व्यजेष्ट षड्वर्गम् Bk. 1. 2; प्रायस्त्वन्मुखसेवया विजयते विश्वं स पुष्पायुधः Gīt. 10; Bk. 2. 39; 15. 39. -2 To surpass, excel; चक्षुर्मेचकमम्बुजं विजयते Vb. 1. 33. -3 To win, acquire by conquest; भुजविजितविमान R. 12. 104; विजितारिपुरः 1. 59; Śānti. 2. 14. -4 To be victorious, be supreme or pre-eminent; विजयतां देवः Ś. 5; रहस्यं साधूनामनुपधि विशुद्धं विजयते U. 2. 2; Māl. 2. 4.

विजयः 1 Overcoming, vanquishing, defeating. -2 Conquest, victory, triumph; दिग्विजयादारभ्य 'conquest of the world'; प्रभवति न तदा परो विजेतुं भवति जितेन्द्रियता यदात्मरक्षा Ki. 10. 35; R. 12. 44; Ku. 3. 19; अस्याधिज्ये धनुषि विजयम् Ś. 2. 16. -3 A chariot of the gods, celestial chariot. -4 N. of Arjuna; Mb. (4. 44. 14) thus explains the name :—अभिप्रयामि संग्रामे यदहं युद्धदुर्मदान्। नाजित्वा विनिवर्तामि तेन मां विजयं विदुः॥. -5 An epithet of Yama. -6 N. of the first year of Jupiter's cycle. -6 N. of an attendant of Viṣṇu. -7 Motion, march; L. D. B. -8 N. of a particular मुहूर्त; युक्ते मुहूर्ते विजये Rām. 1. 73. 9. -9 The third month. -10 A kind of military array. -11 A kind of measure. **-यम्** A royal tent. **-Comp. -अभ्युपायः** a means of victory **-आह्वय** *a.* having the name Vijaya (*i. e.* Bijapur); तथा येदिलशाहोऽपि पत्तने विजयाह्वये Śiva B. 1. 61. **-ईशः** N. of Śiva. **-ऊर्जित** *a.* exalted by victory; स प्रविश्य दिवं देवानजयद्विजयोर्जितः Bm. 1. 143. **-कुञ्जरः** a war-elephant. **-छन्दः** a necklace of 500 strings. **-डिण्डिमः** a large military drum. **-दण्डः** a particular detachment of an army. **-द्वादशी** the 12th day of the light half of श्रावण. **-नगरम्** N. of a town. **-मर्दलः** a large military drum. **-श्रीः** the goddess of victory. **-सिद्धिः** *f.* success, victory, triumph.

विजया 1 N. of Durgā; विजित्य पद्मनामानं दैत्यराजं महाबलम्। विजया तेन सा देवी लोके चैवापराजिता॥ Devīpurāṇa. -2 N. of one of her female attendants; Mu. 1. 1. -3 N. of a lore taught by Viśvāmitra to Rāma; विद्यामथैनं विजयां जयां च (अध्यापिपत्) Bk. 2. 21. -4 Hemp. -5 N. of a festival = विजयोत्सव, see below. -6 Yellow myrobalan. **-Comp. -उत्सवः** a festival in honour of Durgā held on the 10th day of the bright half of Āśvina. **-दशमी** the tenth day of the bright half of Āśvina, observed as a great holiday and commonly known as Dasarā. **-सप्तमी** the seventh day of the bright half of a month falling on a Sunday.

विजयिन् *m.* A conqueror, victor.

विजिगीषा 1 Desire to conquer or overcome; भुवनविजिगीषोद्यते देवे कुसुमधन्वनि Dk. 2. 3. -2 Desire to surpass, emulation, competition, ambition.

विजिगीषु *a.* 1 Desirous of victory, wishing to conquer; यशसे विजिगीषूणाम् R. 1. 7. -2 Emulous, ambitious. **-षुः** 1 A warrior, a hero. -2 Antagonist, a disputant, an opponent.

विजित *p. p.* Subdued, conquered, overcome, defeated. **-Comp. -आत्मन्** *a.* self-subdued, self-controlled. **-इन्द्रिय** *a.* having the organs of sense subdued or controlled.

विजितिः *f.* Conquest, victory, triumph; क्षितिविजितिस्थितिविहितिव्रतरतयः परमतयः Kāv. 3. 85.

विजिघत्स *a.* Not-liable to hunger.

विजिज्ञासा 1 Desire of knowing distinctly. -2 Inquiry about.

विजिज्ञासितव्य, विजिज्ञास्य *a.* Wished to be known; विज्ञातं विजिज्ञास्यमविज्ञातमेत एव Bri. Up. 1. 5. 8.

विजिनः, -नम् (**-लः, -लम्**) A sauce (mixed with gruel).

विजिहीर्षा Wish to roam about or sport.

विजिह्म *a.* Crooked, bent, turned away; कृतं न वा कोपविजिह्ममाननम् Ki. 1. 21; R. 19. 35. -2 Dishonest. -3 Sidelong (as a glance). -4 Zero (शून्य); युगान्तसंशुष्कजलौ विजिह्मः Ki. 17. 39. -5 Pale (विच्छाय); प्रीतो विजिह्मश्च तदीयदृष्ट्या Ki. 17. 2.

विजुलः The silk-cotton tree.

विजृम्भ् 1 Ā. 1 To yawn, gape, open the mouth; व्यजृम्भिषत चापरे Bk. 15. 108; विजृम्भितमिवान्तरिक्षेण Mk. 5. 51. -2 To open, expand (as a flower). -3 To spread everywhere, pervade, fill; सुखश्रवा मङ्गलतूर्यनिस्वनाः... न केवलं सद्मनि मागधीपतेः पथि व्यजृम्भन्त दिवौकसामपि R. 3. 19; 12. 72; रजोऽन्धकारस्य विजृम्भितस्य 7. 42. -4 To rise, appear, show, manifest onesl̄f; तत्त्वमिदं विजृम्भते Māl. 7. -5 To spring back (as a bow). -6 To display activity. -7 To become increased or developed. -8 To begin to feel well.

विजृम्भः Bending or knitting (the brows); प्रियविरहरुषारोपितभ्रूविजृम्भत्रस्ताब्धिः Bhāg. 9. 10. 4.

विजृम्भणम् 1 Gaping, yawning. -2 Blossoming, budding, blowing, opening; वनेषु सायंतनमल्लिकानां विजृम्भणोद्गन्धिषु कुड्मलेषु R. 16. 47. -3 Exhibiting, displaying, unfolding. -4 Expanding. -5 Pastime, amorous sport.

विजृम्भिका 1 Gasping for breath. -2 Yawning.

विजृम्भित *p. p.* 1 Gaped, yawned; जलधराविनद्धहनुना विजृम्भितमिवान्तरिक्षेण Mk. 5. 51. -2 Opened, blown, expanded; तदादिराजस्य यशोविजृम्भितम् Bhāg. 4. 21. 8. -3 Displayed, exhibited, manifested; विजृम्भितं च दिव्यस्य मङ्गलाय द्वयोरपि U. 6 2. -4 Appeared. -5 Sported. -तम् 1 Sport, pastime. -2 Wish, desire. -3 Display, exhibition; अज्ञानविजृम्भितमेतत्. -4 An act, action, conduct; उद्भूतभूरिफलशालि विजृम्भितं ते Māl. 10. 21. -5 Fruit, result. -6 Yawning.

विज्जनम्, -लम् 1 A kind of sauce; see विजुल. -2 An arrow.

विज्जिल = विजिन.

विज्जुलम् Cinnamon.

विज्ञा 9 U. 1 To know, be aware of; विजानन्तोऽप्येते वयमिह विपज्जालजटिलान् सुधामः कामान् Bh. 3. 21. -2 To learn, comprehend, understand. -3 To ascertain, find out, learn from. -4 To regard, know to be, consider as. -5 To discern, discriminate, distinguish. -6 To be familiar with. -7 To become wise or learned; यथा यथा हि पुरुषः शास्त्रं समधिगच्छति । तथा तथा विजानाति Ms. 4. 20. -8 To explain, declare. -*Caus.* (विज्ञापयति) 1 To request, beg (opp. आज्ञापयति); सीता-आर्यपुत्र अस्ति मे विज्ञाप्यम्; रामः -नन्वाज्ञापय U. 1; R. 5. 20. -2 To communicate, inform. -3 To say, speak in general. -4 To teach, instruct.

विज्ञ, विजानत् *a.* 1 Knowing, intelligent, wise, learned. -2 Clever, skilful, proficient; देशकालनयैर्युक्तो विज्ञः कार्यविनिश्चये Rām. 4. 40. 18. -ज्ञः A wise or learned man.

विज्ञता, विजानता Cleaverness, shrewdness.

विज्ञप्त *p. p.* 1 Respectfully told, requested. -2 Made known, informed.

विज्ञप्तिः *f.* 1 A respectful statement or communication, a request, an entreaty. -2 An announcement. -3 Teaching, instruction (उपदेश); तत्त्वसंख्यानविज्ञप्त्यै जातं विद्वानजः स्वराट् Bhāg. 3. 24. 10.

विज्ञात *p. p.* 1 Known, understood, perceived. -2 Well-known, celebrated, famous.

विज्ञातिः *f.* Knowledge; न विज्ञातेर्विज्ञातारं विजानीयाः Bṛi. Up. 3. 4. 2.

विज्ञानम् 1 Knowledge, wisdom, intelligence, understanding; यज्जीव्यते क्षणमपि प्रथितं मनुष्यैर्विज्ञानशौर्यविभवार्यगुणैः समेतम् । तन्नाम जीवितमिह... Pt. 1. 24; 5. 3; विज्ञानमयः कोशः 'the sheath of intelligence' (the first of the five sheaths of the soul). -2 Discrimination, discernment. -3 Skill, proficiency; प्रयोगविज्ञानम् Ś. 1. 2. -4 Worldly or profane knowledge, knowledge derived from worldly experience (opp. ज्ञान which is 'knowledge of Brahma or Supreme Spirit'); ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः Bg. 7. 2; 3. 41; 6. 8; (the whole of the 7th Adhyāya of Bg. explains ज्ञान and विज्ञान). -5 Business, employment. -6 Music. -7 Knowledge of the fourteen lores. -8 The organ of knowledge; पञ्चविज्ञानचेतने (शरीरे) Mb. 12. 187. 12. -9 Knowledge beyond the cognisance of the senses (अतीन्द्रियविषय); विज्ञानं हि महद्भ्रष्टम् Rām. 3. 71. 30. -10 Information; लब्धविज्ञानम् Mb. 12. 44. 5. -Comp. -ईश्वर N. of the author of the Mitākṣarā, a commentary on Yājñavalkya's Smṛiti. -पादः N. of Vyāsa. -मातृकः an epithet of Buddha. -योगः means of arriving at correct knowledge (प्रमाण); केन विज्ञानयोगेन मतिश्चित्तं समास्थिता Mb. 14. 21. 11. -वादः the theory of knowledge, the doctrine taught by Buddha. -स्कन्धः one of the five स्कन्धs postulated in the Buddhistic philosophy (रूपवेदनाविज्ञानसंज्ञासंस्काराः क्षणिकविज्ञानस्कन्धे स्मृतिरनुपपन्ना ŚB. on MS. 1. 1. 5.

विज्ञानमय *a.* Full of intelligence; एष विज्ञानमयः पुरुषः Bṛi. Up. 2. 1. 6. °कोषः the soul's sheath of intelligence.

विज्ञानिक *a.* Wise, learned; see विज्ञ.

विज्ञापकः 1 An informant. -2 A teacher, an instructor.

विज्ञापनम्, -ना 1 Respectful statement or communication, a request, an entreaty; कालप्रयुक्ता खलु कार्यविद्भिर्विज्ञापना भर्तृषु सिद्धिमेति Ku. 7. 93; R. 17. 40. -2 Information, representation. -3 Instruction.

विज्ञापित *p. p.* 1 Respectfully told or communicated. -2 Requested. -3 Informed. -4 Instructed.

विज्ञाप्ति See विज्ञप्ति.

विज्ञाप्यम् A request; U. 1.

विज्ञेय *a.* 1 Knowable, cognizable. -2 To be learned. -3 To be regarded.

विज्य *a.* Stringless (as a bow); विज्ये विभर्षि धनुषी सुहृदात्मनोऽर्थे Bhāg. 5. 2. 7.

विज्वर *a.* Free from fever, anxiety or distress.

विञ्जामरम् The white of the eye.

विञ्जोलिः, -ली *f.* A line, row.

विट् 1 P. (वेटति) 1 To sound. -2 To curse, rail at.

विटः [विट्-क] 1 A paramour; त्वद्वत्सलः क स तपस्विजनस्य हन्ता कन्याविटः पतिरसौ परिरक्षतु त्वाम् Māl. 8. 8; Śi. 4.48. -2 A voluptuary, sensualist; प्रतिक्षणं नव्यवदच्युतस्य यत् स्त्रिया विटानामिव साधुवार्ता Bhāg. 10. 13. 2. -3 (In dramas) The companion of a prince or dissolute young man, or of a courtezan (who is described as being skilled in the arts of singing, music, and poetry and as a parasite on familiar terms with his associate to whom he nearly serves the purpose of the Vidūṣaka; see *inter alia* Mk. acts 1, 5 and 8); for definition, see S. D. 78; अन्येभ्यश्च वसन्ति येऽस्य भवने लब्धप्रसादा विटाः Mu. 3. 14. -4 A rogue, cheat. -5 A catamite. -6 A rat. -7 The Khadira tree. -8 The orange tree. -9 A branch together with its shoot. -10 A mineral salt. -Comp. -कान्ता turmeric. -पेटकः, -कम् a multitude of rogues. -माक्षिकम् a kind of mineral. -लवणम् a medicinal salt.

विटकः (= पिटकः) A boil, blister.

विटङ्क *a.* Nice, handsome, beautiful; केयूरकुण्डलकिरीटविटङ्कवेषौ Bhāg. 3. 15. 27.

विटङ्कः [विशेषेण टङ्क्यते बध्यते इति] 1 An aviary, dovecot; गुम्फितैरुशनसा सुभाषितैर्यस्य हाटकविटङ्कमङ्कितम् N. 18. 24; सभारण्यविटङ्कवान् Mb. 1. 1. 88; Mv. 5. 21. -2 The loftiest point, pinnacle, elevation; अयमेव महीधरविटङ्कः Māl. 10; Vikr. 5. 77.

विटङ्कक See विटङ्क.

विटङ्कित *a.* 1 Marked, stamped. -2 Adorned; रोमोत्सवो मम यदङ्घ्रिविटङ्किताया: Bhāg. 1. 16. 36.

विटपः [विटं विस्तारं वा पाति पिबति पा० क Tv.] 1 A branch, bough (of a creeper or tree); कोमलविटपानुकारिणौ बाहू Ś. 1. 21, 31; यदनेन तरुर्न पातितः क्षपिता तद्विटपाश्रिता लता R. 8. 47; Śi. 4. 48; Ku. 6. 41. -2 A bush. -3 A new shoot or sprout; व्रज विटपममुं ददस्व तस्यै Śi. 7. 53. -4 A cluster, clump, thicket. -5 Extension. -6 The septum of the scrotum. -7 A creeper (लता); यो विस्फुरद्भ्रूविटपेन भूमेर्भारं कृतान्तेन तिरश्चकार Bhāg. 3. 2. 18.

विटपिन् *m.* [विटप-अस्त्यर्थे इनि] 1 A tree; परितो दृष्टाश्च विटपिनः सर्वे Bv. 1. 21, 29. -2 The fig-tree. -Comp. -मृगः a monkey, an ape.

विटिः, -टी *f.* Yellow sandal.

विट्ठ (ट्ठ) लः N. of a form of Viṣṇu or Kṛiṣṇa (worshipped at Pandharpur in the Bombay presidency); 'श्रुत्वा नामसहस्रं श्रीविठ्ठलस्य गुणान्वितम्।' -श्रीविठ्ठलाष्टोत्तरशतनामस्तोत्रम् 1; 'शिरो मे विठ्ठलः पातु.' -विठ्ठलकवचम्.

विठङ्क *a.* Bad, vile, base, low.

विठरः 1 N. of Bṛihaspati. -2 [वदति अवद्धम्, वदेः अष्ठश्च, इत् च Uṇ. 5. 46] A fool. -3 An orator; L. D. B.

विड् 1 P. (वेडति) 1 To curse, rail at, revile. -2 To cry out loudly.

विड्, विडः A fragment, bit.

विडम् A kind of artificial salt (Mar. बिडलोण); Mb. 13. 91. 40; विडं सक्षारमूर्ध्वाधः कफवातानुलोमनम् Bhāva P.

विडङ्ग *a.* Clever, skilful. -ङ्गः, -ङ्गम् N. of a vegetable and medicinal substance (largely used as a vermifuge).

विडम्ब् 10 U. 1 To imitate, copy, resemble; (तं) ऋतुर्विडम्बयामास न पुनः प्राप तच्छ्रियम् R. 4. 17; वपुःप्रकर्षेण विडम्बितेश्वरः 3. 52; 13. 29; 16. 11; Ki. 5. 46; 12. 38; Śi. 1. 6; 12. 5; 16. 58. -2 To ridicule, deride, mock; संमोहयन्ति मदयन्ति विडम्बयन्ति निर्भर्त्सयन्ति रमयन्ति विषादयन्ति Bh. 1. 22; यथा न विडम्ब्यसे जनैः K. 109. -3 To cheat, deceive; एवमात्माभिप्रायसंभावितेष्टजनचित्तवृत्तिः प्रार्थयिता विडम्ब्यते Ś. 2. -4 To afflict, pain, molest. -5 To transform, distort.

विडम्बः 1 Imitation. -2 Distressing, afflicting, molesting.

विडम्बक *a.* 1 Imitating. -2 Disgracing.

विडम्बनम्, -ना 1 Imitation; न वेद कश्चिद् भगवंश्चिकीर्षितं तवेहमानस्य नृणां विडम्बनम् Bhāg. 1. 8. 29. -2 Disguise, imposture. -3 Deception, fraud. -4 Vexation, mortification. -5 Paining, distressing. -6 Disappointing. -7 Ridiculousness, mockery, a matter for laughter; इयं च तेऽन्या पुरतो विडम्बना Ku. 5. 70; असति त्वयि वारुणीमदः प्रमदानामधुना विडम्बना 4. 12.

विडम्बित *p. p.* 1 Imitated, copied. -2 Mocked, ridiculed. -3 Deceived. -4 Vexed, mortified. -5 Frustrated. -6 Low, abject, poor. -तम् An object of ridicule.

विडम्ब्यम् An object of ridicule.

विडारकः A cat.

विडाल, विडालक See बिडाल, बिडालक.

विडीनम् One of the several modes of flight of birds; see डीन; Mb. 8. 41. 27 (com. विडम्बितं विडीनं स्यात्).

विडुलः A sort of cane.

विदूरजम् *Lapis lasuli.*

विडो (डौ)जस् *m.* N. of Indra.

विभावित *p. p.* 1 Manifested, made clearly visible. -2 Known, understood, ascertained; ततः शरीरीति विभाविताकृतिम् Śi. 1. 3. -3 Seen, conceived; अविभावितनिष्क्रमप्रयाणः Ki. 13. 27. -4 Judged, discriminated. -5 Inferred, indicated. -6 Proved, established. -Comp. -एकदेश *a.* 'with whom a part has been discovered', who has been found guilty with regard to a part (of what is in dispute); विभावितैकदेशेन देयं यदभियुज्यते V. 4. 17.

विभाव्य *a.* Comprehensible; महतां हि धैर्यमविभाव्यवैभवम् Ki. 12. 3.

विभूत *p. p.* 1 Arisen, produced. -2 Appeared, manifested. -3 Great, mighty.

विभूतिः *f.* 1 Might, power, greatness; सा विभूतिरनुभावसंपदां भूयसी तव Śi. 14. 5; Ku. 2. 61. -2 Prosperity, welfare; अघोपघातं मघवा विभूत्यै भवोद्भवाराधनमादिदेश Ki. 11. 80. -3 Dignity, exalted rank. -4 Riches, plenty, magnificence, splendour; ममैष कामो भूतानां यद् भूयासुर्विभूतयः Bhāg. 6. 4. 44; अहो राजाधिराजमन्त्रिणो विभूतिः Mu. 3; R. 8. 36. -5 Wealth, riches; (लोकान्) त्रीनत्यरोच उपलभ्य ततो विभूतिम् Bhāg. 1. 16. 34; विभूतयस्तदीयानां पर्यस्ता यशसामिव R. 4. 19; 6. 76; 17. 43. -6 Superhuman power (which consists of eight faculties, अणिमन्, लघिमन्, प्राप्ति, प्राकाम्य, महिमन्, ईशिता, वशिता and कामावसायिता); Ku. 2. 11. -7 Ashes of cow-dung. -8 N. of Lakṣmī; हित्वेतरान् प्रार्थयतो विभूतिर्यस्याङ्घ्रिरेणुं जुषतेऽनभीप्सोः Bhāg. 1. 18. 20. -9 Expansion (विस्तार); एतां विभूतिं योगं च मम यो वेत्ति तत्त्वतः Bg. 10. 7. -10 Disposition; क्षेत्रज्ञ एता मनसो विभूतीर्जीवस्य मायारचितस्य नित्याः Bhāg. 5. 11. 12.

विभूरसिः The god of fire.

विभूष् 10 U. 1 To adorn, decorate; केयूरा न विभूषयन्ति पुरुषम् Bh. 2. 19; Śi. 9. 33; Ku. 1. 28. -2 Ved. To shine forth, appear.

विभूषणम् Ornament, decoration; विशेषतः सर्वविदां समाजे विभूषणं मौनमपण्डितानाम् Bh. 2. 7; R. 16. 80.

विभूषा 1 Ornament, decoration; संपेदे श्रमसलिलोद्गमो विभूषा Ki. 7. 5; R. 4. 54. -2 Light, lustre. -3 Beauty, splendour.

विभूषित *p. p.* Adorned, decorated, ornamented. -तम् An ornament, decoration.

विभृत *p. p.* Upheld, supported, maintained.

विभ्रंश् 1 Ā., 4 P. 1 To drop or fall down. -2 To go to ruin, decay. -3 To fall, stray from, go astray. -4 To lose. -5 To disappear, vanish. -6 To fail. -*Caus.* 1 To strike off, knock down. -2 To lead astray, seduce. -3 To destroy, ruin, annihilate. -4 To deprive (one) of.

विभ्रंशः 1 Falling away or off; slipping; अशर्करामविभ्रंशां समतीर्थामशैवलाम् Rām. 3. 73. 11. -2 Decay, decline, ruin. -3 A precipice; राज्यं चाप्युग्रविभ्रंशं संशयो जीवितस्य वा Mb. 5. 134. 28. -4 Diarrhœa, laxity of the bowels. -5 Perturbation.

विभ्रंशित *p. p.* Led astray, seduced. -2 Deprived of. -3 Destroyed, ruined.

विभ्रष्ट *p. p.* 1 Fallen off or away, separated. -2 Decayed, lost, fallen, ruined. -3 Disappeared, vanished. -4 Deprived or devoid of. -5 Useless. -6 Vain.

विभ्रम् 1, 4 P. 1 To roam, wander about. -2 To hover, whirl or wheel round. -3 To scare away, disperse, scatter about. -4 To be confused or disordered, be bewildered or perplexed; अनेकचित्तविभ्रान्ता मोहजालसमावृताः Bg. 16. 16. -5 To move about (the tail). -*Caus.* To confuse, confound; प्रभामत्तश्चन्द्रो जगदिदमहो विभ्रमयति K. P. 10.

विभ्रमः 1 Roaming or wandering about. -2 Whirling or going round, rolling about; निवृत्तसर्वेन्द्रियवृत्तिविभ्रमः Bhāg. 1. 9. 31. -3 Error, mistake, blunder. -4 Hurry, confusion, flurry, perturbation; especially, the flurry of mind caused by love; चित्तवृत्त्यनवस्थानं शृङ्गाराद्विभ्रमो भवेत्. -5 (Hence) Putting on ornaments &c. in wrong places through flurry; विभ्रमस्त्वरयाऽकाले भूषास्थानविपर्ययः; यश्चाप्सरोविभ्रममण्डनानां संपादयित्रीं शिखरैर्बिभर्ति Ku. 1. 4; (see Malli. thereon). -6 Any amorous or sportive action, amorous play or movement; Māl. 1. 26; नवप्रणयविभ्रमाकुलितमालतीदृष्टयः 9. 38. -7 Beauty, grace, charm; तदा तदङ्गस्य बिभर्ति विभ्रमम् N. 15. 25; U. 1. 20, 34; 6. 4; Śi. 6. 46; 7. 15; 16. 64; Māl. 7; क्रोधं स्मितं च कुसुमाभरणादि याच्या तद्वर्जनं च सहसैव विमण्डनं च। आक्षिप्य कान्तवचनं लपनं सखीभिर्निष्कारणोत्थितगतं वद विभ्रमं तत् ॥ -8 Doubt, apprehension; आमुष्मिक पाखण्डं योऽधर्मे धर्मविभ्रमः Bhāg. 4. 19. 12. -9 Caprice, whim. -10 Disturbance, perturbation; ऊर्मिव्यतिकरविभ्रमप्रचण्डः Mv. 6. 26. -11 Pride; दीर्घमायुः स मे प्रादात्ततो मां विभ्रमोऽस्पृशत् Rām. 3. 71. 9.

विभ्रमा Old age.

विभ्रान्त *p. p.* 1 Whirled about. -2 Agitated, bewildered, confused, flurried. -3 Mistaken, erring. -4 Spread abroad (as fame). -**Comp.** -**नयन** *a.* with rolling eyes. -**शील** *a.* 1 confused in mind. -2 intoxicated, drunk. (-**लः**) 1 a monkey. -2 the disc of the sun or moon.

विभ्रान्तिः *f.* 1 Whirling, going round. -2 Flurry, error, confusion. -3 Hurry, precipitation.

विभ्राज् 1 Ā. To shine brilliantly or intensely; विभ्राजसे मकरकेतनमर्चयन्ती Ratn. 1. 21.

विभ्राज् *a.* Shining, splendid, bright, luminous.

विमत्सर *a.* Free from jealousy, unenvious; Bg. 4. 22.

विमथ्, -विमन्थ् 9 P. 1 To disperse, scatter. -2 To destroy, annihilate. -3 To confound, confuse.

विमाथः Utter ruin or destruction.

विमद् 4 P. 1 To become perplexed or confused. -2 To be intoxicated or mad. -*Caus.* 1 To confound, perplex. -2 To intoxicate, madden.

विमत्त *p. p.* 1 Intoxicated. -2 Ruttish; furious, in rut.

विमद *a.* 1 Free from intoxication, pride or arrogence; यो बलात् प्रोन्नतं याति निहन्तुं सबलोऽप्यरिः। विमदः स निवर्तेत Pt. 1. 238. -2 Devoid of joy, sad, cheerless.

विमद्य *a.* Free from intoxicating drinks.

विमन् *Caus.* To disrespect, dishonour, insult; त्वया नाम मुनिर्विमान्यः Ś. 5. 20; स्त्रीभिर्विमानितानां कापुरुषाणां विवर्धते मदनः Mk. 8. 9.

विमत *p. p.* 1 Disagreeing, dissenting, differing in opinion. -2 At variance, inconsistent. -3 Slighted, despised, neglected; जहावसून् यद्विमतात्मजा सती मनस्विनी मानमभीक्ष्णमर्हति Bhāg. 4. 4. 29. -4 Dubious, doubtful. -**तः** An enemy.

विमति *a.* Stupid, devoid of intelligence, foolish. -**तिः** *f.* 1 Dissent, disagreement, difference of opinion. -2 Dislike. -3 Stupidity. -4 A dispute; विधिं कलापौ विमतेरगाताम् N. 7. 22.

विमान *a.* Disgraced, devoid of honour; तन्माक्षिकाभिर्व्यथितो विमानः Bhāg. 5. 13. 10.

विमानः, -नम् 1 Disrespect, dishonour; आक्रोशनविमानाभ्यां नावुधान् बोधयेद् बुधः Mb. 12. 299. 25; Bhāg. 5. 10. 25. -2 A measure. -3 A balloon, a heavenly car (moving through the skies); पदं विमानेन विगाहमानः R. 13. 1; 7. 51; विमानीकृतराजहंसमण्डलः K.; R. 12. 104; Ku. 2. 45; 7. 40; V. 4. 43; Ki. 7. 11; विगते दिवसे ततो विमानं वपुषा सूर्य इव प्रदीप्यमानः (आरुरोह) Bu. Ch. 5. 43. -4 A vehicle or conveyance in general; स नौविमानादवतीर्य रेमे R. 16. 68. -5 A palace (with seven stories); 'विमानोऽस्त्री देवयाने सप्तभूमौ च सद्मनि' इति निघण्टुः; 'विमानो व्योमयाने च सार्वभौमगृहेऽपि च' इति मेदिनी; Rām. 1. 5. 16; नेत्रा नीताः सततगतिना यद्विमानाग्रभूमीः Me. 71. -7 A horse. -8 An open palanquin carried on men's shoulders; इमां विमानेन सभां विशन्तीं पपावपाङ्गैरथ राजराजिः N. 10. 107. -9 A ship, boat. -**Comp.** -**गामिन्** a god; भयान्विता नभसि विमानगामिनः Mb. 1. 23. 24. -**चारिन्, यान** *a.* moving in a balloon. -**राजः** 1 an excellent heavenly car; U. 3. -2 the driver of a heavenly car. -**वाहः, -धुर्यः** palanquin-bearer; तां राजसङ्घमनयन्त विमानवाहाः N. 11. 23; तां राजकादपगमय्य विमानधुर्या निन्युर्नलाकृतिधरानथ पञ्च वीरान् N. 13. 1.

विमाननम्, -विमानना 1 Disrespect, dishonour, contempt, humiliation; विमानना सुभ्रु कुतः पितुर्गृहे Ku. 5. 43; अभवन्नास्य विमानना क्वचित् R. 8. 8. -2 Refusal, denial.

विमानित *p. p.* Disrespected, dishonoured; विमानिता विपथगतिं प्रयान्ति ते Mb. 1. 23. 24.

विमनस्, -विमनस्क *a.* 1 Sad, disconsolate, depressed in mind or spirits, sorry, discomposed; शिबिरस्तथैवा- विमना महित्वा कपालमभ्युद्धार्य भोक्तुमैच्छत् Mb. 3. 198. 22; देव्यास्ततो विमनसः परिसान्त्वनाय धर्मासनाद्विशति वासगृहं नरेन्द्रः U. 1. 7. -2 Absent-minded. -3 Perplexed, bewildered. -4 Displeased. -5 Changed in mind or feeling.

विमनीकृत *a.* 1 Displeased. -2 Changed in mind or feeling. -3 Sad, discomposed.

विमन्यु *a.* 1 Free from anger. -2 Free from grief.

विमयः Exchange, barter.

विमर्शः 1 Thought, deliberation. -2 (In dramas) A change in the successful progress of a dramatic plot, a change in the prosperous course of a love-story caused by some unforeseen reverse or accident, one of the five *Sandhis* in a drama; it is thus defined in S. D.; यत्र मुख्यफलोपाय उद्भिन्नो गर्भतोऽधिकः। शापाद्यः सान्तरायश्च स विमर्श इति स्मृतः॥ 336; कुर्वन् बुद्ध्या विमर्शं प्रसृतमपि पुनः संहरन् कार्यजातं कर्ता वा नाटकानामिममनुभवति क्लेशमस्माद्विधो वा Mu. 4. 3.

विमर्षः 1 Impatience, nonforbearance. -2 Dissatisfaction, displeasure.

विम(र्शि)र्षिन् *a.* 1 Impatient, intolerant. -2 Averse, disliking.

विमल *a.* 1 Pure, stainless, spotless, clean (fig also). -2 Clear, limpid, pellucid, transparent (as water); विमलं जलम्. -3 White, bright. **-लः** 1 An *Arhat*. -2 A magical formula recited over weapons. -3 A lunar year. **-लम्** 1 Silver-gilt. -2 Talc. **-Comp. -अक्ष** *a.* Having ten hair-curlings (आवर्त) (as a horse); तस्य सर्वगुणोपेता विमलाक्षा हयोत्तमाः Mb. 3. 161. 24. **-अद्रिः** the mountain Girnār in Gujarāt (famous for its inscriptions). **-दानम्** an offering to a deity. **-मणिः** a crystal.

विमांसः, -सम् Unclean meat (as of dogs).

विमातृ *f.* A step-mother. **-Comp. -जः** a step-mother's son; (Kull. on Ms. 9. 118).

विमात्र *a.* Equal in measure.

विमार्गः 1 A bad road. -2 A wrong road, evil conduct or course, immorality. -3 A broom. **-Comp. -गा** an unchaste woman; विमार्गगायाश्च रुचिः स्वकान्ते Bv. 1. 125. **-गामिन्, -प्रस्थित** *a.* following evil courses; नियमयसि विमार्गप्रस्थितानात्तदण्डः Ś. 5. 8. **-दृष्टि** *a.* looking in a wrong direction; Suśr.

विमार्गणम् Searching, looking out for, seeking for.

विमिश्र, विमिश्रित *a.* Mixed, blended, mingled (with instr. or in comp.); पुंभिर्विमिश्रा नार्यश्च Mb.; दम्पत्योरिह को न को न तमसि व्रीडाविमिश्रो रसः Gīt. 5.

विमुख *a.* (**-खी** *f.*) 1 With the face averted or turned away from. -2 Averse, disinclined, opposed; न क्षुद्रोऽपि प्रथमसुकृतापेक्षया संश्रयाय प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः Me. 17, 27; पुरन्ध्रीणां प्रज्ञा पुरुषगुणविज्ञानविमुखी Mu. 2. 7; (रघूणां) मनः परस्त्रीविमुखप्रवृत्ति R. 16. 8; 19. 47. -3 Adverse; अत्यन्तविमुखे दैवे व्यर्थे यत्ने च पौरुषे H. 1. 111. -4 Without, devoid of (in comp.); करुणाविमुखेन मृत्युना हरता त्वां वद किं न मे हृतम् R. 8. 67.

विमुच् 6 P. 1 To free, liberate. -2 To loosen, unbind, unfasten, untie; ततो विमुक्त्वा सशरं शरासनम् Rām. 6. 111. 124; आसीद्विवृत्तवदना च विमोचयन्ती (वल्कलम्) Ś. 2. 13. -3 To give up, lay aside, abandon, quit; विमुच्य रोषं रिपुनिग्रहात्ततः Rām. 6. 111. 124; विमुच्य वासांसि गुरूणि सांप्रतम् Ṛs. 1. 7. -4 To let go, let loose; Bk. 7. 50. -5 To except, set aside, set apart; ननु मां कामवधे विमुक्तवता Ku. 4. 31. -6 To shed, pour down (tears); चिरमश्रूणि विमुच्य राघवः R. 8. 25. -7 To throw, cast. -8 To take off (clothes), undress oneself. -9 To stop, cease. -10 To take, assume; समाविशति संसृष्टस्तदा मूर्तिं विमुञ्चति Ms. 1. 56. -11 To utter (a sound). -12 To lay (eggs). *-Pass.* 1 To be deprived of, be freed from. -2 To drop, be expelled (as a fœtus).

विमुक्त *p. p.* 1 Set free, released, liberated. -2 Abandoned, given up, quitted, left, let loose; वाजिनः स्यन्दने भानोर्विमुक्तप्रग्रहा इव Bk. 7. 50. -3 Freed from. -4 Hurled, discharged; विमुक्तः सर्वपापेभ्यो विष्णुलोकं स गच्छति. -5 Given vent to. -6 =युक्त; कुसुमरसविमुक्तं वस्त्रमागुण्ठितेव Rām. 7. 59. 23 (com.). -7 Launched (as a ship). -8 Dispassionate. **-Comp. -कण्ठ** *a.* raising a loud cry, weeping bitterly. **-मौनम्** *ind.* breaking silence. **-शाप** *a.* released from the consequences of a curse.

विमुक्तिः *f.* 1 Release, liberation. -2 Separation. -3 Absolution, final liberation.

विमुद्र *a.* 1 Unsealed. -2 Opened, budded, blown (as a flower &c).

विमुह् 4 P. 1 To be confused, bewildered, or perplexed, be embarrassed; एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति Bg. 2. 72; 3. 6, 27. -2 To be foolish or infatuated. *-Caus.* 1 To infatuate, bewilder. -2 To allure, tempt, seduce.

विमुग्ध *a.* Confused, confounded, bewildered.

विमूढ *p. p.* 1 Confounded, bewildered. -2 Seduced, tempted, beguiled; अप्रतिष्ठो महाबाहो विमूढो ब्रह्मणः पथि Bg. 6. 38. -3 Stupid. -4 Wise, learned. **-ढः** A kind of divine being. **-Comp. -आत्मन्, -संज्ञ** *a.* perplexed, senseless; इन्द्रियार्थान् विमूढात्मा मिथ्याचारः स उच्यते Bg. 3.6, 27.

विमूर्च्छित *a.* 1 Full of, engrossed; मयूरकेकाभिरुतं मदान्धालिविमूर्च्छितम् Bhāg. 4. 6. 12. -2 Thickened, coagulated. **-तम्** Swoon.

विमूर्त *a.* Coagulated, become solid.

विमृद् 9 P. 1 To press, squeeze. -2 To bruise, crush, pound. -3 To kill, destroy. -4 To lay waste, devastate.

विमर्दः 1 Pounding, crushing, bruising. -2 Rubbing together, trituration (as of perfumes), friction; विमर्दसुरभिर्बकुलावलिका खल्वहम् M. 3; R. 5. 65; कस्तूरिका मृगविमर्दसुगन्धिरेति Si. 4. 61; 11. 28. -3 Pressing together (as in embrace). -4 Spoiling, marring; कुतूहलविमर्दकारिणा परिश्रमेण Mk. 1. -5 Touch, contact. -6 Rubbing the person with saffron or other unguents. -7 War, battle, fight, encounter; विमर्दक्षमां भूमिमवतरावः U. 5; 3. 44. -8 Destruction, devastation; पुरा जनस्थानविमर्दशङ्की संधाय लङ्काधिपतिः प्रतस्थे R. 6. 62. -9 Conjunction of the sun and the moon. -10 An eclipse. -11 Weariness, tediousness. -Comp. -अर्धम् the time from the apparent conjunction to the end of an eclipse.

विमर्दकः 1 Grinding, pounding, bruising. -2 The trituration of perfumes. -3 An eclipse. -4 The conjunction of the sun and the moon. -5 Destroying. -6 Cassia Tora (Mar. टाकळा).

विमर्दनम्, -ना 1 Pounding, crushing, trampling. -2 Rubbing together, friction. -3 Destruction, killing; कौरव्य मह्यां द्विषतोर्विमर्दनम् Bhāg. 3. 18. 20. -4 An eclipse. -5 Fragrance, perfume. -6 Battle, war. -7 Trituration of perfumes.

विमर्दित, विमृदित *p. p.* 1 Pounded, crushed, ground. -2 Rubbed. -3 Anointed, smeared.

विमृश् 6 P. 1 To touch, feel. -2 To stroke, rub. -3 To think, consider, reflect, ponder (over); वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव संपदः Ki. 2. 30; रामप्रवासे व्यमृशन्न दोषं जनापवादं सनरेन्द्रमृत्युम् Bk. 3. 7; 12. 24; Ku. 6. 87; इति ते ज्ञानमाख्यातं गुह्याद् गुह्यतरं मया । विमृश्यैतदशेषेण Bg. 18. 63; Si. 10. 56. -4 To perceive, observe. -5 To examine, test; तदत्रभवानिमं मां च शास्त्रे प्रयोगे च विमृशतु M. 1. -6 To hesitate, doubt.

विमर्शः, -र्शनम् 1 Deliberation, consideration, examination, discussion; कुर्वन् बुद्ध्या विमर्शम् Mu. 4. 3. -2 Reasoning. -3 A conflicting judgment. -4 Hesitation, doubt; कार्यस्य न विमर्शं च गन्तुमर्हसि सुव्रत Rām. 1 18. 57; 2. 34. 44. -5 The impression left on the mind by past good or bad actions; see वासना. -6 Knowledge; अविद्वदधिकारित्वात् प्रायश्चित्तं विमर्शनम् Bhāg. 6. 1. 11.

विमृशः Reflection, deliberation; क्षेमस्य सध्र्यग्विमृशेषु हेतुः Bhāg. 4. 22. 21.

विमृष्ट *p. p.* Considered, reflected upon, pondered over. -ष्टम् Reflection, thought; कतम उद्गीथ इति विमृष्टं भवति Ch. Up. 1. 1. 4.

विमोक्षः 1 Release, liberation, freeing; सा त्वं सर्वविमोक्षाय तत्त्वमाख्याहि पृच्छतः Mb. 5. 190. 19. -2 Discharging, shooting. -3 Final emancipation or beatitude. -4 Gift, bestowal (of wealth); वसूनां च विमोक्षस्य Rām. 2. 23. 38.

विमोक्षणम्, -णा 1 Liberating, releasing, setting free. -2 Discharging. -3 Quitting, leaving, abandoning. -4 Laying (as eggs).

विमोघ *a.* Quite fruitless, idle, vain.

विमोचनम् 1 Unloosing, unyoking. -2 Release, freedom. -3 Liberation, emancipation.

विमोहन *a.* (-ना or -नी *f.*) Alluring, tempting, fascinating. -नः, -नम् N. of a division of Hell. -नम् 1 Seducing, tempting, fascinating. -2 Infatuation.

विम्लान *a.* 1 Faded, withered. -2 Unfaded, fresh, pure.

विम्लापनम् 1 Refreshing, reviving. -2 Cleaning, wiping. -3 Causing to wither or fade away, wasting away.

विम्बः, -म्बम् See बिम्ब.

विम्बक See बिम्बक.

विम्बटः The mustard plant.

विम्बा, -म्बी *f.* N. of a creeper.

विम्बिका See बिम्बिका.

विम्बुः The betel-nut tree.

वियत् *a.* Passing away, vanishing; कुटुम्बपोषाय वियन्निजायुर्न बुध्यतेऽर्थं विहतं प्रमत्तः Bhāg. 7. 6. 14; 9. 21. 3. -*n.* The sky, atmosphere, ether; पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति Ś. 1. 7. R. 13. 40; हंसपङ्क्तिरपि नाथ संप्रति प्रस्थिता वियति मानसं प्रति Ghaṭakarpara. -Comp. -गङ्गा 1 the heavenly Ganges. -2 the galaxy. -चारिन् (वियच्चारिन्) *m.* a kite. -पताका lightning; सौदामिनी स्फुरति नाथ वियत्पताका Rs. 3. 12. -पथः the atmosphere. -भूतिः *f.* darkness. -मणिः (वियन्मणिः), -मध्यहंसः (वियन्मध्यहंसः) the sun; Dk. 1. 1.

वियातिः A bird.

वियम् 1 P. 1 To spread out, extend. -2 To curb, restrain. -3 To give, grant, bestow. -4 To hold apart or asunder.

वियतम् *ind.* At intervals.

वियन्तृ *a.* Deprived of a guide.

वियमः 1 Restraint, check, control. -2 Distress, pain, affliction. -3 Cessation, stop.

वियवः A kind of intestinal worm.

वियात *a.* 1 Bold (धृष्ट). -2 Audacious, shameless, impudent. -3 Abandoned, wretched.

वियामः 1 See वियम. -2 A measure of length (two extended arms).

वियु 8 P. 1 To be separated or dissolved (intran.). -2 To lose or be deprived of. -3 To exclude, deprive of. -4 To keep or ward off, prevent; उपवनं निरभर्त्सयत प्रियान् वियुवतोर्युवतीः शिशिरानिलः Śi. 6. 62.

वियुत *p. p.* 1 Deprived of, separated from; रथाङ्गनामन् वियुतो रथाङ्गश्रोणिबिम्बया V. 4. 37. -2 Without, devoid of.

वियुतिः (alg.) The difference between two quantities.

वियुज् 7 Ā. 1 To leave, abandon; part with, forsake; मदमानसमुद्धतं नृपं न वियुङ्क्ते नियमेन मूढता Ki. 2. 49; R. 13. 63. -2 To separate; पुरो वियुक्ते मिथुने कृपावती Ku. 5. 26. -3 To relax, slacken. -4 To disjoin, divide, sever. -5 To free or deliver from, deprive of (with instr.); प्राणैर्न वियोजयति Pt. 1; असुभिर्न वियुज्यते K. 38. -6 To break (a vow); न व्रतेन वियुज्यते Ms. 5. 91. -7 To yield, give way. -*Caus.* 1 To separate. -2 To free from, deprive of; अजानता मया सैव पत्रैः शाखा वियोजिता Mk. 4. 18. -3 To rob. -4 To subtract.

वियुज्य (absolutive of वि + युज् 4 Ā.) Separately, singly, individually, one at a time; प्रधानभूते आख्यातार्थे संहत्य विशेषणं भवति परार्थे पुनर्वियुज्येति ŚB. on MS. 6. 4. 23.

वियुक्त *p. p.* 1 Detached, severed, separated. -2 Separated from, deserted by; तया वियुक्तस्य विलग्नमध्यया V. 4. 66. -3 Free from, deprived of (with instr. or in comp.). -4 Failing, deficient. -5 Disunited (as husband and wife); यथा नाभिचरेतां तौ वियुक्ताावितरेतरम् Ms. 9. 102.

वियोगः 1 Separation, disunion; अयमेकपदे तया वियोगः सहसा चोपनतः सुदुःसहो मे V. 4. 10; त्वयोपस्थितवियोगस्य तपोवनस्यापि समवस्था दृश्यते Ś. 4; संधत्ते भृशमरतिं हि सद्वियोगः Ki. 5. 51; R. 12. 10; Śi. 12. 63. -2 Absence, loss. -3 Subtraction.

वियोगिन् *a.* 1 Separated. -2 Absent, apart. -*m.* The ruddy goose.

वियोगिनी 1 A woman separated from her lover or husband; गुरुनिःश्वासतैः कपिर्मनीषी निरणैषीदथ तां वियोगिनीति Bv. 4. 35. -2 N. of a metre; (see App.).

वियोजनम् 1 Separation from. -2 Subtraction.

वियोजित *p. p.* 1 Separated. -2 Separated from, deprived of.

वियोनिः, -नी *f.* 1 Manifold birth. -2 The womb of animals; संभवांश्च वियोनीषु दुःखप्रायासु नित्यशः Ms. 12. 77 (Kull. on). -3 A debased or ignominious birth. -4 A woman of a different caste; ये तु मूढा दुराचारा वियोनौ मैथुने रताः Mb. 13. 145. 52. -*a.* 1 Of low origin; अयोनिं च वियोनिं च न गच्छेत विचक्षणः Mb. 13. 104. 133. -2 Destitute of vulva. °जः an animal (पश्वादि); वियोनिजानां च विजानते स्तं Mb. 13. 106. 72.

विरच् 10 U. 1 To arrange; क्षितिविरचितशय्यं कौतुकागारमागात् Ku. 7. 94. -2 To compose, put together, write; इति विरचितवाग्भिर्बन्दिपुत्रैः R. 5. 75; मद्गोत्राङ्कं विरचितपदं गेयमुद्गातुकामा Me. 88, 105. -3 To effect, produce, cause, make; मालाकार व्यरचि भवता या तरोरस्य पुष्टिः Bv. 1. 30. -4 To put on. -5 To set, inlay.

विरचनम्, -ना 1 Arrangement, disposition; तारावलीविरचनैर्व्यरुचन्निवासाः Śi. 5. 21. -2 Contriving, constructing. -3 Formation, creation. -4 Composition, compilation.

विरचित *p. p.* 1 Arranged, made, formed, prepared. -2 Contrived, constructed. -3 Written, composed. -4 Trimmed, dressed, embellished, ornamented. -5 Put on, worn. -6 Set, inlaid.

विरज *a.* Free from dust or passion; pure; विधूतकल्मषाः स्थानं विरजेनात्मनैव हि Bhāg. 1. 15. 48; 8. 8. 45. -जः An epithet of Viṣṇu. -जा 1 Dūrvā grass; Mb. 13. 136. 25. -2 N. of the wife of Nahuṣa. -3 The Kapittha-tree. -4 N. of a river; मुण्डनं चोपवासश्च सर्वतीर्थेष्वयं विधिः। वर्जयित्वा गयां गङ्गां विशालां विरजां तथा ॥

विरजस्, विरजस्क *a.* 1 Free from dust; विरजः पर आकाशादज आत्मा महान् ध्रुवः Bri. Up. 4. 4 20. -2 Free from passion; यथा लोकान् विरजाः संचरेयम् Mb. 3. 186. 3; असक्तदृष्टिर्विरजाः सदैव Śi. 20. 80. -3 Free from menstrual secretion.

विरजस्का A woman in whom the menstrual secretion has ceased.

विरजीकृ 8 U. To render free from dust.

विरजीभू 1 P. To become free from dust, be pure.

विरञ्चः, -ञ्चिः N. of Brahman.

विरञ्ज् 1, 4 U. 1 To grow discoloured or soiled, be coarse or rough; केशा अपि विरज्यन्ते निःस्नेहाः किं न सेवकाः Pt. 1. 82 (where it has sense 2 also). -2 To be discontented or disaffected, to dislike, hate; चिरानुरक्तोऽपि विरज्यते जनः Mk. 1. 53; Bh. 2. 2; श्रीर्निष्कुप्यति लक्ष्कायां विरज्यन्ति समृद्धयः Bk. 18. 22. -3 To become disgusted with the world and hence to renounce all worldly attachments. -*Caus.* To colour, dye.

विरञ्जित *p. p.* Cooled in affection, estranged.

विरक्त *p. p.* 1 Very red, ruddy; विरक्तसंध्याकपिशं पुरस्तात् R. 13. 64. -2 Discoloured. -3 Changed in mind, disaffected, displeased; यां चिन्तयामि सततं मयि सा विरक्ता Bh. 2. 2. -4 Free from passion or worldly attachment, indifferent; विरक्तः प्रव्रजेद् धीमान् सरक्तस्तु गृहे वसेत् Nāradapari. Up. 3. 14. -5 Impassioned. -क्ता An unfortunate or unhappy woman. -Comp. -चित्त *a.* estranged. -प्रकृति *a.* having disaffected subjects.

विरक्तिः *f.* 1 Change of disposition, dissatisfaction, discontent, disaffection. -2 Estrangement. -3 Indifference, absence of desire, freedom from passion or worldly attachment; Bhāg. 1. 16. 28.

विरटः 1 A kind of black agallochum. -2 The shoulder.

विरणम् A kind of fragrant grass; cf. वीरण.

विरण्य *a.* Vast, extensive; विरण्यशब्दो विस्तीर्णे भवति। यथा विरण्यानि अरण्यानि विस्तीर्णानीति गम्यते ŚB. on MS. 10. 4. 5.

विरथ्या 1 A bad road. -2 A by-road.

विरम् 1 P. 1 To end, terminate, come to an end; अविदितगतयामा रात्रिरेव व्यरंसीत् U. 1. 27; 6. 33. -2 To cease, desist, stop, leave off (speaking &c); एतावदुक्त्वा विरते मृगेन्द्रे R. 2. 51; Śi. 2. 13; oft. with abl.; हा हन्त किमिति चित्तं विरमति नाद्यापि विषयेभ्यः Bv. 4. 25; न स्थिरकर्मा विरराम कर्मणः R. 8. 22; वत्सैतस्माद्विरम विरमातःपरं न क्षमोऽस्मि U. 1. 33; Bh. 2. 80.

विरत *p. p.* 1 Ceased or desisting from (with abl.). -2 Rested, stopped, ceased. -3 Ended, concluded, at an end; विरतं गेयमृतुर्निरुत्सवः R. 8. 66. -Comp. -प्रसंग *a.* one who has ceased from being occupied in; भ्रूविक्रियायां विरतप्रसंगैः Ku. 3. 47.

विरतिः *f.* 1 Cessation, stop, discontinuance. -2 Rest, end, pause. -3 Indifference to worldly attachments; विरतिवनितासंगमुदितः Bh. 3. 79; A. Rām. 2. 1. 41.

विरमः 1 Cessation, stop. -2 Sunset; अभितिग्मरश्मि चिरमाविरमात् Śi. 9. 11.

विरामः 1 (*a*) Cessation, discontinuance; सुधां विना न प्रययुर्विरामम् Bh. 2. 80; प्रवृत्तस्याविरामे भवन्ती शासितव्या Mbh. (*b*) Rest, repose. -2 End, termination, conclusion; आरामः कल्पवृक्षाणां विरामः सकलापदाम् Rāma-rakṣā. 16; रजनिरिदानीमियमपि याति विरामम् Gīt. 5; U. 3. 16; Māl. 9. 34. -3 Pause, stop. -4 The stop or pause of the voice; वर्णानामपि मूर्च्छनान्तरगतं तारं विरामे मृदुम् Mk. 3. 5. -5 A small oblique stroke placed under a consonant, usually at the end of a sentence. -6 N. of Viṣṇu.

विरामणम् A pause.

विरल *a.* 1 Having interstices, separated by intervals, thin, not thick or compact; विपर्यासं यातो घनविरलभावः क्षितिरुहाम् U. 2. 27; 1. 20; भवति विरलभक्तिर्म्लानपुष्पोपहारः R. 5. 74. -2 Fine, delicate. -3 Loose, wide apart. -4 Rare, scarcely found, unfrequent; विरला हि तेषामुपदेष्टारः K.; स्तिमितोन्नतसंचारा जनसंतापहारिणः। जायन्ते विरला लोके जलदा इव सज्जनाः॥ Pt. 1. 29. -5 Few, little (referring to number or quantity); तत्त्वं किमपि काव्यानां जानाति विरलो भुवि Bv. 1. 117; विरलातपच्छविः Śi. 9. 3. -6 Remote, distant, long (as time, distance &c.). -लम् Curds, coagulated milk. -लम् *ind.* Scarcely, rarely, not frequently. -Comp. -जानुक *a.* bandy-legged, bow-kneed. -द्रवा a kind of gruel. -पातक *a.* sinning rarely. -पार्श्वग *a.* having scanty retinue. -भक्ति *a.* monotonous.

विरस *a.* 1 Tasteless, insipid, flavourless. -2 Unpleasant, disagreeable, painful; तावत् कोकिल विरसान् यापय दिवसान् वनान्तरे निवसन् Bv. 1. 7; Māl. 1. 31; 6. 10. -3 Cruel, unfeeling. -सः Pain.

विरहः 1 Parting with, separation. -2 Especially, the separation of lovers; सा विरहे तव दीना Gīt. 4; क्षणमपि विरहः पुरा न सेहे *ibid*; कः संनद्धे विरहविधुरां त्वय्युपेक्षेत जायाम् Me. 8, 12, 29, 87, 89. -3 Absence. -4 Want. -5 Desertion, abandonment, relinquishment. -6 The feeling of love in separation; see विप्रलम्भ (6). -7 Loneliness. -Comp. -अनलः the fire of separation. -अवस्था the state of separation. -आर्त, -उत्कण्ठ, -उत्सुक *a.* suffering from separation; pining away in separation. -उत्कण्ठिता a woman distressed by the absence of her lover or husband, one of the several classes of a Nāyikā in poetic compositions; see S. D. 121. -ज्वरः the fever or anguish of separation.

विरहिणी 1 A woman separated from her lover or husband. -2 Wages, hire.

विरहित *p. p.* 1 Deserted, abandoned, forsaken. -2 Separated from. -3 Lonely, solitary. -4 Bereft of, devoid or destitute of, free from (mostly in comp.).

विरहिन् *a.* (-णी *f.*) 1 Absent from, being separated from a mistress or lover; नृत्यति युवतिजनेन समं सखि विरहिजनस्य दुरन्ते Gīt. 1. -2 Lonely, solitary.

विरागः 1 Change of colour. -2 Change of disposition, disaffection, discontent, dissatisfaction; विरागकारणेषु परिहृतेषु Mu. 1. -3 Aversion, disinclination; Kau. A. 3. -4 Indifference to worldly attachments, freedom from passion.

विराज् 1 U. 1 To shine, glitter; शाखिनोऽन्ये विराजन्ते खण्ड्यन्ते चन्दनद्रुमाः Bv. 1. 88. -2 To appear or look like; तदन्तरे सा विरराज धेनुः R. 2. 20. -3 To be eminent or illustrious. -*Caus.* To brighten, illuminate, irradiate.

विराज् *a.* 1 Splendid, excellent; मृत्युर्भोजपतेर्विराडविदुषां तत्त्वं परं योगिनाम् Bhāg. 10. 43. 17. -2 A ruler, chief. -*m.* 1 Beauty, splendour. -2 A man of the Kṣatriya or warrior tribe; विराडायुषोऽधर्मयात्ययगात् Bhāg. 4. 27. 6. -3 The first progeny of Brahman; cf. Ms. 1. 32; तस्मात् विराडजायत Ṛv. 10. 90. 5 (where विराज् is represented as born from *Puruṣa*). -4 The body. -5 (In Vedānta phil.) N. of 'intellect' considered as ruling over the aggregate of bodies. -6 The universe (ब्रह्माण्ड); नानावीर्याः पृथग्भूता विराजं जनयन्ति हि Bhāg. 10. 3. 15. -*f.* 1 N. of a Vedic metre. -2 Excellence, dignity. -Comp. -सुतः (विराट्सुतः) a class of deceased ancestors; विराट्सुताः सोमसदः साध्यानां पितरः स्मृताः Ms. 3. 195.

विराज *a.* See विराज् —**जः** A particular form of a temple; Hch.

विराजित *p. p.* 1 Irradiated, illuminated. –2 Displayed, manifested.

विराटः 1 N. of a district in India. –2 N. of a king of the Matsyas. The Pāṇḍavas lived *incognito* in the service of this king for one year, (the thirteenth of their exile) having assumed different disguises. His daughter Uttarā was married to Abhimanyu and was mother of Parīkṣit who succeeded Yudhiṣṭhira to the throne of Hastināpura. –**Comp.** **जः** a sort of inferior diamond. –**पर्वन्** *n.* the fourth book of the Mahābhārata.

विराटकः A sort of inferior diamond.

विराणिन् *m.* An elephant.

विरात्रः, –त्रम् 1 The end of night; day-break; तमेव गणयन् शोकं विरात्रे प्रत्यबुध्यत Bhāg. 13. 91. 8. –2 The dead of night (बहुरात्र, अपरात्र); विरात्रे चागतं कस्मात् कोऽनुबन्धस्तवाभवत् Mb. 3. 298. 28.

विराध् 4 P. 1 To hurt, injure, offend, wrong; क्रियासमभिहारेण विराध्यन्तं क्षमेत कः Śi. 2. 43; विराद्ध एवं भवता विराद्धा बहुधा च नः 2. 41. –2 To lose, be deprived of.

विराद्ध *p. p.* 1 Opposed, counteracted. –2 Offended, injured, treated with contempt; see the quotations under राध् with वि above.

विराधः 1 Opposition. –2 Annoyance, vexation, molestation. –3 N. of a powerful Rākṣasa slain by Rāma.

विराधनम् 1 Opposing. –2 Hurting; injuring, offending. –3 Pain, anguish.

विराल See बिडाल.

विरिक्त *p. p.* Evacuated, purged; वान्तो विरिक्तः स्नात्वा तु घृतप्राशनमाचरेत् Ms. 5. 144; विरिक्तस्य यथा सम्यग् घृतं भवति भेषजम् Mb. 12. 309. 18.

विरिक्तिः Purging.

विरिञ्चः, विरिञ्चनः 1 N. of Brahman. –2 Of Śiva. –3 Of Viṣṇu.

विरिञ्चिः [वौ रिचेः इन् नुम् च Uṇ. 4. 131] 1 N. of Brahman; एवं समाकर्ण्य वचो विरिञ्चेः।...चुलुके मुमोच...विलोचनानि Vikr. 1. 46; N. 3. 44; Śi. 9. 9. –2 Of Viṣṇu. –3 Of Śiva.

विरिब्धः A note, sound; विधिविहितविरिब्धैः सामिधेनीरधीत्य Śi. 11. 41.

विरु 2 P. 1 To cry, bewail, lament; ननु सहचरीं दूरे मत्वा विरौषि समुत्सुकः V. 4. 20; Bk. 5. 54; Ṛs. 6. 27. –2 To make a sound, sound in general; न स विरौति न चापि स शोभते Pt. 1. 75; जीर्णत्वाद् गृहस्य विरौति कपाटम् Mk. 3; एते त एव गिरयो विरुवन्मयूराः U. 2. 23. –3 To cry out, shout, scream. –*Caus.* To roar or scream aloud; न च रक्तो विरावयेत् Ms. 4. 64.

विरावः Clamour, noise, sound; आलोकशब्दं वयसां विरावैः R. 2. 9; 16. 31.

विरावण *a.* Causing roar, clamour; विरावणं साधु तपस्विकण्टकं तपस्विनामुद्धर तं भयावहम् Rām. 1. 15. 33.

विराविन् *a.* 1 Weeping, crying, shouting. –2 Lamenting. –**णी** 1 Weeping, crying. –2 A broom. –3 Sound, resound; गायनैश्च विराविण्यो वादनैश्च तथापरैः Rām. 1. 18. 19.

विरुत *p. p.* 1 Screamed, shouted. –2 Resounding, filled with cries. –**तम्** 1 Crying, shrieking, roaring &c. –2 Cry, sound, noise, clamour, din. –3 Singing, humming, chirping, buzzing; परभृतविरुतं कलं यथा प्रतिवचनीकृतमेभिरीदृशम् Ś. 4. 9. –**तिः** Screaming, howling.

विरुग्ण *p. p.* 1 Broken to pieces, shattered; तच्चित्रताण्डवविरुग्णफणातपत्रः Bhāg. 10. 16. 30. –2 Destroyed. –3 Bent. –4 Blunted, dulled; विरुग्णोदग्रधाराग्रः कुलिशो मम वक्षसि Bk. 5. 25.

विरुच् 1 Ā. 1 To shine, be resplendent; सहस्रधामा व्यरुचद्विभक्तः पयोमुचां पङ्क्तिषु विद्युतेव R. 6. 5; 17. 14; Bk. 8. 66. –2 To be eminent or conspicuous. –3 To become visible, appear. –4 To illuminate, brighten (P.). –5 To please, delight. –*Caus.* 1 To irradiate, illuminate. –2 To delight in. –3 To sport with.

विरुक्मत् *m.* A bright weapon.

विरुचः A magic formula recited over weapons.

विरुज् *f.* 1 Violent pain. –2 A great disease; विन्देद्विरूपा विरुजा विमुच्यते Bhāg. 6. 19. 29. *-a.* Well, healthy.

विरुदः, –दम् 1 Proclaiming. –2 Crying aloud. –3 A panegyric, laudatory poem; गद्यपद्यमयी राजस्तुतिर्विरुदमुच्यते S. D. 570; नदन्ति मददन्तिनः परिलसन्ति वाजिव्रजाः। पठन्ति विरुदावलीमहितमन्दिरे वन्दिनः॥ R. G. –**Comp.** –**आवली** 1 a collection of epithets. –2 a particular collection of religious lyrics; L. D. B. –**ध्वजः** a royal banner.

विरुदितम् Loud cry or lamentation; तदवाप्युच्छ्वासो भवति ननु लाभो विरुदितम् U. 3. 30 v. l.

विरुध् 7 U. 1 To oppose, obstruct, hinder, prevent. –*Pass.* 1 To be opposed to, be inconsistent or at variance with. –2 To contend or quarrel with; एको दोषो विदेशस्य स्वजातिर्यद्विरुध्यते Pt. 4. 116. –3 To fail. –4 To be kept back or withheld.

विरुद्ध *p. p.* 1 Hindered, checked, opposed, obstructed. –2 Blocked up, confined or shut up. –3 Besieged, blockaded. –4 Opposed to, inconsistent with,

incongruous, inconsistent. -5 Contrary, opposite, opposed in quality. -6 Contradictory, proving the reverse, (as a *hetu* in Logic); साध्याभावव्याप्तो हेतुर्विरुद्धः Tarka K.; *e. g.* शब्दो नित्यः कृतकत्वात् T. S. -7 Hostile, adverse, inimical. -8 Unfavourable, unpropitious. -9 Prohibited, forbidden (as food). -10 Wrong, unlawful, improper. -11 Excluded. -12 Uncertain, doubtful. **-द्धम्** 1 Opposition, contrariety, hostility; स्वर्गे निवासे राजेन्द्र विरुद्धं चापि नश्यति Mb. 18. 1. 11. -2 Discord, disagreement. **-Comp. -धी** *a.* evil-minded, wicked. **-भोजनम्** Unwholesome meal. **-मतिकृत्** *m.* a fault or defect in composition; विपरीतार्थधीर्यस्मात् विरुद्धमतिकृन्मतम्. **-रूपकम्** a figure of speech in which an object compared to another object is not quite similar; अक्रिया चन्द्रकार्याणामन्यकार्यस्य च क्रिया। अत्र सन्दिश्यते यस्माद्विरुद्धं नाम रूपकम्॥ Kav. 2. 84.

विरोधः 1 Opposition, obstruction, impediment. -2 Blockade, siege, investment. -3 Restraint, check. -4 Inconsistency, incongruity, contradiction; विरोधो न विद्यते ब्रह्माद्वितीयमेव सत्यम्। (-त्रिपाद्विभूतिमहानारायणोपनिषत् 4. 2.) -5 Antithesis, contrast. -6 Enmity, hostility; विरोधो विश्रान्तः U. 6. 11; Pt. 1. 332; R. 10. 13. -7 A quarrel, disagreement. -8 A calamity, misfortune. -9 (In Rhet.) An apparent incongruity which is merely verbal and is explained away by properly construing the passage; it consists in representing objects as antithetical to one another though in the nature of things they are not so; representing things as being together though really they cannot be together; (this figure is largely used by Bāṇa and Subandhu; पुष्पवत्यपि पवित्रा, कृष्णोऽप्यसुदर्शनः, भरतोऽपि शत्रुघ्नः being familiar instances); it is thus defined by Mammaṭa:—विरोधः सोऽविरोधेऽपि विरुद्धत्वेन यद्वचः K. P. 10; this figure is also called विरोधाभास). **-Comp. -उक्तिः** *f.*, **-वचनम्** contradiction, opposition. **-उपमा** (in Rhet.) a comparison founded on opposition; शतपत्रं शरच्चन्द्रस्त्वदाननमिति त्रयम्। परस्परविरोधीति सा विरोधोपमा मता॥ Kav. 2. 33. **-कारिन्** *a.* fomenting quarrels. **-कृत्** *a.* opposing. (*-m.*) an enemy. **-परिहारः** reconciliation; Kull. on Ms. 7. 152.

विरोधनम् 1 Hindering, opposing, obstructing. -2 Besieging, blockading. -3 Opposition, resistance. -4 Contradiction, inconsistency.

विरोधिन् *a.* (-नी *f.*) 1 Resisting, opposing, obstructing. -2 Besieging. -3 Contradictory, opposed to, inconsistent with; तपोवन° Ś. 1. -4 Hostile, inimical, adverse; विरोधिसत्त्वोज्झितपूर्वमत्सरम् Ku. 5. 17. -5 Quarrelsome. *-m.* An enemy; कलयन्त्युष्णकरं विरोधिनः Śi. 16. 64. *-f.* (**विरोधिनी**) A woman who promotes quarrel.

विरुलः A kind of snake.

विरुह् 1 P. 1 To grow, shoot up; गङ्गाप्रपातान्तविरूढशष्पं गौरीगुरोर्गह्वरमाविवेश R. 2. 26; Mk. 1. 9. -2 To mount, ascend. -3 To arise, proceed. *-Caus.* 1 To heal (as a wound). -2 To plant. -3 To remove, expel; शशाप पुत्रं गान्धारे राज्याच्चापि व्यरोपयत् Mb. 5. 149. 10.

विरूढ *p. p.* 1 Grown, germinated, shot up; तास्वेव संप्रति विरूढतृणाङ्कुरासु बीजाञ्जलिः पतति कीटमुखावलीढः Mk. 1.9. -2 Produced, born, arisen. -3 Grown, increased. -4 Budded, blossomed. -5 Ascended, mounted. -6 Healed; जरासंधस्योरःस्थलमिव विरूढं पुनरपि. **-Comp. -बोध** *a.* one whose intelligence has matured.

विरूढकः Grain that has begun to sprout.

विरोप(ह)णम् 1 Healing (as a sore); व्रणविरोपणं तैलम् Ś. 4. 14. -2 Planting.

विरोहः 1 Growing, shooting forth. -2 Source, origin.

विरूक्षणम् 1 Roughening. -2 Acting as an astringent. -3 Blame, censure. -4 A curse, an imprecation.

विरूप *a.* (-पा or -पी *f.*) 1 Deformed, ugly, misshapen, disfigured; विरूपं रूपवन्तं वा पुमानित्येव भुञ्जते Pt. 1. 143. -2 Unnatural, monstrous. -3 Multiform, diverse; प्रकृतिसरूपं विरूपं च Sāṅ. K. 8. -4 Less by one. **-पः** 1 Jaundice. -2 N. of Śiva. **-पा** 1 Alhagi Maurorum (Mar. धमासा). -2 Aconitum Ferox (Mar. अतिविष). **-पम्** 1 Deformity, ugliness. -2 Variety of form, nature, or character. **-Comp. -अक्ष** *a.* having deformed eyes; वपुर्विरूपाक्षम् Ku. 5. 72. (**-क्षः**) N. of Śiva (having an unusual number of eyes); दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः। विरूपाक्षस्य जयिनीस्ताः स्तुवे वामलोचनाः॥ Vb. 1. 2; Ku. 6. 21. **-करणम्** 1 disfiguring. -2 injuring. **-चक्षुस्** *m.* an epithet of Śiva. **-रूप** *a.* deformed.

विरूपक *a.* 1 Deformed, ugly. -2 Hideous, frightful, monstrous. **-कः** A nickname.

विरूपिन् *a.* (-णी *f.*) Deformed, ugly, disfigured. *-m.* A chameleon (Mar. सरडा).

विरेकः 1 Evacuation of the bowels, purging. -2 A purgative.

विरेचनम् See विरेक.

विरेचित *a.* Purged, evacuated.

विरेफः 1 A river, stream. -2 Absence of the letter र.

विरोकः, -कम् A hole, pit, chasm; नासाविरोकपवनोल्लसितं तनीयो रोमाञ्चतामिव जगाम रजः पृथिव्याः Śi. 5. 54. **-कः** A ray of light.

विरोचनः 1 The sun; दीप्तिनिर्जितविरोचनादयं गां विरोचनसुतादभीप्सतः Śi. 14. 74. -2 The moon; (सोमममथाब्रवीत्) सम्यं वर्तस्व भार्यासु मा त्वां शप्से विरोचन Mb. 9. 35. 57. -3 Fire. -4 N. of the son of Prarhāda and father of Bali; Śi. 14. 74. -5 A species of करञ्ज tree. -6 A species of श्योनाक. **-नम्** 1 Light, lustre. -2 Propounding (आलोचन);

विशुद्धविज्ञानविरोचनान्विता विद्याऽत्मवृत्तिश्चरमेति भण्यते A. Rām. 7. 5. 15. –Comp. –सुतः an epithet of Bali.

विरोचिष्णु *a.* Shining, bright; वायोरपि विकुर्वाणाद्विरोचिष्णु तमोनुदम् Ms. 1. 77.

विल् I. 6 P. (विलति) 1 To cover, conceal. –2 To break, divide. –II. 10 U. (वेलयति-ते) To throw, send forth.

विलम् See बिलम्.

विलक्ष् 10 U. 1 To see, observe, perceive, notice. –2 To characterize, distinguish. –3 To be confused, be bewildered; निर्व्यापारविलक्षितानि सान्त्वय बलानि U. 6; see विलक्ष below.

विलक्ष *a.* 1 Having no characteristic or distinguishing marks, or fixed aim. –2 Bewildered, embarrassed. –3 Surprised, astonished. –4 Ashamed, abashed, disconcerted; गोत्रेषु स्खलितस्तदा भवति च व्रीडाविलक्षश्चिरम् Ś. 6. 5. –5 Forced, unnatural, embarrassed (as a smile); विलक्षस्मितस्फुरितैर्दशनांशुभिः K. 233; Ratn. 3. 14. –6 Missing the mark (as an arrow).

विलक्षण *a.* 1 Having no characteristic or distinguishing marks. –2 Different, other; ततश्च कर्माणि विलक्षणानि Bhāg. 11. 23. 41. –3 Strange, extraordinary, unusual; तस्मै नमस्ते स्वविलक्षणात्मने Bhāg. 10. 70. 38. –4 Possessed of inauspicious marks. –5 Lustreless, bad-looking; उद्वीक्ष्योद्वीक्ष्य नयनैर्भयादिव विलक्षणैः Rām. 3. 52. 41. –णम् 1 A vain or useless state. –2 Perceiving, observing.

विलक्षित *p. p.* 1 Distinguished, perceived, seen, discovered. –2 Discernible by. –3 Dismayed, perplexed, embarrassed, puzzled. –4 Vexed, annoyed. –5 Undistinguished.

विलग् 1 P. To stick or adhere to, cling to; केचिद्विलग्ना दशनान्तरेषु Bg. 11. 27.

विलग्न *a.* 1 Clinging or sticking to, resting on, fastened on; आकुटिलपक्ष्मविलग्नम् Ś. 7. 25; Śi. 9. 20. –2 Cast, fixed, directed; पुरोविलग्नैर्हरदृष्टिपातैः सुवर्णसूत्रैरिव कृष्यमाणः Ku. 7. 50. –3 Gone by, elapsed (as time). –4 Thin, slender, delicate; मध्येन सा वेदिविलग्नमध्या Ku. 1. 39; V. 4. 37. –5 Pendulous, flaccid (as breasts). –6 Caged (as a bird). –ग्नम् 1 The waist. –2 The hips. –3 The rising of constellations.

विलङ्घ् 10 U. 1 To pass or spring over, traverse; निवेशयामास विलङ्घिताध्वा R. 5. 42; 16. 32; Śi. 12. 24; 8. 26. –2 To violate, transgress, overstep, disregard, neglect; गन्तुं प्रवृत्ते समयं विलङ्घ्य Ku. 3. 25; R. 5. 48; Ki. 2. 45; Śi. 17. 12. –3 To violate the limits of propriety; नृपतेः प्रतिषिद्धमेव तत् कृतवान् पङ्क्तिरथो विलङ्घ्य यत् R. 9. 74. –4 To rise towards, ascend or go up to; समुदितं न विलङ्घयितुं नभः Ki. 5. 1; N. 5. 2. –6 To give up, abandon, leave aside; मनो बबन्धान्यरसान् विलङ्घ्य सा R. 3. 4. –7 To surpass, excel; इति कर्णोत्पलं प्रायस्तव दृष्ट्या विलङ्घ्यते Kāv. 2. 224. –8 To cause to fast. –9 To overcome, surmount. –10 To offend, insult.

विलङ्घनम् 1 Transgressing, overstepping. –2 Offence, transgression, injury; केवलं न सहते विलङ्घनम् Ki. 13. 55. –3 (pl.) Fasting, abstension from food.

विलङ्घित *p. p.* 1 Passed over or beyond, gone over. –2 Transgressed. –3 Surpassed, excelled. –4 Overcome, defeated. –5 Baffled, defied (as efforts); विलङ्घिताधोरणतीव्रयत्नाः R. 5. 48. –तम् Fasting.

विलज्ज् 6 Ā. To be bashful or modest, to blush, feel ashamed; यत्रांशुकाक्षेपविलज्जितानाम् Ku. 1. 14; R. 14. 27.

विलज्ज *a.* Shameless, unabashed.

विलप् 1 P. 1 To say, speak. –2 To lament, moan, bewail, cry, weep; विललाप विकीर्णमूर्धजा Ku. 4. 4; विललाप स बाष्पगद्गदम् R. 8. 43, 70; Bk. 6. 11; तामिह वृथा किं विलपामि Gīt. 3. –3 To prattle, talk idly, babble.

विलपनम् 1 Talking. –2 Talking idly, chattering, prattle. –3 Lamenting, wailing; विलपनविनोदोऽप्यसुलभः U. 3. 30. –4 The sediment of any oily substance. –Comp. –विनोदः removing grief by weeping.

विलपितम् 1 Lamentation, wailing. –2 A wail.

विलापः Wailing, lamentation, a wail, moan; लङ्कास्त्रीणां पुनश्चक्रे विलापाचार्यकं शरैः R. 12. 78.

विलापनम् An act causing lamentation, ruin; मद्विलापनमेतत्तु प्रतिबुद्धोऽस्मि संत्यज Mb. 12. 177. 28.

विलस् 1 Ā. 1 To remove, take away. –2 To grant, bestow. –3 To choose.

विलम्ब् 1 Ā. 1 To hang down, hang from, be suspended from; बिभ्रत्या कौस्तुभं न्यासं स्तनान्तरविलम्बिनम् R. 10. 62. –2 To set, decline (as the sun &c.). –3 To stay or lag behind, stay or remain, wait, stand still; तां प्राङ्मुखीं तत्र निवेश्य तन्वीं क्षणं व्यलम्बन्त पुरो निषण्णाः Ku. 7. 13. –4 To delay, be retarded; विलम्बितफलैः कालं निनाय स मनोरथैः R. 1. 33; किं विलम्ब्यते त्वरितं तं प्रवेशय U. 1. –5 To rest or depend upon; कर्माणि निर्वाणविलम्बितानि Bhāg. 1. 16. 24. –*Caus.* To delay, detain. –2 To put off, retard, procrastinate, postpone. –3 To waste, lose.

विलम्बः 1 Hanging over, pendulousness. –2 Tardiness, delay, procrastination.

विलम्बनम् 1 Hanging down, depending. –2 Delay, procrastination; न कुरु नितम्बिनि गमनविलम्बनम् Gīt. 5; or तन्मुग्धे विफलं विलम्बनमसौ रम्योऽभिसारक्षणः *ibid.*

विलम्बिका Constipation; a form of indigestion.

विलम्बित *p. p.* 1 Hanging, depending. –2 Pendent, pendulous. –3 Depending on, closely connected with. –4 Tardy, delayed, retarded. –5 Slow (as time in music opp. to द्रुत). –तम् Delay. –तम् *ind.* Slowly, tardily.

विलम्बिन् *a.* (-नी *f.*) 1 Hanging down, depending, pendent; नवाम्बुभिर्भूरिविलम्बिनो घनाः Ś. 5. 12; शिरीषमागण्डविलम्बि केशरम् 6. 17; अलघुविलम्बिपयोधरोपरुद्धाः Śi. 4. 29, 59; Ku. 1. 14; Ki. 5. 6; R. 16. 14; 18. 26; Mk. 5. 13. -2 Delaying, dilatory, being slow; भवति विलम्बिनि विगलितलज्जा विलपति रोदिति वासकसज्जा Gīt. 6.

विलम्भः 1 Liberality. -2 A gift, donation.

विलयः 1 Dissolution, liquefaction. -2 Destruction, death, end; नयतु मामात्मनोऽङ्गेषु विलयमम्बा U. 7. -3 Destruction or dissolution of the world; (विलयं गम् to be dissolved, to end, to be terminated; दिवसोऽनुमित्रमगमद्विलयम् Śi. 9. 17).

विलयनम् 1 Dissolving, liquefying, dissolution. -2 Corroding. -3 Removing, taking away. -4 Attenuating. -5 An attenuant.

विलला N. of a plant (Mar. अतिबला).

विलस् 1 P. 1 To shine, flash, glitter; वियति च विल्लास तद्वदिन्दुर्विलसति चन्द्रमसो न यद्वदन्यः Bk. 10. 69; Me. 49; R. 13. 76. -2 To appear, arise, become manifest; प्रेम विलसति महत्तदहो Śi. 15. 14; 9. 87. -3 To sport, amuse oneself, play, frolic about sportively; कापि चपला मधुरिपुणा विलसति युवतिरधिकगुणा Gīt. 7; or हरिरिह मुग्धवधूनिकरे विलासिनि विलसति केलिपरे Gīt. 1; पर्यङ्के तया सह विल्लास H. 1. -4 To sound, echo, reverberate. -5 To act upon, work upon, show oneself; (खेदः) त्वयि विलसति तुल्यं वल्लभालोकनेन Māl. 3. 8. -6 To move about, dart, shoot upwards.

विलसत् *pres. p.* (-न्ती *f.*) 1 Glittering, shining, bright. -2 Flashing, darting. -3 Waving. -4 Sportive, playful; see विलस् above.

विलसनम् 1 Glittering, flashing, gleaming. -2 Sporting, dallying.

विलसित *p. p.* 1 Glittering, shining, gleaming. -2 Appeared, manifested; तया विलसितेष्वेषु गुणेषु गुणवानिव Bhāg. 1. 2. 31. -3 Sportive, wanton. -तम् 1 Glittering, gleaming. -2 A gleam, flash; रोधोभुवां मुहुरमुत्र हिरण्मयीनां भासस्तडिद्विलसितानि विडम्बयन्ति Ki. 5. 46; Me. 83; V. 4. -3 Appearance, manifestation; as in अज्ञानविलसितम् &c. -4 Sport, play; dalliance, amorous or wanton gesture (fig. also); अतिपिशुनानि चैकान्तानिष्ठुरस्य दैवहतकस्य विलसितानि K. -5 Action or gesture in general. -6 Effect, fruit, result; सुकृतविलसितानां स्थानमूर्जस्वलानाम् Māl. 2. 9.

विलासः 1 Sport, play, pastime. -2 Amorous pastime, diversion, pleasure; as in विलासमेखला R. 8. 64; so विलासकाननम्, विलासमन्दिरम् &c. -3 Coquetry, dalliance, affectation, wantonness, graceful movement or play, any feminine gesture indicative of amorous sentiment; यातं यच्च नितम्बयोर्गुरुतया मन्दं विलासादिव Ś. 2. 2; कविकुलगुरुः कालिदासो विलासः P. R. 1. 22; Śi. 9. 26. -4 Grace, beauty, elegance, charm; सहजविलासनिबन्धनं शरीरम् Māl. 2. 6. -5 Flash, gleam. -6 Liveliness, joviality (considered as a masculine virtue); शोभा विलासो माधुर्यं...... पौरुषा गुणाः Daśarūpaka 2. 10. -7 Lust. -Comp. -काननम् a pleasure-grove. -गृहम्, -मन्दिरम् a pleasure-house. -चेष्टितम् amorous movement; लतासु तन्वीषु विलासचेष्टितम् Ku. 5. 13. -भित्तिः a wall (only) in appearance.

विलासनम् 1 Sport, play, pastime. -2 Wantonness, dalliance.

विलासवती A wanton or amorous woman; विलासवतीसखः R. 9. 48; विलासवत्यो मनसि प्रवासिनामनङ्गसंदीपनमाशु कुर्वते Ṛs. 1. 12.

विलासिका A drama in one act full of love-incidents; it is thus defined in S. D. :— शृङ्गारबहुलैकाङ्का दशलास्याङ्गसंयुता। विदूषकविटाभ्यां च पीठमर्देन भूषिता। हीना गर्भविमर्शाभ्यां संधिभ्यां हीननायका। स्वल्पवृत्ता सुनेपथ्या विख्याता सा विलासिका ॥ 552.

विलासिन् *a.* (-नी *f.*) Sportive, playful, dallying, wanton, coquettish; विलासतमंसादपरो विलासी R. 6. 14. -*m.* 1 A sensualist, voluptuary, an amorous person; उपमानमभूद्विलासिनां करणं यत्तव कान्तिमत्तया Ku. 4. 5. -2 Fire. -3 The moon. -4 A snake. -5 An epithet of Kṛṣṇa or Viṣṇu. -6 Of Śiva. -7 Of the god of love.

विलासिनी 1 A woman (in general). -2 A coquettish or wanton woman; हरिरिह मुग्धवधूनिकरे विलासिनि विलसति केलिपरे Gīt. 1; Ku. 7. 69; Śi. 8. 5; R. 6. 17. -3 A wanton, harlot.

विलागम् (= पिलाटम् q. v.).

विलायः, विलायनम् Dissolution, destruction, end; परीक्षितोऽथ राजर्षेर्जन्मकर्मविलायनम् Bhāg. 1. 7. 12.

विलालः 1 A cat (= बिडाल). -2 An instrument, a machine.

विलिख् 6 P. 1 To write, inscribe. -2 To draw, paint, delineate, portray; विलिखति रहसि कुरङ्गमदेन भवन्तमसमशरभूतम् Gīt. 4. -3 To scratch, scrape, tear up; निघ्नन् प्रोथेन पृथिवीं विलिखंश्चरणैरपि Mb. 3. 167. 19; मन्दं शब्दायमानो विलिखति शयनादुत्थितः क्ष्मां खुरेण K. P. 10; न्यलिखचञ्चुपुटेन पक्षती N. 2. 2; पादेन हैमं विलिलेख पीठम् R. 6. 15; Ku. 2. 23. -4 To implant, infix; तावन्तोऽपि विलिख्यन्ते हृदये शोकशङ्कवः H. 4. 72 v. l.

विलिखनम् 1 Scratching, scraping, writing. -2 The course of a river. -3 Dividing, splitting.

विलेखः A hole, cavity; छायातपविलेखं च Mb. 14. 45. 4. -खा 1 A scratch, mark. -2 A written contract.

विलेखनम् 1 Scratching, scraping, making a mark or furrow. -2 Digging. -3 Uprooting. -4 Dividing, splitting.

विलिङ्ग *a.* Of a different gender. °स्थ *a.* Not to be understood; Mb. 2.

विलिप् 6 P. 1 To smear, anoint, rub on; तथा हि नृत्याभिनयक्रियाच्युतं विलिप्यते मौलिभिरम्बरौकसाम् Ku. 5. 79; Bk. 3. 20; 15. 6; Śi. 16. 62. –2 To pollute, defile, taint, contaminate.

विलिप्त *p. p.* 1 Anointed, besmeared, smeared over. –2 Polluted, stained, defiled.

विलिप्ता, विलिप्तिका A second (= 1/3600 of a degree).

विलिम्पित *a.* Smeared, anointed.

विलेपः 1 An unguent, an ointment. –2 Mortar. –3 Plaster (in general). –4 Anointing, plastering.

विलेपनम् 1 Smearing, anointing. –2 An ointment, unguent, any cosmetic or perfume for the body (such as saffron, sandal &c.); न स्नानं न विलेपनं न कुसुमं नालंकृता मूर्धजाः Bh. 2. 19; यान्येव सुरभिकुसुमधूपविलेपनादीनि K.

विलेपनी 1 A woman scented with perfumes. –2 A woman beautifully dressed or attired (सुवेशा). –3 Rice-gruel.

विलेपिका, –विलेपी, –विलेप्यः Rice-gruel.

विलेपिका A female anointer.

विलेपिन् *a.* Viscous, sticky.

विली I. 4 Ā. 1 To cling or stick to, adhere to. –2 To rest on, settle down or alight on; पुरोऽस्य यावन्न भुवि व्यलीयत Śi. 1. 12. –3 To be dissolved, to melt away, be absorbed in; विलिल्ये यत्कुक्षिस्थितशिखिनि वातापिवपुषा Mv. 6. 60; 7. 14. –4 To vanish, disappear. –5 To perish. –II. 9 P. To melt, liquefy.

विलीन *p. p.* 1 Sticking to, clung or attached to. –2 Perched or settled on, alighting on. –3 Contiguous to, in contact with. –4 Melted, dissolved, liquefied. –5 Disappeared, vanished. –6 Dead, perished. –7 Infused into the mind, imagined.

विलुञ्चनम् Tearing off, peeling.

विलुड् *Caus.* 1 To agitate, stir up, toss about. –2 To disturb, confuse. –3 To turn over, upset.

विलोडनम् 1 Agitating, shaking about, stirring up, churning; तात नोदधिविलोडनं प्रति त्वद्विनाथ वयमुत्सहामहे Śi. 14. 83. –2 Splashing, sporting in (water); कदाचिन्मद्विलोडनासहिष्णुर्मामशपत् Dk. 2. 3.

विलोडित *p. p.* 1 Shaken, churned, stirred, agitated. –2 Rolling on the ground. **–तम्** Butter-milk.

विलुण्ठनम् Robbing, plundering.

विलुप् 6 P. 1 To break off, pull out, cut off. –2 To seize, plunder, rob, carry off; उपकारं ध्वजीकृत्य सर्वमेवावलुम्पति H. 2. 97. –3 To mar, spoil, impair. –4 (*a*) To destroy, ruin, cause to disappear; प्रियमत्यन्तविलुप्तदर्शनम् Ku. 4. 2 'for ever lost to view'. (*b*) To eat up; क्रव्याद्भिरङ्गलतिका नियतं विलुप्ता U. 3. 28; Mk. 1. 9. –5 To wipe or rub off. –*Pass.* To be destroyed or lost, to perish, disappear; जराविलुप्तमानावमानचिन्तः Dk.

विलुप्त *p. p.* 1 Broken or torn off; छायासुप्तमृगः शकुन्तनिवहैर्विष्वग्विलुप्तच्छदः Pt. 2. 2. –2 Seized, snatched away, carried off. –3 Robbed, plundered. –4 Destroyed, ruined. –5 Impaired, mutilated.

विलुम्पकः A thief, robber, ravisher; तदद्य नः पापमुपैत्यनन्वयं यन्नष्टनाथस्य वसोर्विलुम्पकात् Bhāg. 1. 18. 44.

विलोपः 1 Taking away, carrying off, seizure, plunder. –2 Loss, destruction, disappearance.

विलोपनम् 1 Cutting off. –2 Carrying away. –3 Destroying, destruction.

विलोप्तृ *m.* A robber.

विलुभ् 4 P. To be disturbed or deranged, be disordered; दधद्विलुभितं वातैः केशरं वह्निपिङ्गलम् Bk. 9. 40. –*Caus.* 1 To allure, entice, attract; स्मर यावन्न विलोभ्यसे दिवि Ku. 4. 20; अङ्गनास्तमधिकं व्यलोभयन् (सुखैः) R. 19. 10. –2 To divert, amuse, entertain; क्व दृष्टिं विलोभयामि Ś. 6; ललितलताविलोभ्यमाननयनो भवानुत्कण्ठां विनोदयतु V. 2.

विलुभित *p. p.* Disordered, agitated. **–Comp. –प्लव** *a.* going in an agitated manner.

विलोभः Attraction, seduction, allurement.

विलोभनम् 1 Enticing, alluring. –2 An allurement, a temptation, seduction; प्रयुज्य सामाचरितं विलोभनं भयं विभेदाय धियः प्रदर्शितम् Ki. 14. 7; R. 8. 60. –3 Praise, flattery.

विलोभनीय *a.* Alluring, enticing.

विलुल् 1 P. 1 To move to and fro. –2 To shake, make tremulous. –3 To disorder, derange, dishevel (as hair). –*Caus.* To agitate, stir, disturb.

विलुलित *p. p.* 1 Moving to and fro, unsteady, shaken, tossed about, tremulous; U. 3. 23. –2 Disordered, disarranged; गलितकुसुमदलविलुलितकेशा Gīt. 7. –3 Waving, fickle, unsteady.

विलून *p. p.* Cut off, lopped off, clipt, cut asunder.

विलोक् 10 U. 1 To see, behold, look at, perceive; विलोक्य वृद्धोक्षमधिष्ठितं त्वया महाजनः स्मेरमुखो भविष्यति Ku. 5. 70; R. 2. 11; 6. 59. –2 To search for, look out for.

विलोकः, –विलोकनम् 1 Seeing, looking at, observing; नगविलोकनविस्मितमानसः Ki. 5. 16. –2 Sight, observation; विलोकनेनैव तवामुना मुने कृतः कृतार्थोऽस्मि निबर्हितांहसा Śi. 1. 29.

विलोकित *p. p.* 1 Seen, observed, viewed, beheld. -2 Examined, thought about. **-तम्** 1 A look, glance; कृत इव मुग्धविलोकिनोपदेशः Ś. 2. 3. -2 Observation.

पञ्चवटीत्येष नित्यपुष्पितकाननः ॥ Rām. 3. 13. 22. -8 A topic, case, subject, the point under discussion; विवाद°, विचार° &c. -9 A part (as of a book). -10 A tent. -Comp. -अन्तरम् another place. -आरूढ a. alighted on the ground. -अरविन्दम्, -कमलम्, -कमलिनी a land-growing lotus; साभ्रेऽह्नीव स्थलकमलिनीं नप्रबुद्धां नसुप्ताम् Me. 94; Ku. 1. 33. -स्थलकमलः m. is also a plant of the lily-family (Gloriosa Superba). It is a red-flowered species traditionally called भूकमल. The plant goes by the name कळलावी in Marathi which seems to have been derived from Sanskrit स्थलकल्हारी. Kālidāsa pointedly refers to the peculiarity that it opens only in response to day-light. -कुमुदः the Karavīra plant. -चर a. land-going, not aquatic. -च्युत a. fallen or removed from a place or position. -ज a. 1 Growing or living on dry land; Ms. 1. 44. -2 accruing from land-transport (taxes). -देवता a local or rural deity. -पद्मम् a land-lotus; सरोजलक्ष्मीं स्थलपद्महासैः Bk. 2. 3. -पद्मिनी the shrub *Hibiscus Mutabilis*. -मार्गः, -वर्त्मन् n. a road by land; स्थलवर्त्मना 'by land'; पारसीकांस्ततो जेतुं प्रतस्थे स्थलवर्त्मना R. 4. 60. -विग्रहः a battle on level ground, a land-fight. -शुद्धिः f. purification or clearance of a place from impurity. -सीमन् f. a landmark, boundary. -स्थ a. standing on dry ground.

स्थला A spot of dry ground artificially raised and drained (opp. स्थली q. v. below).

स्थली 1 Dry ground, firm land. -2 A natural spot of ground, ground or land (as of a forest); विललाप विकीर्णमूर्धजा समदुःखामिव कुर्वती स्थलीम् Ku. 4. 4; Ki. 4. 2. -3 A deity of the soil; (= स्थलदेवता q. v.). -Comp. -देवता a deity of the soil, a tutelary deity; पश्यन्तीनां न खलु बहुशो न स्थलीदेवतानां मुक्तास्थूलास्तरुकिसलयेष्वश्रुलेशाः पतन्ति Me. 108. -भूता a. high-lying (as a country). -शायिन् a. sleeping on the bare ground.

स्थलेशय a. Sleeping on dry ground. -यः Any amphibious animal.

स्थविः 1 A weaver. -2 Heaven. -3 A moveable thing. -4 Fire.

स्थविर a. [स्था-किरच् स्थवादेशः] 1 Fixed, firm, steady. -2 Old, aged, ancient; न तेन स्थविरो भवति येनास्य पलितं शिरः। बालोऽपि यः प्रजानाति तं देवाः स्थविरं विदुः ॥ Mb. 3. 133. 11. -रः 1 An old man; ऊर्ध्वं प्राणा ह्युत्क्रामन्ति यूनः स्थविर आयति। प्रत्युत्थानाभिवादाभ्यां पुनस्तान् प्रतिपद्यते ॥ Ms. 2. 120. -2 A beggar. -3 N. of Brahman. -रा An old woman; स्थविरे का त्वं, अयमर्भकः कस्य नयनानन्दकरः Dk. -Comp. -द्युति a. having the dignity of an elder; ऋषेः पुत्रो महातेजा बालोऽपि स्थविरद्युतिः Rām. 1. 50. 8.

स्थविष्ठ a. Greatest, very strong, largest (superl. of स्थूल q. v.) मनोमयं सूक्ष्ममुपेत्य रूपं मात्रा स्वरो वर्ण इति स्थविष्ठः Bhāg. 11. 12. 17.

स्थवीयस् Greater, larger (compar. of स्थूल q. v.); सर्वसत्त्वात्मदेहाय विशेषाय स्थवीयसे (नमः) Bhāg. 4. 24. 39.

स्था 1 P. (Ātm. also in certain senses; तिष्ठति-ते, तस्थौ-तस्थे, अस्थात्-अस्थित, स्थास्यति-ते, स्थातुं, स्थित; *pass.* स्थीयते; the स् of this root is changed to ष् after a preposition ending in इ or उ) 1 To stand; अयं स ते तिष्ठति संगमोत्सुकः Ś. 3. 13; चलत्येकेन पादेन तिष्ठत्येकेन बुद्धिमान् Subhāṣ. -2 To stay, abide, dwell, live; ग्रामे or गृहे तिष्ठति -3 To remain, be left; यावदेकानुदिष्टस्य गन्धो लेपश्च तिष्ठति. Ms. 4. 111; एको गजदत्तस्तिष्ठति Pt. 4. -4 To delay, wait; किमिति स्थीयते Ś. 2. -5 To stop, cease, desist, stand still; तिष्ठत्येष क्षणमधिपतिर्ज्योतिषां व्योममध्ये V. 2. 1. -6 To be kept aside; तिष्ठतु तावत् पत्रलेखागमनवृत्तान्तः K. 'never mind the account of' &c. -7 To be, exist, be in any state or position; often with participles; मेरौ स्थिते दोग्धरि दोहदक्षे Ku. 1. 2; व्याप्य स्थितं रोदसी V. 1. 1; या स्थिता व्याप्य विश्वं Ś. 1. 1; कालं नयमाना तिष्ठति Pt. 1; Ms. 7. 8. -8 To abide by, conform to, obey (with loc.); शासने तिष्ठ भर्तुः V. 5. 17; R. 11. 65. -9 To be restrained; यदि ते तु न तिष्ठेयुरुपायैः प्रथमैस्त्रिभिः Ms. 7. 108. -10 To be at hand, be obtainable; न विप्रं स्वेषु तिष्ठत्सु मृतं शूद्रेण नाययेत् Ms. 5. 104. -11 To live, breathe; आः क एष मयि स्थिते चन्द्रगुप्तमभिभवितुमिच्छति Mu. 1. -12 To stand by or near, stand at one's side, help; उत्सवे व्यसने चैव दुर्भिक्षे शत्रुसंकटे (राष्ट्रविप्लवे)। राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः ॥ H. 1. 71 (v. l.). -13 To rest or depend on; जहातु नैनं कथमर्थसिद्धिः संशय्य कर्णादिषु तिष्ठते यः Ki. 3. 14. -14 To do, perform, occupy oneself with; न तिष्ठति तु यः पूर्वां नोपास्ते यश्च पश्चिमाम् Ms. 2. 103. -15 (Ātm.) To resort or go to (as an umpire), be guided by the advice of; संशय्य कर्णादिषु तिष्ठते यः Ki. 3. 14. -16 (Ātm.) To offer oneself to (for sexual embrace), stand as a prostitute (with dat.); गोपी स्मरात् कृष्णाय तिष्ठते Sk. on P. I. 4. 34. *-Caus.* (स्थापयति-ते) 1 To cause to stand. -2 To lay, set, place, put. -3 To found, establish. -4 To stop. -5 To arrest, check. -6 To raise, erect. -7 To cause to last or continue, make durable. -8 To give in marriage; लोकश्रेष्ठे गुणवति वरे स्थापिता त्वं मयैव Māl. 10. 5. -9 To instruct in, initiate into. *-Desid.* (तिष्ठासति) To wish to stand &c.

स्थ a. (At the end of comp.) 1 Standing, staying, abiding, being, existing &c.; तत्रस्थ, अङ्कस्थ, प्रकृतिस्थ, तटस्थ q. q. v. v. -2 Immovable (स्थावर); सज्यन्ते जङ्गमस्थानि Mb. 12. 232. 39. -स्थः A place, spot.

स्थाणव a. 1 Relating to स्थाणुः. -2 Coming from the trunks or stems of trees; Hch.

स्थाणु a. [स्था-नु पृषो॰ णत्वम्] Firm, fixed, steady, stable, immoveable, motionless; नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः Bg. 2. 24; Mb. 1. 34. 5. -णुः 1 An epithet of Śiva; स स्थाणुः स्थिरभक्तियोगसुलभो निःश्रेयसायास्तु वः V. 1. 1. -2 A stake, post, pillar; अपि स्थाणुवदासीनः Pt. 1. 49; किं स्थाणुरयमुत पुरुषः. -3 A peg, pin; स्थाणौ निषङ्गिण्यनसि

क्षणं पुरः Si. 12. 26. -4 The gnomon of a dial. -5 A spear, dart. -6 A nest of white ants. -7 The drug or perfume called *Jeeraka*. -8 Stump, trunk; लता वल्लीश्च गुल्मांश्च स्थाणूनश्मन एव च Rām. 2. 80. 6. -9 A particular posture in sitting. -*m.*, *n.* A branchless trunk or stem, any bare stalk or stem, pollard. -Comp. -छेदः one who cuts down the trunks of trees, one who clears away timber; स्थाणुच्छेदस्य केदारमाहुः शल्यवतो मृगम् Ms. 9. 44. -दिश् *f.* the north-east. -भूत *a.* become motionless (as the trunk of a tree). -भ्रमः mistaking anything for a post.

स्थातृ *a.* Standing, stationary, fixed. -*m.* A guider, driver.

स्थानम् [स्था-ल्युट्] 1 The act of standing or remaining, stay, continuance, residence; न किल भवतां देव्याः स्थानं गृहेऽभिमतं ततः U. 3. 32. -2 Being fixed or stationary. -3 A state, condition; स्थानत्रयातपरं प्राप्तं ब्रह्मभूतमविक्रियम् Bhāg. 1. 18. 26. -4 A place, spot, site, locality; अक्षमालामदत्त्वास्मात्स्थानात्पदात्पदमपि न गन्तव्यम् K. -5 Station, situation, position. -6 Relation, capacity; पितृस्थाने 'in the place or capacity of a father'; भक्ष्यस्थाने Pt. 2. 26. -7 An abode, a house, dwelling-house; स एव (नक्रः) प्रच्युतः स्थानाच्छुनापि परिभूयते Pt. 3. 46. -8 (*a*) A country, region, district. (*b*) A town, city. -9 Office, rank, dignity; अमात्यस्थाने नियोजितः. -10 Object; गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः U. 4. 11. -11 An occasion, a matter, subject, cause; पराभ्युहस्थानान्यपि तनुतराणि स्थगयति Mal. 1. 14; स्थाने जरापरिभवस्य तदेव पुंसाम् Subhāṣ; so कलह°, कोप°, विवाद° &c. -12 A fit or proper place; स्थानेष्वेव नियोज्यन्ते भृत्याश्चाभरणानि च Pt. 1. 72. -13 A fit or worthy object; स्थाने खलु सज्जति दृष्टिः M. 1; see स्थाने also. -14 The place or organ of utterance of any letter; (these are eight :— अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा। जिह्वामूलं च दन्ताश्च नासिकौष्ठौ च तालु च Śik. 13.) -15 A holy place. -16 An altar. -17 A place in a town, square, court. -18 The place or sphere assigned after death to persons according as they perform or neglect their prescribed duties. -19 (In politics, war &c.) The firm attitude or bearing of troops, standing firm so as to repel a charge; स्थाने युद्धे च कुशलानभीरूनविकारिणः Ms. 7. 190. -20 A halt. -21 A stationary condition, a neutral or middle state; स्थानं वृद्धिः क्षयश्चैव त्रिवर्गश्चैव दण्डजः Mb. 12. 59. 31. -22 That which constitutes the chief strength or the very existence of a kingdom, a stamina of a kingdom; *i.e.* army, treasure, town, and territory; Ms. 7. 56 (where Kull. renders स्थानं by दण्डकोषपुरराष्ट्रात्मकं चतुर्विधम्). -23 Likeness, resemblance. -24 Part or division of a work, section, chapter &c. -25 The character or part of an actor. -26 Interval, opportunity, leisure. -27 (In music) A note, tone, modulation of the voice; तौ तु गान्धर्वतत्त्वज्ञौ स्थानमूर्च्छनकोविदौ Rām. 1. 4. 10 (com.- 'यदूर्ध्वं हृदयग्रन्थे कपोलफलकादधः। प्राणसंचारणस्थानं स्थानमित्यभिधीयते ॥......इति शाण्डिल्यः). -28 A pose, posture (of archers etc.). -29 An order of the life (आश्रम); मैत्रेयीति होवाच याज्ञवल्क्य उद्यास्यन्वा अरेऽहमस्मात् स्थानादस्मि Bri. Up. 2. 4. 1. -30 Ground (भूमि); स्थानासानिनो भूमि-पाषाण-सिकता-शर्करा-वालुका-भस्मशायिनः Mb. 12. 192. 1. -31 Sustenance, maintenance; यच्चेदं प्रभवः स्थानं भूतानां संयमो यमः। स्वभावेनैव वर्तन्ते द्वन्द्वसृष्टानि भूरिशः॥ Mb. 12. 238. 20 (com. स्थानं पोषणम्). -32 A mode or attitude in fighting; अस्त्रयन्त्राणि चित्राणि स्थानानि विविधानि च Mb. 9. 57. 18. -33 Storage (of goods); आगमं निर्गमं स्थानं तथा वृद्धिक्षयावुभौ। विचार्य सर्वपण्यानां कारयेत् क्रयविक्रयौ ॥ Ms. 8. 401. -34 A state of perfect tranquillity. -35 Any organ of sense. -36 Shape, form, appearance (as of the moon). -37 An astronomical mansion. -Comp. -अधिकारः the superintendence of a shrine; Inscr. -अध्यक्षः 1 a local governor. -2 the superintendent of a place. -3 a watchman, police-officer. -आसनम् *n.* du. standing and sitting down. -आसेधः confinement to a place, imprisonment, arrest; cf. आसेध. -चञ्चला Ocimum Pilosum (Mar. तुकुमराई). -कुटिकासनम् leaving the house or any abode (स्थावरगृहत्याग); शिरसो मुण्डनाद्वापि न स्थानकुटिकासनात् Mb. 3. 200. 101. -चिन्तकः a kind of quarter-master. -च्युत see स्थानभ्रष्ट. -टिप्पटिका the daily account; Śukra 3. 369. -दीप्त (in augury) inauspicious on account of situation. -पालः a watchman, sentinel, policeman; Y. 2. 173. -भूमि *f.* a dwelling-place, mansion. -भ्रष्ट *a.* ejected from an office, displaced, dismissed, out of employ. -माहात्म्यम् 1 the greatness or glory of any place. -2 a kind of divine virtue or uncommon sanctity supposed to be inherent in a sacred spot. -मृगः N. of certain animals (such as turtle, crocodile &c.). -योगः assignment of proper places; द्रव्याणां स्थानयोगांश्च क्रयविक्रयमेव च Ms. 9. 332. -विभागः (in alg.) subdivision of a number according to the position of its figures. -स्थ *a.* being in one's abode, at home.

स्थानकम् [स्थान स्वार्थे क] 1 A position, situation. -2 A particular point or situation in dramatic action; *e. g.* पताकास्थानक q. v.; स्थानकेन अवलोक्य V. 4. 44/45; it may also mean 'a kind of posture'. -3 A city, town. -4 A basin. -5 Froth, a kind of scum on spirits or wine. -6 A mode of recitation. -7 A division or section of the Taittirīya, a branch of the *Yajurveda*. -8 A temple in which the idol is kept in an erect posture. -9 The attitude of the body (in shooting &c.).

स्थानतस् *ind.* 1 According to one's place or position. -2 From one's proper place. -3 With reference to the organ of utterance.

स्थानिक *a.* (-की *f.*) 1 Belonging to a place, lo -2 (In gram.) That which takes the place of a th or is substituted for it. -कः 1 Any one hol is an office, a place-man. -2 The governor of a p

स्थानिन् *a.* [स्थानमस्यास्ति रक्ष्यत्वेन इनि] 1 Having a place. -2 Having fixedness, permanent. -3 Having a substitute. -*m.* 1 The original form or primitive element, that for which anything else is substituted; स्थानिवदादेशोऽनल्विधौ P. I. 1. 56. -2 The form so substituted for anything. -3 That which has a place, or is actually expressed.

स्थानिवत् *a.* Like the original or primitive element; P. I. 1. 56. -**Comp.** -**भावः** the state of being like the original form; किं स्थानिवद्भावमधत्त दुष्टं तादृक्कृतव्याकरणः पुनः सः N. 10. 135.

स्थानीय *a.* 1 Belonging to a place, local. -2 Suitable to a place. -**यम्** 1 A town, city. -2 Capital; Kau. A. 2. 2. -3 A kind of fortress to defend 800 villages; अष्टशतग्राम्या मध्ये स्थानीयम् Kau. A. 2. 1.

स्थाने *ind.* (loc. of स्थान) 1 In the right or proper place, rightly, properly, justly, truly, appropriately; स्थाने हृषीकेश तव प्रकीर्त्या जगत् प्रहृष्यत्यनुरज्यते च Bg. 11. 36; स्थाने वृता भूपतिभिः परोक्षैः R. 7. 13; स्थाने प्राणाः कामिनां दूत्यधीनाः M. 3. 14; Ku. 6. 67; 7. 65. -2 In place of, instead of, in lieu of, as a substitute for; धातोः स्थान इवादेशं सुग्रीवं संन्यवेशयत् R. 12. 58. -3 On account of, because of. -4 Similarly, like, as. -**Comp.** -**पतित** *a.* occupying the place of another.

स्थापक *a.* [स्थापयति स्था-णिच्-ण्वुल्] Causing to stand, fixing, founding, establishing, regulating. -**कः** 1 The director of the stage-business, a stage-manager. -2 The founder of a temple, or erector of an image. -3 A depositor.

स्थापनम् [स्था-णिच्-ल्युट्] 1 (*a*) The act of causing to stand, fixing; founding, establishing, instituting; Mb. 12. 255. 3. (*b*) Regulating, directing. -2 Fixing the thoughts, concentration of the mind, steady application, abstraction. -3 A dwelling, habitation. -4 A ceremony performed on a woman's perceiving the first signs of living conception; cf. पुंसवन. -5 Fastening, rendering immovable; उत्थापनैरुन्नयनैश्चालनैः स्थापनैरपि। परस्परं जिगीषन्तावुपचक्रतुरात्मनः ॥ Bhāg. 10. 44. 5. -6 Founding, erecting (a temple, image &c.). -7 Preservation, prolongation (of life). -8 A means of stopping (the flow of blood), styptic. -9 Storage (of grain). -10 Establishment of a proposition. -**Comp.** **वृत्त** *a.* one who is past all restoration to strength.

स्थापना 1 Placing, fixing, founding, establishing. -2 Arranging, regulating (as a drama), stage-management. -3 A prologue of the drama; (see plays of Bhāsa). -4 Storing, keeping, preserving.

स्थापनीय *a.* 1 To be fixed, established &c. -2 To be treated with tonics.

स्थापयितृ *a.* Establisher, founder.

स्थापित *p. p.* [स्था-णिच्-क्त] 1 Placed, fixed, located, deposited. -2 Founded, instituted. -3 Set up, raised, erected. -4 Directed, regulated, ordered, enacted. -5 Determined, settled, ascertained. -6 Appointed to, entrusted with any duty, post &c. -7 Wedded, married; Māl. 10. 5. -8 Firm, steady.

स्थाप्य *a.* 1 To be placed or deposited. -2 To be founded, fixed or established. -3 To be appointed or installed. -4 To be shut up, confined in. -5 To be plunged (in grief &c.). -6 To be checked, restrained. -**प्यम्** A pledge, deposit. -**प्यः** the image of a god. -**Comp.** -**अपहरणम्** the embezzlement of a deposit.

स्थामन् *n.* [स्था-मनिन्] 1 Strength, power, stamina, as in the word अश्वत्थामन्, see the quotation from Mb. under अश्वत्थामन्. -2 The neighing of a horse; अश्वस्येवास्य यत्स्थाम नदतः प्रदिशो गतम् Mb. 1. 130. 48. -3 Fixity, stability. -4 Station, seat, place.

स्थामवत् *a.* Powerful, strong.

स्थायः A receptacle. -**या** the earth.

स्थायिता 1 Constancy, stability. -2 Durableness, invariableness.

स्थायिन् *a.* [स्था-णिनि] 1 Standing, staying, being situated (at the end of comp.). -2 Enduring, continuing, lasting, abiding; शरीरं क्षणविध्वंसि कल्पान्तस्थायिनो गुणाः Subhāṣ.; कतिपयदिवसस्थायिनी यौवनश्रीः Bh. 3. 82; Mv. 7. 15. -3 Living, dwelling, remaining; संपत्स्यन्ते कतिपयदिनस्थायिहंसा दशार्णाः Me. 23. -4 Permanent, firm, steady, invariable, unchangeable. -*m.* 1 A lasting or permanent feeling; (see स्थायिभाव below); स्थायिनोऽर्थे प्रवर्तन्ते भावाः संचारिणो यथा Śi. 2. 87. -*n.* Anything lasting, a permanent state or condition. -**Comp.** -**भावः** a fixed or permanent condition of mind, a lasting or permanent feeling; (these feelings being said to give rise to the different *rasas* or sentiments in poetry, each *rasa* having its own Sthāyibhāva); they are eight or nine; रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा। जुगुप्सा विस्मयश्चेत्यमष्टौ प्रोक्ताः शमोऽपि च S. D. 206; cf. व्यभिचारिभाव, भाव, विभाव also.

स्थायीभू 1 P. To become firm, fixed or permanent, take a strong or firm hold on; वचस्तत्र प्रयोक्तव्यं यत्रोक्तं लभते फलम्। स्थायीभवति चात्यन्तं रागः शुक्लपटे यथा ॥ Pt. 1. 33.

स्थायुक *a.* (-**का** or -**की** *f.*) [स्था-उकञ्] 1 Likely to last, enduring. -2 Firm, steady, stationary; आयोधने स्थायुकमस्त्रजातम् Bk. 2. 22; अतीते वर्षुके काले, प्रमत्तः स्थायुको गृहे ibid 7. 18. -3 Located, situated; कुम्भास्थिकूटावटस्थानस्थायुकमौक्तिकोत्करकिरः N. 12. 66. -**कः** The superintendent or head of a village.

स्थावर *a.* [स्था-वरच्] 1 Fixed to one spot, stable, stationary, immoveable, inanimate (opp. जङ्गम); शरीरिणां स्थावरजङ्गमानां सुखाय तज्जन्मदिनं बभूव Ku. 1. 23; 6. 67, 73. –2 Inert, inactive, slow. –3 Regular, established. –रः A mountain; स्थावराणां हिमालयः Bg. 10. 25. –रम् 1 Any stationary or inanimate object (such as clay, stones, trees &c. which formed the seventh creation of Brahman; cf. Ms. 1. 41); मान्यः स मे स्थावरजङ्गमानां सर्गस्थितिप्रत्यवहारहेतुः R. 2. 44; Ku. 6. 58. –2 A bowstring. –3 Immoveable property, real estate. –4 A heir-loom. –5 A large body; (fig.) a gross or material body (स्थूलशरीर); गमनं निरपेक्षश्च पश्चादनवलोकयन्। ऋजुः प्रणिहितो गच्छंस्त्रसस्थावरवर्जकः Mb. 12. 9. 19. –Comp. –अस्थावरम्, –जङ्गमम् 1 moveable and immoveable propery. –2 animate and inanimate things. –आत्मन् *a.* of immoveable form; स्थाने त्वां स्थावरात्मानं विष्णुमाहुस्तथाहि ते Ku. 6. 67.

स्थावरता, –त्वम् 1 Fixedness, stability. –2 The state of a vegetable or mineral; शरीरजैः कर्मदोषैर्याति स्थावरतां नरः Ms. 12. 9.

स्थासकः [स्था-स-स्वार्थादौ क] 1 Perfuming or smearing the body with fragrant unguents. –2 A bubble of water or any fluid; रौक्मा रेजुः स्थासका मूर्तिभाजो दर्पस्येव व्याप्तदेहस्य शेषाः Śi. 18. 5. –3 A bubble-shaped ornament on a horse's trappings. –4 A figure made with unguents.

स्थासु *n.* Bodily strength.

स्थास्नु *a.* [स्था-स्नु] 1 Disposed to stand, firm, immoveable. –2 Permanent, eternal, lasting, durable; भवन्त्यस्यैवमङ्गानि स्थास्नूनि बलवन्ति च Śi. 2. 93; Ki. 2. 19. –स्नुः A tree; अणुप्रायास्वोषधीषु शमीप्रायेषु स्थास्नुषु Bhāg. 12. 2. 15.

स्थित *p. p.* [स्था-क्त] 1 Stood, remained, stayed. –2 Standing. –3 Standing up, risen; स्थितः स्थितामुच्चलितः प्रयातां...छायेव तां भूपतिरन्वगच्छत् R. 2. 6. –4 Staying, resting, living, being, existing, situated; धन्या केयं स्थिता ते शिरसि Mu. 1. 1; Me. 7; oft. with gerunds merely as a copula; वेदान्तेषु यमाहुरेकपुरुषं व्याप्य स्थितं रोदसी V. 1. 1; Ś. 1. 1; Ku. 1. 1. –5 Happened, occurred; सुहृदः पश्य वसन्त किं स्थितम् Ku. 4. 27. –6 Stationed in, occupying, appointed to; अभिजनवतो भर्तुः श्लाघ्ये स्थिता गृहिणीपदे Ś. 4. 18. –7 Acting up to, abiding by, conforming to; किमत्र चित्रं यदि कामसूर्भूवृत्ते स्थितस्याधिपतेः प्रजानाम् R. 5. 33; धर्मे स्थिताः (राजानः) Māl. 10. 25. –8 Stood still, stopped, desisted. –9 Fixed on, firmly attached to; ममात्र भावैकरसं मनः स्थितम् Ku. 5. 82. –10 Steady, firm; as in स्थितधी or स्थितप्रज्ञ q. v. –11 Determined, resolved; इति देहविमुक्तये स्थिताम् (रतिम्) Ku. 4. 39. –12 Established, decreed. –13 Steadfast in conduct, steady-minded. –14 Upright, virtuous. –15 Faithful to a promise or agreement. –16 Agreed, engaged, contracted. –17 Ready, being close or at hand. –तम् 1 Standing by itself (as a word). –2 Stopping, standing still. –3 Manner of standing. –4 Perseverance on the right path. –Comp. –उपस्थित *a.* with and without the particle 'इति' (as a word). –धी *a.* firm-minded, steady-minded, cool. –पाठ्यम् recitation in Prākrita by a woman while standing. –प्रज्ञ *a.* firm in judgment or wisdom, free from any hallucination, contented; प्रजहाति यदा कामान् सर्वान् पार्थ मनोगतान्। आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते Bg. 2. 55. –प्रेमन् *m.* a staunch or faithful friend. –लिङ्ग *a.* having the virile member erected. –संकेत, –संविद् *a.* keeping a promise.

स्थितिः *f.* [स्था-क्तिन्] 1 Standing, remaining, staying, abiding, living, stay, residence; स्थितिं नो रे दध्याः क्षणमपि मदान्धेक्षण सखे Bv. 1. 52; रक्षोगृहे स्थितिर्मूलमग्निशुद्धौ त्वनिश्चयः U. 1. 6. –2 Stopping, standing still, continuance in one state; प्रस्थितायां प्रतिष्ठेथाः स्थितायां स्थितिमाचरेः R. 1. 89. –3 Remaining stationary, fixity, steadiness, firmness, steady application or devotion; मम भूयात् परमात्मनि स्थितिः Bv. 4. 23; Māl. 5. 22. –4 A state, position, situation, condition; एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति Bg. 2. 72. –5 Natural state, nature, habit; सपर्वतवनां कृत्स्नां व्यथयिष्यामि ते स्थितिम् Rām. 7. 98. 10; अथ वा स्थितिरियं मन्दमतीनाम् H. 4. –6 Stability, permanence, perpetuation, continuance; वंशस्थितेरधिगमान्महति प्रमोदे V. 5. 15; कन्यां कुलस्य स्थितये स्थितिज्ञः Ku. 1. 18; Mv. 7. 3; R. 3. 27. –7 Correctness of conduct, steadfastness in the path of duty, decorum, duty, moral rectitude, propriety; अमंस्त चानेन परार्ध्यजन्मना स्थितेरभेत्ता स्थितिमन्तमन्वयम् R. 3. 27; 11. 65; 12. 31; कन्यां कुलस्य स्थितये स्थितिज्ञः (विधिनोपयेमे) Ku. 1. 18; Ś. 5. 10. –8 Maintenance of discipline, establishment of good order (in a state); स्थित्यै दण्डयतो दण्ड्यान् R. 1. 25. –9 Rank, dignity, high station or rank. –10 Maintenance, sustenance; जरधाधैर्नवसल्लकीकिसलयैरस्याः स्थितिं कल्पयन् Māl. 9. 32; R. 5. 9. –11 Continuance in life, preservation (one of the three states of human beings); सर्गस्थितिप्रत्यवहारहेतुः R. 2. 44; Ku. 2. 6. –12 Cessation, pause, stop, restriction; नासां काश्चिदगम्योऽस्ति नासां च वयसि स्थितिः Pt. 1. 143. –13 Well-being, welfare. –14 Consistency. –15 A settled rule, ordinance, decree, an axiom or maxim; अबान्धवं शवं चैव निर्हरेयुरिति स्थितिः Ms. 10. 55. –16 Settled determination. –17 Term, limit, boundary. –18 Inertia, resistance to motion. –19 Duration of an eclipse. –20 Regard, consideration, account; नासां च वयसि स्थितिः Pt. 1. 143. –Comp. –ज्ञ *a.* knowing the bounds of morality; कन्यां कुलस्य स्थितये स्थितिज्ञः Ku. 1. 18. –पद् the epithet of Viṣṇu; पादेषु सर्वभूतानि पुंसः स्थितिपदो विदुः Bhāg. 2. 6. 18. –पदम् the proper basin (for flow), the right path; अपामुद्वृत्तानां निजमुपदिशन्त्या स्थितिपदम् Mu. 3. 8. –भिद् *a.* violating the bounds of morality. –मार्गः the way to compose (the mind); मनसश्च स्थितिमार्गमालम्बे Bu. Ch.

5. 9. -स्थापक *a.* fixing in the original position, having the power of restoring to a previous state, having elastic properties. (-कः) elasticity, capability of recovering the former position.

स्थितिमत् *a.* 1 Possessed of firmness, steady, firm; N. 5. 22. -2 Permanent; स्थितेरभेत्ता स्थितिमन्तमन्वयम् R. 3. 27. -3 Virtuous, upright. -4 Keeping within limits (as the ocean).

स्थाण्डिलः [स्थण्डिले शयिता अण्] 1 An ascetic who sleeps on the bare ground or on a place prepared for sacrifice. -2 A religious mendicant or beggar.

स्थापत्यः [स्थपतिरेव स्वार्थे ष्यञ्] A guard of the women's apartments, chamberlain; स्थापत्यैर्न स्म वित्तस्ते वर्षीयस्त्वचलत्करैः N. 20. 138. -त्यम् 1 The office of the governor of a district. -2 Architecture, building, erecting; स्थापत्यं चासृजद्वेदं क्रमात् पूर्वादिभिर्मुखैः Bhāg. 3. 12. 38. -Comp. -वेदः the science of architecture (one of the four उपवेद s).

स्थालम् [स्थलति तिष्ठत्यन्नाद्यत्र आधारे घञ्] 1 A plate or dish. -2 A cooking-pot, any culinary vessel; स्थालानां चषकाणां च भृङ्गाराणां च भूरिशः Śiva B. 29. 58. -3 The hollow of a tooth. -Comp. -पथ, -पथिक *a.* imported by land; P. V. 1. 77 Vārt. -रूपम् the form or representation of a pot.

स्थालकः, -कम् (pl.) N. of particular bones on the back.

स्थालिकः The smell of faeces.

स्थाली 1 An earthen pot or pan, a cooking-pot, caldron, kettle; न हि भिक्षुकाः सन्तीति स्थाल्यो नाधिश्रीयन्ते Sarva. S.; स्थाल्यां वैडूर्यमय्यां पचति तिलखलीमिन्धनैश्चन्दनाद्यैः Bh. 2. 100. -2 A particular vessel used in the preparation of Soma. -3 The trumpet-flower. -Comp. -द्रुमः Ficus Benjamina or Indica (Mar. नांदुरखी). -पाकः 1 a particular religious act performed by a householder. -2 a dish of rice boiled in milk. -पुरीषम् the sediment or dirt sticking to a cooking-pot; स्थालीपुरीषादीन्यप्यमृतवदभ्यवहरति Bhāg. 5. 9. 11. -पुलाकः boiled rice in a cooking-pot; यथा स्थालीपुलाकेन MS. 7. 4. 12; अलिङ्गाख्यपि स्थालीपुलाकवत् सिद्धिः ŚB. on MS. 8. 1. 11. °न्यायः see under न्याय; also see तुल्यन्याय and तुल्यपाक. -बिलम् the interior or hollow of a caldron; P. V. 1. 70. -बिलीयम्, -बिल्यम् *a.* fit for cooking (rice etc.).

स्थावरादि *n.* A kind of poison; L. D. B.

स्थाविर *a.* (-रा or -री *f.*) Thick, firm. -रम् Old age (commencing after seventy); (वृद्धः स्यात्सप्ततेरूर्ध्वं वर्षीयान् नवतेः परम्); गार्हस्थ्येऽप्यथवा बाल्ये यौवने स्थाविरेऽपि वा Mb. 3. 200. 3.

स्थिकः, (-क्कः) The buttocks; L. D. B.

स्थिर *a.* [स्था-किरच्] (compar. स्थेयस्; superl. स्थेष्ठ) 1 Firm, steady, fixed; भावस्थिराणि जननान्तरसौहृदानि Ś. 5. 2; स स्थाणुः स्थिरभक्तियोगसुलभो निःश्रेयसायास्तु वः V. 1. 1; Ku. 1. 30; R. 11. 19. -2 Immoveable, still, motionless; स्थिरप्रदीपतामेत्य भुजङ्गाः पर्युपासते Ku. 2. 38. -3 Immoveably fixed; कालेनावरणात्ययात्परिणते यत्स्नेहसारे स्थितम् U. 1. 39. -4 Permanent, eternal, everlasting; कल्पिष्यन्ते स्थिरगणपदप्राप्तये श्रद्दधानाः Me. 57; Māl. 10. 25. -5 Cool, collected, composed, placid, calm. -6 Quiescent, free from passion. -7 Steady in conduct, steadfast. -8 Constant, faithful, determined. -9 Certain, sure. -10 Hard, solid. -11 Strong, intense. -12 Stern, relentless, hard-hearted; अहो स्थिरः कोऽपि तवेप्सितो युवा Ku. 5. 47. -रः 1 A god, deity. -2 A tree. -3 A mountain. -4 A bull. -5 N. of Śiva. -6 N. of Kārtikeya. -7 Final beatitude or absolution. -8 The planet Saturn. -9 N. of certain zodiacal signs (*Taurus, Leo, Scorpio,* and *Aquarius*). -रा 1 The earth; पितामहस्तामालेक्य विहस्तामस्थिरां स्थिराम् Śiva B. 5. 47. -2 A strong-minded woman. -3 The silkcotton tree. -रम् Steadfastness, stubbornness. (स्थिरीकृ means 1 to confirm, strengthen, or to corroborate. -2 to stop, make fast. -3 to cheer up, console, comfort; Ś. 4. -4 To steel (the heart); Amaru. स्थिरीभू means 1 to become firm or steady. -2 to become calm or tranquil.) -Comp. -अङ्घ्रिपः the marshy date-tree. -अनुराग *a.* firm in attachment, constant in affection. -अपाय *a.* subject to constant decay. -आत्मन्, -चित्त, -चेतस्, -धी, -बुद्धि, -मति *a.* 1 firm-minded, steady in thought or resolve, resolute; न च योगविधेर्नवेतरः स्थिरधीरा परमात्मदर्शनात् R. 8. 22. -2 cool, calm, dispassionate. -आयति *a.* lasting long. -आयुस्, -जीविन् *a.* long-lived, lasting. (-*m.*) the silk-cotton tree (Mar. सांवरी). -आरम्भ *a.* firm in undertakings, persevering. -कर्मन् *a.* persevering in action; न नवः प्रभुरा फलोदयात् स्थिरकर्मा विरराम कर्मणः R. 8. 22. -कुट्टकः 1 a steady pulverizer. -2 a kind of common divisor (in algebra). -कुसुमः the Bakul tree. -गतिः the planet Saturn. -गन्धः the *Champaka* flower. (-न्धा) 1 the trumpet-flower. -2 the Ketakī plant. -छदः the birch tree. -छायः 1 a tree which gives shelter to travellers. -2 a tree (in general). -जिह्वः a fish. -जीवित *a.* long-lived. -जीविता the silk-cotton tree. -दंष्ट्रः 1 a snake. -2 Viṣṇu in his boar incarnation. -3 sound. -धामन् *a.* belonging to a strong race. -पत्रः the marshy date-tree. -पद *a.* firmly rooted. -पुष्पः 1 the *Champaka* tree. -2 the *Bakula* tree. -प्रतिज्ञ *a.* 1 persisting in an assertion, obstinate, pertinacious. -2 faithful to a promise. -प्रतिबन्ध *a.* firm in opposition, obstinate; Ś. 2. -प्रतिष्ठा fixed residence or abode. -फला a kind of gourd (Mar. कोहळा). -योनिः a large tree which gives shade and shelter. -यौवन *a.* ever youthful. (-नः) a kind of good or evil genius, a fairy. -रङ्गा indigo. -रागा a kind of curcuma (Mar. दारुहळद). -लिङ्ग *a.* having a a stiff virile organ. -वाच् *a.* one whose word may be trusted. -विक्रम *a.* taking firm strides. -श्री *a.* having

everlasting prosperity. **–सङ्गर** *a.* faithful to a promise, true, veracious. **–सौहृद** *a.* firm in friendship. **–स्थायिन्** *a.* remaining firm or steady, keeping perfectly still (as in meditation).

स्थिरतर *a.* More firm, fixed &c. **–रः** The Supreme Being.

स्थिरता, –त्वम् 1 Firmness, steadiness, stability. –2 Firm or vigorous effort, fortitude; उत्पक्ष्मणोर्नयनयोरुपरुद्धवृत्तिं बाष्पं कुरु स्थिरतया विरतानुबन्धम् Ś. 4. 14. –3 Constancy, firmness of mind. –4 Fixity. –5 Fearlessness.

स्थिरीकरणम्, स्थिरीकारः Corroboration, confirmation.

स्थिरीभावः Immovableness.

स्थुड् 6 P. (स्थुडति) To cover.

स्थुरिन् = स्थूरिन् q. v.

स्थूणा [स्था-नक् उदन्तादेशः पृषो॰ Tv.] स्थूणायसि स्मृता प्रतिमायां गृहस्तम्भे' इति विश्वः 1 The post or pillar of a house. –2 A post or pillar in general; स्थूणानिखननन्यायेन S. B.; किमर्थमाक्षेपः। दार्ढ्यार्थः। स्थूणानिखननवत् ŚB. on MS. 7. 2. 1. –3 An iron image or statue; छिन्नस्थूणं वृषं दृष्ट्वा विलापं च गवां भृशम् Mb. 12. 265. 2. –4 An anvil. –Comp. **–कर्णः** 1 a kind of military array. –2 a form of Rudra (named also शङ्कुकर्ण); स्थूणाकर्णमथो जालं शरवर्षमथोल्बणम् Mb. 3. 167. 33. **–निखननन्याय** see Appendix.

स्थूमः 1 Light. –2 The moon.

स्थूरः 1 A bull. –2 A man.

स्थूरिन् *m.* A pack-horse or bullock.

स्थूरीपृष्ठः A horse not yet ridden on; भित्त्वा घोणामायसेनाधिवक्षः स्थूरीपृष्ठो गार्ध्रपक्षेण विद्धः। Śi. 18. 22.

स्थूल् 10 Ā. To increase, to strengthen; L. D. B.

स्थूल *a.* (compar. स्थवीयस् superl. स्थविष्ठ) 1 Large, great, big, bulky, huge; बहुरपृशापि स्थूलेन स्थीयते बहिरश्मवत् Śi. 2. 78 (where it has sense 6 also); स्थूलहस्तावलेपान् Me. 14, 108; R. 6 28. –2 Fat, corpulent, stout. –3 Strong, powerful; स्थूलं स्थूलं श्वसिति K. 'breathes hard'. –4 Thick, clumsy. –5 Gross, coarse, rough (fig. also) as in स्थूलमानम् q. v. –6 Foolish, doltish, silly, ignorant. –7 Stolid, dull, thick-headed. –8 Not exact. –9 (In phil.) Material (opp. to सूक्ष्म). **–लः** The jack tree. **–ला** –1 Large cardamoms. –2 Scindaspus Officinalis (Mar. गजपिंपळी). –3 Cucumis Utilissimus (Mar. थोरकाकडी). **–लम्** 1 A heap, quantity. –2 A tent. –3 The summit of a mountain (कूट). –4 Sour milk, curds. –Comp. **–अन्त्रम्** the larger intestine near the anus. **–आस्यः** a snake. **–इच्छ** *a.* having immoderate desires. **–उच्चयः** 1 a large fragment of a crag or rock fallen from a mountain and forming an irregular mound. –2 incompleteness, deficiency, defect. –3 the middle pace of elephants; स्थूलोच्चयेनागमदन्तिकागताम् Śi. 12. 16. –4 an eruption of pimples on the face. –5 a hollow at the root of an elephant's tusks. **–कण्टकिका** the silk-cotton tree. **–कण्टा** the egg-plant. **–कन्दः** 1 a kind of esculent root. –2 red garlic. **–काय** *a.* fat, corpulent. **–काष्ठाग्निः** a tree-trunk or a large log of wood set on fire. **–क्षेडः, –क्ष्वेडः** an arrow. **–चापः** a large bow-like instrument used in cleaning cotton. **–तालः** the marshy date-tree. **–त्वचा** Gmelina Arborea (Mar. थोर शिवणी). **–दला** Aloe Perfoliata (Mar. कोरफड). **–धी, –मति** *a.* foolish, doltish. **–नालः** a kind of large reed. **–नास, –नासिक** *a.* thick-nosed. (**–सः, –कः**) a hog, boar. **–नीलः** a hawk, falcon. **–पटः, –टम्** coarse cloth. **–पट्टः** cotton. (**–ट्टम्**), **–पट्टाकः** coarse cloth. **–पाद** *a.* clubfooted, having swelled legs. (**–दः**) 1 an elephant. –2 a man with elephantiasis. **–प्रपञ्चः** the gross or material world. **–फलः** the silk-cotton tree. **–भावः** Bigness, grossness. **–भूत** *n.* pl. the five grosser elements (according to Sāmkhya phil.). **–मध्य** *a.* thick in the middle. **–मरिचम्** a kind of berry (कक्कोल). **–मानम्** rough or inexact calculation, gross or rough computation. **–मूलम्** a kind of radish. **–लक्ष, –क्ष्य** *a.* 1 munificent, liberal, generous; अकत्थनो मानयिता स्थूललक्ष्यः प्रियंवदः Mb. 3. 45. 10. –2 wise, learned. –3 inclined to recollect both benefits and injuries. –4 taking careless aim. **–लक्षिता** munificence, liberality. **–वल्कलः** the red Lodhra tree. **–विषयः** a gross or material object. **–शङ्खा** a woman having a large vulva. **–शरीरम्** the grosser or material and perishable body (opp. सूक्ष्म or लिङ्ग-शरीर q. v.) **–शाटकः (–कम्), शाट(टि)का, –शाटिः** a thick or coarse cloth. **–शीर्षिका** a small ant having a large head in proportion to its size. **–शोफ** *a.* greatly swollen. **–षट्पदः** 1 a large bee. –2 a wasp. **–सूक्ष्म** *a.* mighty and subtle (as the god). **–स्कन्धः** the *lakucha* tree. **–स्थूल** *a.* excessively thick. **–हस्तः** 1 an elephant's trunk; दिङ्नागानां पथि परिहरन् स्थूलहस्तावलेपान् Me. 14. –2 a large or coarse hand.

स्थूलक *a.* Large, big, huge, bulky. **–कः** A sort of grass or reed.

स्थूलता, –त्वम् 1 Largeness, bulkiness, bigness; कौटिल्यं कचसंचये प्रवचने मान्द्यं त्रिके स्थूलता (दृश्यते) Pt. 1. 190. –2 Dulness, stupidity. –3 (In phil.) Grossness.

स्थूलंभविष्णु, स्थूलंभावुक *a.* Liable to become large or stout; P. III. 2. 57.

स्थूलयति Den. P. To become big or stout, grow bulky or fat.

स्थूलिन् *m.* A camel.

स्थेमन् *m.* Firmness, stability, fixity, fixedness; द्राघीयांसः संहताः स्थेमभाजः Śi. 18. 33; न यत्र स्थेमानं दधुरतिभयभ्रान्तनयनाः Bv. 1. 32.

स्थेय *a.* [स्था-कर्मणि यत्] To be fixed or placed, to be settled or determined. **–यः** 1 A person chosen to settle a dispute (between two parties), an arbitrator, umpire, a judge; स्थेयाभ्यां गृध्रचक्राभ्यां वाचा संधिः कृतः क्षणात् H. 4. 1. –2 A domestic priest.

स्थेयस् *a.* (**–सी** *f.*) More firm, stronger; (compar. of स्थिर q. v.).

स्थेष्ठ *a.* Very firm, strongest; (superl. of स्थिर q. v.).

स्थैर्यम् [स्थिरस्य भावः ष्यञ्] 1 Firmness, stability, fixity, steadiness. –2 Continuance. –3 Firmness of mind, resolution, constancy; अमानित्वं ...... स्थैर्यमात्मविनिग्रहः Bg. 13. 7. –4 Patience. –5 Hardness, solidity. –6 Subduing the senses (जितेन्द्रियत्व); ततस्तस्य परिज्ञाय महास्थैर्यं महामुनेः Rām. 7. 30. 27. **–Comp. –ज** *a.* see स्थावर; मानुषाः स्थैर्यजाश्चैव पृथग्भोगा विशेषतः Mb. 13. 117. 18.

स्थोरिन् = स्थौरिन्.

स्थौणेयः, –स्थौणेयकः 1 A kind of perfume. –2 A carrot.

स्थौरम् 1 Firmness, strength, power. –2 A load sufficient for a horse or ass.

स्थौरिन् *m.* 1 A horse carrying burdens on his back, pack-horse. –2 A strong horse.

स्थौलक्ष्यम् Munificence, liberality; Ms. 7. 211.

स्थौल्यम् 1 Bigness, bulkiness, stoutness. –2 Dulness or density of intellect.

स्नवः Trickling, oozing, dripping.

स्नस् 1, 4 P. (स्नसति, स्नस्यति) 1 To inhabit. –2 To eject (as from the mouth), reject.

स्नसा A tendon, muscle.

स्ना 2 P. (स्नाति, स्नात) 1 To bathe, perform ablution; सस्नुः पयः पपुरनेनिजुरम्बराणि Śi. 5. 28; मृगतृष्णाम्भसि स्नातः. –2 To perform the ceremony of bathing at the time of leaving the house of one's spiritual preceptor. –3 To smear oneself with. *–Caus.* (स्नापयति-ते, स्नपयति-ते) 1 To cause to bathe, wet, moisten, sprinkle; (तोयैः) सतूर्यमेनां स्नपयाम्बभूवुः Ku. 7. 10; स्मितस्नपिताधरा Gīt. 12; U. 3. 23; Ki. 5. 44, 47; Śi. 2. 7; Me. 45. –2 To steep or soak in. –3 To weep for. *–Desid.* (सिस्नासति) To wish to bathe. –With अप to bathe after mourning. –नि to plunge deep into; *i. e.* to be perfect or thoroughly versed in; see निष्णात; कुतोऽपत्यस्नेहः कुटिलनयनिष्णातमनसाम् Māl. 2. 7.

स्नपन *a.* 1 Causing to bathe. –2 Used for bathing. **–नम्** 1 Sprinkling, washing. –2 Bathing, ablution; रेजे जनैः स्नपनसान्द्रतरार्द्रमूर्तिः Śi. 5. 57.

स्नपित *a.* Bathed, washed, sprinkled &c.

स्नयः 1 Bathing, ablution. –2 Lustration.

स्नात *p. p.* 1 Bathed, washed, purified by ablution; ततः शुक्लाम्बराः स्नातास्तरुणाः शतमष्ट च Mb. 7. 82. 8. –2 Versed in; मन्ये त्वां विषये वाचां स्नातमन्यत्र छान्दसात् Bhāg. 1. 4. 13. **–तः** 1 One whose course of holy study is over; वणिङ्मुनिनृपस्नाता निर्गम्यार्थान् प्रपेदिरे Bhāg. 10. 21. 49. –2 An initiated householder; cf. स्नातक. **–ता** =ऋतुस्नाता; तपसा द्योतितां स्नातां ददर्श भगवानृषिः Mb. 3. 97. 13.

स्नातकः 1 A Brāhmaṇa who has performed the ceremony of ablutiou which has to be performed on his finishing his first Āśrama (that of a Brahmachārin); राजस्नातकयोश्चैव स्नातको नृपमानभाक् Ms. 2. 139. –2 A Brāhmaṇa just returned from the house of his preceptor and become an initiated householder (गृहस्थ). –3 A Brāhmaṇa who is a *Bhikṣu* (beggar of alms) for any religious object; नवैतान् स्नातकान् विद्याद् ब्राह्मणान् धर्मभिक्षुकान् Ms. 11. 2. –4 Any man of the first three classes who is an initiated householder. **–Comp. –व्रतम्** the vows and duties of a स्नातक.

स्नात्रम् Bath, ablution.

स्नानम् [स्ना-भावे ल्युट्] 1 Bathing, washing, ablution, immersion in water; ततः प्रविशति स्नानोत्तीर्णः काश्यपः Ś. 4; न स्नानं न विलेपनं न कुसुमं नालंकृता मूर्धजाः (विभूषयन्ति पुरुषं) Bh. 2. 19. –2 Purification by bathing, any religious or ceremonial ablution. –3 The ceremony of bathing or anointing an idol. –4 Anything used in ablution. तोयक्रीडानिरतयुवतिस्नानतिक्तैर्मरुद्भिः Me. 35. –5 Cleansing, washing off. **–Comp. –अगारम्** a bath-room. **–कलशः, –कुम्भः** a jar containing lustral water. **–गृहम्** a bathroom; उत्थायावश्यकार्यार्थं ययौ स्नानगृहं नृपः Mb. 7. 82. 7. **–तीर्थम्** a sacred bathing place. **–तृणम्** Kuśa-grass. **–द्रोणी** a bathing tub. **–यात्रा** the festival held on the full-moon day in the month of Jyeṣṭha. **–वस्त्रम्** a bathing-garment; सकृत् किं पीडितं स्नानवस्त्रं मुञ्चेत् द्रुतं पयः H. 2. 104. **–विधिः** 1 the act of ablution. –2 the proper manner or rules of ablution. **–शाटी** bathing drawers.

स्नानीय *a.* [स्नानाय हितं छ] Fit or suitable for bathing or ablution, worn during bathing; स्नानीयवस्त्रक्रियया पत्रोर्णं वोपयुज्यते M. 5. 12. **–यम्** Water or any other article (such as unguents, perfumed powders &c.) proper for bathing; बलिक्रियावर्जितसैकतानि स्नानीयसंसर्गमनाप्नुवन्ति R. 16. 21.

स्नापकः A servant who bathes his master, or brings bathing-water for him; स्नापकाः काञ्चनैः कुम्भैः पूर्णैः समुपतस्थिरे Mb. 7. 82. 8.

स्नापनम् The act of causing to bathe, or attending a person while bathing; Ms. 2. 209.

स्नापित *p. p.* 1 Caused to bathe, attended on while bathed. -2 Immersed.

स्नास्यत् *m.* A student about to become a स्नातक; स्नास्यंस्तु गुरुणाज्ञप्तः शक्त्या गुर्वर्थमाहरेत् Ms. 2. 245.

स्नायुः [स्नाति शुध्यति दोषोऽनया स्ना-उण् Tv.] 1 A tendon, muscle, sinew; स्वल्पं स्नायुवसावशेषमलिनं निर्मांसमप्यस्थि गोः Bh. 2. 30. -2 The string of a bow. -3 An eruption on the skin of the extremities; also स्नायुक. -Comp. -अर्मन् *n.* a kind of disease of the eyes. -बन्धः a bowstring. -मर्मन् the joint of a sinew. -स्पन्दः pulse.

स्नायुकः See स्नायु.

स्नावः, -स्नावन् *m.* A tendon, muscle; मांसान्यस्य शकराणि किनाटं स्नाव तरिथरम् Bri. Up. 3. 9. 28.

स्नाविर *a.* With sinews; see अस्नाविर.

स्निद् 10 U. (स्नेटयति-ते) 1 To go. -2 To love, be in love.

स्निह् 4 P. (स्निह्यति, स्निग्ध) 1 To feel or have affection for, love, be fond of (with loc. of the person or thing that is loved or liked); किं नु खलु बालेऽस्मिन्नौरस इव पुत्रे स्निह्यति मे मनः Ś. 7; स च स्निह्यत्यावयोः U. 6 (where आवयोः may be genitive also). -2 To be easily attached. -3 To be pleased with, be kind to. -4 To be sticky, viscid, or adhesive. -5 To be smooth or bland. -*Caus.* (स्नेहयति-ते) 1 To make unctuous, anoint, besmear, lubricate. -2 To cause to love. -3 To dissolve, destroy, kill.

स्निग्ध *a.* [स्निह्-क्त] 1 Loving, affectionate, friendly, attached, tender; नादस्तावद्विकलकुररीकूजितस्निग्धतारः Māl. 5. 20. -2 Oily, unctuous, greasy, wetted with oil; उत्पश्यामि त्वयि तटगते स्निग्धभिन्नाञ्जनाभे Me. 61; स्निग्धवेणीसवर्णे 18; Śi. 12. 62; Māl. 10. 4. -3 Sticky, viscid, adhesive, cohesive. -4 Glistening, shining, glassy, resplendent; कनकनिकषस्निग्धा विद्युत् प्रिया न ममोर्वशी V. 4. 1; Me. 39; U. 1. 33; 6. 21. -5 Smooth, emollient. -6 Moist, wet. -7 Cooling. -8 Kind, soft, bland, amiable; प्रीतिस्निग्धैर्जनपदवधूलोचनैः पीयमानः Me. 16. -9 Lovely, agreeable, charming; स्निग्धगम्भीरनिर्घोषम् R. 1. 36; Me. 66; U. 2. 14; 3. 22. -10 Thick, dense, compact; स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु (चक्रे) Me. 1. -11 Intent, fixed, steadfast (as a gaze or look). -ग्धः 1 A friend, an affectionate or friendly person; विज्ञैः स्निग्धैरुपकृतमपि द्वेष्यतामेति कैश्चित् H. 2. 149; or स स्निग्धोऽकुशलान्निवारयति यः Subhāṣ.; Pt. 2. 171. -2 The red castor-oil plant. -3 A kind of pine. -ग्धम् 1 Oil. -2 Bee's-wax. -3 Light, lustre. -4 Thickness, coarseness. -5 Civet. -Comp. -जनः an affectionate or friendly person, a friend; स्निग्धजनसंविभक्तं हि दुःखं सह्यवेदनं भवति Ś. 3. -तण्डुलः a kind of rice of quick growth. -दृष्टि *a.* looking intently or with a fixed gaze. -पत्रः, -त्रा the jujube. -फला the ichneumon plant (Mar. मुंगूसवेल). -राजिः a kind of snake.

स्निग्धता, -त्वम् 1 Oiliness. -2 Blandness. -3 Tenderness, affection, love.

स्निग्धा Marrow.

स्नु 2 P. (स्नौति, स्नुत) 1 To drip, trickle, fall in drops, distil, drop, ooze or run out, leak out, -2 To flow, stream.

स्नुत *a.* Oozed, dropped, flowed &c; त्रिष्टुम्मांसात् स्नुतोऽनुष्टुब्जगत्यस्थ्नः प्रजापतेः Bhāg. 3. 12. 45.

स्नु *m., n.* 1 Table-land. -2 Top, surface (in general). (This word has no forms for the first five inflections and is optionally substituted for सानु after acc. dual).

स्नु *f.* A sinew, tendon, muscle.

स्नुघ्निका Natron, mineral alkali.

स्नुषा A daughter-in-law; ससुपास्यत पुत्रभोग्यया स्नुषयेवाविकृतेन्द्रियः श्रिया R. 8. 14; 15. 72.

स्नुस् 4 P. (स्नुस्यति) 1 To disappear, become invisible. -2 To take, accept.

स्नुह् 4 P. (स्नुह्यति, स्नुग्ध or स्नूढ) To vomit.

स्नुह्, स्नुहा, -हिः *f.*, -ही The milk-hedge plant. [Raghunandana, the author of Kṛityatattva (Jīvānanda's ed. of Smṛititattva vol. II, 1895) quotes a verse from the Devipurāṇa in connection with the worship of the goddess Manasā to get rid of the fear of snake-bite (cf. Dr. Kane's History of Dharma-śāstra, vol. V. p. 125). He explains स्नुही as सिजुवृक्षः. The botanic name of the tree is Euphorbia Nerifolia (Mar. निवडुंग). It is a plant from the stem of which a sticky substance oozes out.]

स्नेहः [स्निह्-घञ्] 1 Affection, love, kindness, tenderness; स्नेहदाक्षिण्ययोर्योगात् कामीव प्रतिभाति मे V. 2. 4 (where it has sense 6 also); अस्ति मे सोदरस्नेहोऽप्येतेषु Ś. 1. -2 Oiliness, viscidity, unctuousness, lubricity (one of the 24 Guṇas according to the Vaiśeṣikas) -3 Moisture; तृष्णासंजननं स्नेह एष तेषां पुनर्भवः Mb. 12. 218. 33. -4 Grease, fat, any unctuous substance. -5 Oil; निर्विष्टविषयस्नेहः स दशान्तमुपेयिवान् R. 12. 1; Pt. 1. 82 (where the word has sense 1 also), 221; R. 4. 75. -6 Any fluid of the body, such as semen. -Comp. -अक्त *a.* oiled, lubricated, greased. -अङ्कनम् a mark of affection. -अनुवृत्तिः *f.* affectionate or friendly intercourse. -आशः a lamp. -कुम्भः an oil-vessel. -केसरिन् castor-oil. -छेदः, -भङ्गः breach or loss of friendship. -पक्व *a.* dressed with oil. -पानम् drinking oil (as a medicine). -पूर्वम् *ind.* affectionately. -प्रवृत्तिः *f.* flow or course of love; त्वय्यस्याः कथमप्यबान्धवकृतां स्नेहप्रवृत्तिं च ताम् Ś.

4. 17. -प्रसरः, -प्रस्रवः effusion of love. -प्रिय° a. fond of oil. (-यः) a lamp. -बीजः the Piyāla tree. -भाण्डम् an oil-vessel. °जीविन् an oilman. -भूः phlegm. -भूमिः f. 1 anything yielding oil. -2 an object of love or affection, beloved person. -रक्तः sesamum. -रसनम् the mouth. -रेकभू m. the moon. -वरम् fat. -वस्तिः f. injection of oil, an oily enema. -विद्धः the Devadāra tree. -विमर्दित a. anointed with oil. -व्यक्तिः f. manifestation of love, display of friendship; (भवति) स्नेहव्यक्तिश्चिरविरहजं मुञ्चतो बाष्पमुष्णम् Me. 12. -संभाषः kind conversation, friendly talk, chat. -सार a having oil for its chief ingredient.

स्नेहन् m. 1 A friend. -2 The moon. -3 A kind of disease.

स्नेहन a. [स्निह्-णिच् ल्यु ल्युट् वा] 1 Anointing, lubricating. -2 Destroying. -नम् 1 Anointing, unction, rubbing or smearing with oil or unguents. -2 Unctuousness. -3 An unguent, emollient.

स्नेहल a. 1 Fond of. -2 Tender.

स्नेहित p. p. 1 Loved. -2 Kind, affectionate. -3 Anointed, lubricated. -तः A friend, a beloved person.

स्नेहिन् a. (-नी f.) [स्नेह-णिनि] 1 Attached, affectionate, friendly. -2 Oily, unctuous, fat. -m. 1 A friend. -2 An anointer, a smearer. -3 A painter.

स्नेहुः 1 The moon. -2 A kind of disease. -3 A friend; Uṇ. 1. 10.

स्नै 1 P. (स्नायति) To dress, wrap round, envelop.

स्नैग्ध्यम् 1 Unctuousness, oiliness, lubricity. -2 Tenderness, fondness. -3 Smoothness, blandness.

स्पन्द् 1 Ā. (स्पन्दते, स्पन्दित) 1 To throb, palpitate; अस्पन्दिष्टाक्षि वामं च Bk. 15. 27; 14. 83. -2 To shake, tremble, quiver. -3 To go, move; स्पन्दन्ति वै तनुभृतामजशर्वयोश्च Bhāg. 12. 8. 40. -4 To come suddenly to life.

स्पन्दः [स्पन्द्-घञ्] 1 Throbbing, palpitation. -2 Vibration, tremor, motion; मनो मन्दस्पन्दं बहिरपि चिरस्यापि विमृशन् Bh. 3. 51.

स्पन्दनम् [स्पन्द्-ल्युट्] 1 Throbbing, pulsation, palpitation, quivering; वामाक्षिस्पन्दनं सूचयित्वा Mal. 1; so अधर°, बाहु°, शरीर° &c. -2 Tremor, vibration. -3 The quickening of a child in the womb. -4 Rapid motion, going.

स्पन्दित p. p. [स्पन्द्-क्त] 1 Throbbed, quivered. -2 Gone. -तम् A pulsation, throb, palpitation. -2 Activity (of the mind).

स्पन्दोलिका Swinging backwards and forwards, rocking on a swing (a kind of game); Bhāg. 10. 18. 15 (v. l.).

स्पर्ध् 1 Ā. (स्पर्धते) 1 To contend or vie with, emulate, rival, compete, be equal with; अस्पर्धिष्ट च रामेण Bk. 15. 65; कस्तैस्सह स्पर्धते Bh. 2. 16. -2 To challenge, defy, bid defiance to.

स्पर्ध a. Emulous, envious.

स्पर्धनम् 1 Competition, emulation. -2 Envy, jealousy.

स्पर्धा [स्पर्ध्-अ] 1 Emulation, rivalry, competition; आत्मनस्तु बुधैः स्पर्धा शुद्धधीर्बहुमन्यत. -2 Jealousy, envy. -3 Defiance. -4 Equality with.

स्पर्धित p. p. 1 Emulating, contending. -2 Challenged, defied.

स्पर्धिन् a. (-नी f.) 1 Rivalling, emulating, competing, vying with; तवाधरस्पर्धिषु विद्रुमेषु R. 13. 13; 16. 62. -2 Emulous, envious. -3 Proud. -m. A competitor, an equal.

स्पर्ध्य a. 1 Desirable. -2 Valuable; शयनं तत्र संक्लृप्तं स्पर्ध्यास्तरणसंवृतम् Mb. 1. 47. 7.

स्पर्श् 10 Ā. (स्पर्शयते) 1 To take, take hold of, touch. -2 To unite, join. -3 To embrace, clasp.

स्पर्शः 1 [स्पर्श्, स्पृश् वा-घञ्] Touch, contact (in all senses); स्पर्शान् कृत्वा बहिर्बाह्यांश्चक्षुश्चैवान्तरे भ्रुवोः Bg. 5. 27; तदिदं स्पर्शक्षमं रत्नम् Ś. 1. 28; 2. 7. -2 Contact (in astr.). -3 Conflict, encounter. -4 Feeling, sensation, the sense of touch. -5 The quality of touch or tangibility, touch, the object or विषय of skin (त्वच्); स्पर्शगुणो वायुः T. S.; स्पर्शनं स्पर्शती स्पर्शान् बुद्धिर्विक्रियतेऽसकृत् Mb. 12. 285. 20. -6 That which affects or influences, affection, seizure. -7 Disease, illness, disorder, distemper. -8 A consonant of any of the five classes of letters (from क् to म्); कादयो मान्ताः स्पर्शाः; स्पर्शस्तस्याभवज्जीवः स्वरो देह उदाहृतः Bhāg. 3. 12. 46. -9 A gift, donation, presentation. -10 Air, wind. -11 The sky. -12 Sexual union; स्त्रीपुंसयोः संप्रयोगे स्पर्शः कस्याधिको भवेत् Mb. 13. 12. 1. -13 A secret spy. -र्शा An unchaste woman. -Comp. -अज्ञ a. senseless, insensible. -अनुकूल a. pleasant to the touch, cooling. -आनन्दा an *apsaras*. -इन्द्रियम् the organ or sense of touch. -उदय a. followed by a consonant. -उपलः, -मणिः a kind of jewel considered to be the same as 'philosopher's stone'. °मणिप्रभवम् gold; L. D. B. -क्लिष्ट a. painful to the touch. -क्षम a. capable of touch, tangible. -गुण a. having the quality of tangibility (as air); बलवाञ्जायते वायुः स वै स्पर्शगुणो मतः Ms. 1. 76. -तन्मात्रम् the subtile element of tangibility. -द्वेषः sensitiveness to touch. -यज्ञः an offering consisting in the mere touch of the things offered; स्पर्शयज्ञं करिष्यामि विधिरेष सनातनः Mb. 14. 92. 19. -रसिक a. sensual, lustful. -लज्जा, -संकोचपर्णिका the sensitive plant (Mar. लाजाळू). -वेद्य a. to be apprehended by the sense of

touch. **–संचारिन्** *a.* contagious, infectious. **–स्नानम्** ablution at the entrance of the sun or moon into an eclipse. **–स्पन्दः, –स्यन्दः** a frog.

स्पर्शन *a.* (–नी *f.*) [स्पर्श्-स्पृश्-वा ल्युट्] 1 Touching, handling. –2 Affecting, influencing. **–नः** Air, wind. **–नम्** 1 Touching, touch, contact. –2 Sensation, feeling. –3 Sense or organ of touch; Bg. 15. 9. –4 A gift, donation.

स्पर्शनकम् A term used in Sāṁkhya philosophy for the 'skin.'

स्पर्शवत् *a.* 1 Tangible. –2 Soft, soft or agreeable to the touch; भूर्जत्वचः स्पर्शवतीर्दधानाः Ku. 1. 55.

स्पर्शिक *a.* Tangible, perceptible.

स्पर्शित *a.* Given, donated; ज्ञात्वा तपसि सिद्धिं च पत्न्यर्थं स्पर्शिता तदा Rām. 7. 30. 27 (com. स्पर्शिता भार्यात्वेन दत्ता).

स्पर्ष्ट् *m.* A distemper, disorder of the body, disease.

स्पर्ष् 1 Ā. (स्पर्षते) To become wet or moist.

स्पश् 1 U. (स्पशति-ते) 1 To obstruct. –2 To undertake, perform. –3 To string together. –4 To touch. –5 To see, behold, perceive clearly, spy out, espy.

स्पशः [स्पश्-अच्] 1 A spy, a secret emissary or agent; स्पशे शनैर्गतवति तत्र विद्विषाम् Śi. 17. 20; Mu. 3. 13; see अपस्पश also. –2 Fight, war, battle. –3 One who fights with savage animals (for reward), or the fight itself.

स्पष्ट *a.* [स्पश्-क्त नि० इडभावः] 1 Distinctly visible, evident, clearly perceived, clear, plain, manifest; स्पष्टे जाते प्रत्यूषे K. 'when it was broad day-break'; स्पष्टाकृतिः R. 18. 30; स्पष्टार्थः &c. –2 Real, true. –3 Full-blown, expanded. –4 One who sees clearly. **–ष्टम्** *ind.* 1 Clearly, distinctly, plainly. –2 Openly, boldly. (स्पष्टीकृ means 'to make clear or distinct', explain, elucidate.) **–Comp. –अक्षर** *a.* distinctly spoken. **–अर्थ** *a.* intelligible, clear. **–गर्भा** a woman who shows evident signs of pregnancy. **–प्रतिपत्तिः** *f.* distinct notion, clear perception. **–भाषिन्, –वक्तृ** *a.* plain-spoken, outspoken, candid.

स्पष्टयति Den. P. To make clear, explain, elucidate.

स्पष्टीकरणम् Making clear or intelligible.

स्पष्टीकृतिः Rectification, correction.

स्पृ 5 P. (स्पृणोति) 1 To deliver or extricate from. –2 To gratify. –3 To grant, bestow; स मेन्द्रो मेधया स्पृणोतु T. Up. 1. 4. 1. –4 To protect. –5 To live.

स्पृक्का Trigonella Corniculata (पिण्डका).

स्पृध् *m.* A rival, enemy; तयोः स्पृधोस्तिग्मगदाहताङ्गयोः Bhāg. 3. 18. 19. *–f.* Contest, fight.

अनन्यलभ्यः शब्दार्थः The meaning of a word is that which cannot be known from any other source (such as implication etc.). cf. स एव हि शब्दस्यार्थो यः प्रकारान्तरेण न लभ्यते। अनन्यलभ्यः शब्दार्थ इति न्यायात्। अत एव न गङ्गापदस्य तीरमर्थः। लक्षणयैव प्रतिपत्तिसंभवात्। मीमांसान्यायप्रकाश. यः शब्दो यत्र वृद्धैरसति वृत्यन्तरे प्रयुज्यते स तस्य वाचको यथा स्वर्गशब्दः सुखविशेषे प्रयुज्यमानस्तस्य वाचकः । कुसुमाञ्जलि.

अनारभ्याधीतविधिन्यायः The maxim of the injunctions (such as यस्य खादिरः स्रुवो भवति स च्छान्दसामेव रसेनावद्यति, सरमा अस्याहुतयो भवन्ति । यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोति । etc.) studied or taught or read without reference to any particular subject. These विधि are to be construed with प्रकृत्यर्थ alone (तस्मात् प्रकृत्यर्थोऽनारभ्यविधिः ।).

अनुवृत्तिन्यायः The maxim of service, obedience or repetition. cf. सिंहो बली द्विरदशूकरमांसभोक्ता संवत्सरेण कुरुते रतिमेकवारम् । पारावतः खरशिलाकणभोजनोऽपि कामीति नित्यमनुवृत्तिरिहापि हेतुः ॥

अन्तरङ्गबहिरङ्गयोरन्तरङ्गं बलीयः The rule which proves that out of the proximate (closely related) and the remote (distantly related) the former is stronger. Read : 'तत् कस्य हेतोः ? अत्र हि पूर्वः प्रत्ययो भवेत् । ये धर्मा अपूर्वार्थाः, ते साक्षादपूर्वेणासंबध्यमानास्तदङ्गेषु विज्ञायन्ते । अंतस्तत्र बुद्धिरपूर्वासंभवेन निवर्तमाना अङ्गेषु प्रवर्तमाना अन्तरङ्गे तावदापतति । ततो व्यवहिते बहिरङ्गे । यत्र च पूर्वमापतति तत्रैव तिष्ठति, तदतिक्रमे कारणाभावात्' । ŚB. on MS. 12. 2. 11.

अन्तर्दीपिकान्यायः The maxim of a lamp in a central position. The maxim applies to a thing which serves a double purpose. cf. 'नित्यं सर्वदा । नित्यं सत्येन नित्यं तपसा नित्यं सम्यग्ज्ञानेनेति सर्वत्र नित्यशब्दोऽन्तर्दीपिकान्यायेनानुषक्तव्यः' । Śaṁkara on Muṇḍ. 3. 1. 5. cf. देहलीदीपन्याय and मध्यदीपन्याय.

अन्धकवर्तकीयन्यायः The maxim of the blind man and the quail. This maxim, along with अजाकृपाणीय, काकतालीय etc., is used to express a wholly fortuitous occurrence. 'अन्धकस्य वर्तका च अन्धकवर्तकम्। अन्धकस्य वर्तकाया उपर्यतर्कितः पादन्यास उच्यते। तत्तुल्यमन्धकवर्तकीयम्' com. on G. M. 3. 195; संसारसागरमिमं भ्रमता नितान्तं जीवेन मानवभवः समवापि दैवात्। तत्रापि यद्भुवनमान्यकुले प्रसूतिः सत्संगतिश्च तदिहान्धकवर्तकीयम्' । यशस्तिलक 2. 153.

अन्धगजन्यायः The maxim of blind men and an elephant. Several blind men, each one touching the particular limb of an elephant, tried to form an idea of the shape of that elephant. As none of them could get the entire view of the elephant none could form a comprehensive judgment of the shape of the animal. Their judgment was bound to be incomplete, defective and lop-sided. The maxim illustrates the divergence of views held by the ignorant about God.

अन्धगोलाङ्गूलन्यायः The maxim of the blind man and the cow's tail. The maxim is used to illustrate how the guillible are often waylaid by the wicked. A wicked man found a blind man wandering helplessly. The wicked man expressing sympathy for the blind, deprived him of his valuables and putting a cow's tail into his hand told him to follow her. The result is anybody's guess. 'यदि चाज्ञस्य सतोः मुमुक्षोरचेतनमात्मानमात्मेत्युपदिशेत् प्रमाणभूतं शास्त्रं स श्रद्दधानतयान्धगोलाङ्गूलन्यायेन तदात्मदृष्टिं न परित्यजेत् तद्व्यतिरिक्तं चात्मानं न प्रतिपद्येत तथा सति पुरुषार्थाद् विहन्येतानर्थं च ऋच्छेत्। Ś. B. on Br. Sūt. 1. 1. 7.

अन्धदर्पणन्यायः The maxim of a mirror for a blind man. The maxims like अरण्यरोदनन्याय, मूर्खसेवनन्याय, जलताडनन्याय etc. belong to the class of this maxim. The maxim is used to illustrate the vainness of efforts. यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किम् । लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति ॥ H. 3. 115.

अन्धपरंपरान्यायः The maxim of a continuous series of blind men. The maxim is used in those cases where people blindly or thoughtlessly follow others, not caring to see whether their doing so would not be a leap in the dark. cf. अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितंमन्यमानाः । दन्द्रम्यमाणाः परियन्ति मूढा अन्धेनैव नीयमाना यथान्धाः॥ Kaṭh. 1. 2. 5; अनादित्वेऽपि अन्धपरंपरान्यायेनाप्रतिष्ठैवानवस्था व्यवहारलोपिनी स्यान्नाभिप्रायसिद्धिः । Ś. B. on Br. Sūt. 2. 2. 30.

अन्योन्याश्रयन्यायः The rule of mutual interdependence. The causes which are mutually dependent lead to no sound result in science. A vessel tied to another vessel leads to the safety of neither.

अन्वयव्यतिरेकन्यायः The rule of presence and absence; positive and negative assertion. cf. All A is B. All not-B is not-A. यत्सत्त्वे यत्सत्त्वमन्वयः, यदभावे यदभावो व्यतिरेकः । अन्वयेन व्यतिरेकेण च व्याप्तिमिति हेतावयं प्रवर्तते । यथा वह्नौ साध्ये धूमवत्त्वम् । यत्र यत्र धूमस्तत्र तत्राग्निरित्यन्वयव्याप्तिः । यत्र

बहिर्नास्ति नत्र धूमोऽपि नास्तीति व्यतिरेकव्याप्तिः, यथा महानसादौ। —लौ. न्याय; आकृतिज्ञानसत्त्वे व्यक्तिज्ञानम्, आकृतिज्ञानाभावे व्यक्तिज्ञानाभाव इति आकृतिरेव शब्दार्थः, न व्यक्तिः। एवं प्रीतिसत्त्वे स्वर्गशब्दप्रयोगः, प्रीत्यभावे न इति प्रीतिरेव स्वर्गशब्दवाच्या। —मी. को.

अपवादैरुत्सर्गा बाध्यन्ते General rules are set aside by special ones. cf. Mbh. 2. 1. 24; लब्धप्रतिष्ठाः प्रथमं यूयं किं बलवत्तरैः। अपवादैरिवोत्सर्गाः कृतव्यावृत्तयः परैः॥ Ku. 2. 27; यः कश्चन रघूणां हि परमेकः परंतपः। अपवाद इवोत्सर्गं व्यावर्तयितुमीश्वरः॥ R. 15. 7.

अपन्थानं तु गच्छन्तं सोदरोऽपि विमुञ्चति A co-uterine brother leaves a person following a wrong (dangerous, impious) path. The general golden rule is महाजनो येन गतः स पन्थाः।. One who does not follow this rule becomes a heretic, an atheist. cf. यान्ति न्यायप्रवृत्तस्य तिर्यञ्चोऽपि सहायताम्। अपन्थानं तु गच्छन्तं सोदरोऽपि विमुञ्चति॥ Ram.; A. R.; अपथे पदमर्पयन्ति हि श्रुतवन्तोऽपि रजोनिमीलिताः॥ R. 9. 74.

अपराह्णच्छायान्यायः The maxim of the shadow in the latter half of the day. In the afternoon the shadow of the sun is underneath our feet while towards evening it goes on lengthening. The case is quite the reverse from the sunrise till midday. आरम्भगुर्वी क्षयिणी क्रमेण लघ्वी पुरा वृद्धिमती च पश्चात्। दिनस्य पूर्वार्धपरार्धभिन्ना छायेव मैत्री खलसज्जनानाम्॥ The maxim is used to illustrate the nature of friendship of the good and the wicked.

अप्राप्ते शास्त्रमर्थवत् Scripture becomes purposeful when an injunction has not been enjoined by any other scriptural injunction. तथाहि—'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इति श्रुतिः। अत्र श्रोतव्य इत्यनुवादः। (स्वाध्यायोऽध्येतव्यः इति) अध्ययनविधिना साङ्गस्य स्वाध्यायस्य ग्रहणे अधीतवेदस्य पुरुषस्य प्रयोजनवदर्थदर्शनात्। तन्निर्णयाय स्वरसत एव श्रवणे प्रवर्तमानतया तस्य प्राप्तत्वात्। मन्तव्य इति चानुवादः श्रवणप्रतिष्ठार्थत्वेन मननस्यापि प्राप्तत्वात्। लौ. न्याय.; प्रमाणान्तरसिद्धस्य न शास्त्रविषयत्वम्। सिद्धान्तचन्द्रिका 1. 1. 1.

अब्धिफेनादिन्यायः The maxim of the superimposition of the name and form of foam etc. on the ocean. cf. सृष्टिर्नाम ब्रह्मरूपे सच्चिदानन्दरूपवस्तुनि। अब्धौ फेनादिवत् सर्वनामरूपप्रसारणम्। न्यायरूपदृष्टान्तमाह — अब्धौ फेनादिवदिति। अब्धौ अवस्थितताया विक्षेपात्मिकाया मायायास्तत्रैव फेनतरङ्गबुद्बुदाकारेण विवर्तनं सृष्टिशब्देनोच्यते; तथात्रापीति भावः। —लौ. न्याय.; आवर्तबुद्बुदतरङ्गमयान् विकारानम्भो यथा सलिलमेव हि तत् समस्तम्। U. 3. 47. The maxim is used to illustrate the विवर्तवाद of the Advaita Vedānta.

अभ्यन्तरे हि समुदायेऽवयवे इति न्यायः The maxim of the application to the part when it is applicable to the whole thing. When a tree moves by the force of wind the branches of it also move without fail. समुदायेषु हि शब्दाः प्रवृत्ता अवयवेष्वपि वर्तन्ते। तद्यथा, पूर्वे पञ्चालाः, उत्तरे पञ्चालाः, तैलं भुक्तम्, घृतं भुक्तम्, शुक्लः, नीलः, कृष्ण इति। एवमयं समुदाये व्याकरणशब्दः प्रवृत्तोऽवयवेऽपि प्रवर्तते। लौ. न्याय.

अभ्यर्हितं पूर्वम् That which is more worthy should come first. The origin of the maxim is in Mb. 2. 2. 34. (अभ्यर्हितं पूर्वं निपततीति वक्तव्यम्। मातापितरौ श्रद्धामेधे।) However, it is extended to other fields. cf. ऋग्वेदस्य प्राथम्येन सर्वत्राम्नातत्वादभ्यर्हितं पूर्वमिति न्यायेनाभ्यर्हितत्वात् तद्व्याख्यानमादौ युक्तम्। Sāyaṇa's Intro. to Ṛv.; अभ्यर्हितं पूर्वमिति न्यायमाश्रित्य तन्त्रप्रसंगप्रतिपादकयोरेकादशद्वादशाध्याययोः पूर्वोत्तरभाव उपपादितः। J. N. V. 12.

अभ्युपगमसिद्धान्तन्यायः The rule of an implied axiom or a dogmatic corollary. This is an admitted proposition in the न्यायदर्शन. A corollary, though not explicitly stated, follows the statement of aphorism so as to render a demonstration of the corollary superfluous.

अम्बुनि मज्जन्त्यलाबूनि ग्रावाणः प्लवन्ते Gourds sink in water, but stones float. This maxim is used to illustrate an obvious absurdity which is opposed to the direct proof (प्रत्यक्षप्रमाण). cf. मज्जन्त्यलाबूनि शिलाः प्लवन्ते मुह्यन्ति नावोऽम्भसि शश्वदेव। Mb. 2. 66 11; एवंजातीयकं प्रमाणविरुद्धं वचनमप्रमाणम्। अम्बुनि मज्जन्त्यलाबूनि ग्रावाणः प्लवन्त इति यथा। ŚB. on MS. 1. 1. 5; 4. 3. 16.

अयमपरो गण्डस्योपरि स्फोटः Here is another boil on the top of a previous one! An illustration of difficulty upon difficulty, another evil to add to the first. This is a proverbial phrase to express the sense of the English proverb 'to add misery to misfortune'. cf. तदो गंडस्स उवरि पिंडओ संवुत्तो। Ś. 2; Mu. 5; विद्धशालभञ्जिका 1. The maxim stands for a series of misfortunes (दुःखपरंपरा).

अयस्कान्तन्यायः The maxim illustrates as to how the inactive, passive पुरुष is drawn into activity. अयमुदासीनत्वे कर्मप्रवर्तकत्वविवक्षायामवतरति। यथा कूटस्थोऽध्यक्षोऽयस्कान्तकल्पः प्रवर्तकः सन् चराचरं जगदुत्पादयति, तथा प्रकृतेऽपि बोध्यम्। लौ. न्याय. Iron is inactive but it is drawn towards itself by the magnet.

अयाचितमण्डनन्यायः The favourites of God, though penniless, get wealth due to God's grace. अजगरप्रवर्तनवद् याच्ञां विनैव लब्धं वस्तुविशेषमयाचितमित्युच्यते।... अयाचितं च तन्मण्डनं चेति समासः। यथा ईश्वरसुहृदः स्वयं निर्धना अपि तदीयेन धनेन फलभाजः। तद्वद् यत्र व्यवहारस्तत्रास्य प्रवृत्तिः। लौ. न्याय.

अरण्यचन्द्रिकान्यायः The maxim of the moonlight in the forest. It illustrates the uselessness of an object of enjoyment without the presence of an enjoyer. निनिन्द रूपं हृदयेन पार्वती प्रियेषु सौभाग्यफला हि चारुता। Ku. 5. 1; स्त्रीणां प्रियालोकफलो हि वेषः।

अरण्यरोदनन्यायः The simile of crying in the wilderness. There is no person in wild region to pay attention to the wailing cry of a bereaved person, none to console or sympathise; hence it becomes useless. cf. अन्धदर्पणन्याय, ऊषरवृष्टिन्याय etc. अरण्यरुदितं कृतं शवशरीरमुद्वर्तितं स्थले कमलरोपणं सुचिरमूषरे वर्षितम्। श्वपुच्छमवनामितं बधिरकर्णजापः कृतः कृतान्धमुखमण्डना यदबुधो जनः सेवितः॥ Pt.

अरुन्धतीप्रदर्शनन्यायः The maxim of pointing out of the star अरुन्धती. It is used to illustrate the principle

of gradual instruction, after having sifted the unimportant things. यथारुन्धतीं दिदर्शयिषुस्तत्समीपस्थां स्थूलां ताराममुख्यां प्रथममरुन्धतीति ग्राहयित्वा तां प्रत्याख्याय पश्चादरुन्धतीमेव ग्राहयति तद्वन्नायमात्मेति ब्रूयात्। Ś. B. on Br. Sūt. 1. 1. 8; 1. 1. 12.

अर्थवशाद्विभक्तिविपरिणामः The rule regarding the change of case taking into consideration the sense of a sentence. Similarly we have to resort to लिङ्गविपरिणाम, वचनविपरिणाम.

अर्थी समर्थो विद्वानधिक्रियते This is akin to अधिकारंन्याय. शास्त्रं हि अविशेषप्रवृत्तमपि मनुष्यानेवाधिकरोति शक्तत्वादर्थित्वादपर्युदस्तत्वादुपनयनादिशास्त्राच्चेति वर्णितमेतदधिकारलक्षणे। Ś. B. on Br. Sūt. 1. 3. 25.

अर्धकुक्कुटीन्यायः A butcher wishes to have a half of hen for cooking, while the other half he wants to be in tact for laying eggs. But this desire of the butcher will never be realized. You cannot have usufruct and growth by multiplication simultaneously. One cannot eat the cake and have it.

अर्धजरतीयन्यायः The maxim of the semi-senile woman. यथा स्त्री न तरुणी श्लथस्तनत्वात् कृष्णकेशत्वान्न जरती वक्तुं शक्यते तद्वत् सिद्धासिद्धं प्रयोजनम्। G. M. 3. 195. "Action of indeterminate character; speech vague and indefinite; a proceeding void of learning or bearing." Molesworth. You must either accept a thing in toto or reject it in toto; you cannot have a half-way house. cf. इति विकारार्थे मयट्प्रवाहे सत्यानन्दमय एवाकस्मादर्धजरतीयन्यायेन कथमिव मयटः प्राचुर्यार्थत्वं ब्रह्मविषयत्वं चाश्रीयत इति। Ś. B. on Br. Sūt. 1. 1. 19; 1. 2. 8; यत्र सर्वत्यागे ग्रहणे वा प्रसक्ते निर्युक्तिकमेकांशोपादानमंशान्तरत्यागश्च क्रियते, तत्रायं न्यायोऽवतरतीति। यथा जरती वृद्धा स्त्री, तस्याः पतिस्तदर्धं मुखमात्रं गृह्णाति ह्यवयवान्तरं त्यजति इति युक्तिशून्यम्, तथा य ईशवचनत्वेनागमप्रामाण्यमुपगच्छन्ति तेषां बुद्धवचसामपि प्रामाण्यप्रसंगो वेदस्यापि वाप्रामाण्यापत्तिः। यदि वा ईशवचनत्वसाम्येऽपि वेदस्य प्रामाण्यमप्रामाण्यं च बुद्धवचसामङ्गीक्रियते तदेतदपि युक्तिशून्यमिति भावः। लौ. न्याय.

अर्धवैशसन्यायः The simile of slaying of one half (of a body, while the other half is kept alive!). The maxim is used to illustrate absurdity, contradiction or incongruity; naturally it is akin, in some respects, to अर्धजरतीयन्याय. cf. विधिना कृतमर्धवैशसं ननु मां कामवधे विमुञ्चता। अनपायिनि संश्रयद्रुमे गजभग्ने पतनाय वल्लरी॥ Ku. 4. 31; अविरोधे श्रुतिमूलं न मूलान्तरसंभवः। विरोधे त्वन्यमूलत्वमिति स्यादर्धवैशसम्। तन्त्रवार्तिक.

अवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसी This rule is proved with the help of रथकारन्याय (वर्षासु रथकारोऽग्नीन् आदधीत।). cf. लब्धात्मिका हि समुदायप्रसिद्धिरवयवप्रसिद्धिं बाधते तस्यास्त्वात्मलाभो यत्र प्रमाणान्तरेण पूर्वानुभूतावयवार्थरहितेऽर्थे शब्दप्रयोगो दृश्यते। यथा अश्वकर्णत्वरहिते वृक्षेऽश्वकर्णशब्दस्य। तन्त्र. 1. 4. 11. As a parallel illustration, in the English word, cockroach, we have neither a cock nor a roach!

अशक्तोऽहं गृहारम्भे शक्तोऽहं गृहभञ्जने I am too weak to construct a house, but I am well able to destroy one. This proverbial sentence is found in Dhuṇḍirāja's commentary on Mu. 3. 11; cf. also घातयितुमेव नीचः परकार्यं वेत्ति न प्रसाधयितुम्। पातयितुमेव शक्तिर्नाखोरुद्धर्तुमन्नपिटम्॥ Pt. 1. 363.

अशोकवनिकान्यायः The maxim of the grove of Aśoka tree. Rāvaṇa kept Sītā in the grove of Aśoka trees, but it is not easy to account for his preference of that particular grove to any other one; so when a man finds several ways of doing a thing, any one of them may be considered as good as another, and the preference of any particular one cannot be accounted for.

अश्मलोष्टन्यायः The maxim of the stone and clod of earth. A clod of earth may be considered to be hard as compared with cotton, but is soft as compared with its inferiors, but sinks into insignificance when compared with its betters. The maxim is also used to denote the relative importance of two things, though absolutely both may be bad; *e.g.* गोपालपरशुरामौ उभावपि अतीव दुर्मेधसौ। किं तु अश्मलोष्टन्यायेन गोपालः परशुरामाद्वरीयान्। cf. Mar. 'दगडापेक्षां वीट मऊ'; पाषाणेष्टकन्याय.

अस्त्रमस्त्रेण शाम्यति A weapon is silenced by a weapon. The maxim is perhaps analogous to the saying "Diamond cuts diamond", or, "Set a thief to catch a thief". It occurs in Sureśvara's नैष्कर्म्यसिद्धि 1. 81; cf. विषं विषेण व्यथते वज्रं वज्रेण भिद्यते। गजेन्द्रो दृष्टसारेण गजेन्द्रेणैव बध्यते॥ नीतिसार 8. 67

अस्नेहदीपन्यायः The simile of a lamp without oil (that is, from which the oil has burnt out). cf. तत्र वर्षसहस्राणि निर्विकल्पसमाधिना। दश स्थित्वा शशामासावात्मन्यस्नेहदीपवत्॥ योगवासिष्ठ 2. 1. 44; निर्विष्टविषयस्नेहः स दशान्तमुपेयिवान्। आसीदासन्ननिर्वाणः प्रदीपार्चिरिवोषसि॥ R. 12. 1.

अहिकुण्डलन्यायः The maxim of the snake and its coils. Viewed as a whole the snake is one, non-different, while an element of difference appears if we view it with regard to its coils, hood, erect posture and so on. The maxim is used to illustrate the relation of the highest Self and the soul as analogous to that of the snake and its coils. The expression is akin to the expressions "a forest and its trees", "a lake and its waters", so often used by the Vedāntins as illustrations of identity. अहेः सर्पस्य यथा कुण्डलादिवेष्टनं स्वाभाविकं तथा यस्य स्वाभाविकधर्मो व्यपदिश्यते तत्रास्य प्रवृत्तिः। वाचस्पत्य.

आकाशमुष्टिहननन्यायः The maxim of striking the sky with one's fist. The maxim illustrates a vain attempt at an impossibility. cf. यस्तन्तूननुपादाय तुरीमात्रपरिप्रहात्। पटं कर्तुं समीहेत स हन्याद् व्योम मुष्टिभिः॥ तन्त्र.

आख्यातानामर्थं ब्रुवतां शक्तिः सहकारिणी Power of understanding on the part of the hearer, co-operates

with the verbs expressing a certain sense. cf. आख्यातशब्दानामर्थं ब्रुवतां शक्तिः सहकारिणी। एवं चेद् यथाशक्ति व्यवस्था भवितुमर्हति। तथा, "अञ्जलिना सक्तून् प्रदाव्ये जुहोति" इति। द्विहस्तसंयोगोऽञ्जलिः, स व्याकोशोऽर्थात् कर्तव्यः। तथा हि शक्यते होमो निर्वर्तयितुम्। तद् यथा, कटे भुङ्क्ते कांस्यपात्र्यां भुङ्क्ते इत्यर्थात् कल्प्यते कटे समासीनः कांस्यपात्र्यामोदनं निधाय भुङ्क्ते इति। ŚB. on MS. 1. 4. 25.

आदावन्ते च यन्नास्ति वर्तमानेऽपि तत्तथा That which at the beginning and the end has no [real] existence, has none either during the intervening period. The Vedāntins of Śaṁkara's school hold that existence is of three kinds, namely, पारमार्थिक (true), of which Brahman is the sole representative, —व्यावहारिक (practical), to which all phenomena belong, and प्रातिभासिक (apparent), which includes such things as a snake surmised in a rope, or nacre mistaken for silver. The second and third kind, therefore, have no real existence from the beginning to the end of their supposed existence.

आम्रसेकपितृतर्पणन्यायः Watering a mango-tree, and, at the same time, satisfying the Manes with a libation. The maxim is used to illustrate an act of bringing about two results by one operation. cf. कथं पुनरेकेन यत्नेनोभयं लभ्यम्। लभ्यमित्याह। कथम्। द्विगता अपि हेतवो भवन्ति तद्यथा। आम्राश्च सिक्ताः पितरश्च प्रीणिता इति। Mbh. 1. 1. 1; 8. 2. 3.

आम्रान् पृष्टः कोविदारानाचष्टे Questioned as to mango trees, he speaks of Kovidāra trees. Its origin is found in Mbh. 1. 2. 45. अन्यद्भवान् पृष्टोऽन्यदाचष्टे। आम्रान् पृष्टः कोविदारानाचष्टे। cf. तथा हि लोके प्रकृष्टप्रकाशश्चन्द्र इत्यत्र प्रकृष्टपदेनाप्रकृष्टखद्योतादेः प्रकाशपदेनाप्रकाशात्मकान्धकारादेश्च व्यवच्छेदेन जिज्ञासितश्चन्द्रप्रातिपदिकमात्रार्थः प्रतिपाद्यते। इतरथा आम्रान् पृष्टः कोविदारानाचष्ट इति न्यायेन वक्तुरजिज्ञासार्थमर्थं प्रतिपादयतोऽश्रद्धेयवचनत्वप्रसंगात्। लौकिकन्यायरत्नाकर.

आमोदंषट्पदन्यायः The maxim of the hidden fragrance understood by the bees. cf. आकारेणैव चतुरास्तर्कयन्ति परेङ्गितम्। गर्भस्थं केतकीपुष्पमामोदेनैव षट्पदाः॥ A. R.

आशामोदकतृप्तन्यायः The illustration of one who is satisfied with sweetmeats in prospect. The maxim speaks of a person who relies on future imaginary good in store for him. आशामोदकतृप्ता ये ये चोपार्जितमोदकाः। रसवीर्यविपाकादि तुल्यं तेषां प्रसज्यते॥ न्यायकन्दली.

इक्षुदण्डन्यायः From top to bottom every part of sugar-cane increases in sweet juice; similar is the case with सज्जनमैत्री. इक्षोरग्रात् पर्वणि पर्वणि यथा रसविशेषः तद्वत् सज्जनमैत्री, विपरीतानां तु विपरीता इति। लौ. न्याय.

इतो व्याघ्र इतस्तटी On one side a tiger, on the other a precipice! A serious dilemma. cf. कुटुम्बमपि मे प्रेयः प्रेयास्त्वमपि हे सखे। किं करोमि द्विधाचित्त इतो व्याघ्र इतस्तटी॥ हेमचन्द्र.

इषुकारन्यायः The illustration of the arrow-maker. It is used of one wholly engrossed in his work, and hence unconscious of his surroundings. cf. इषुकारो नरः कश्चिदिषावासक्तमानसः समीपेनापि गच्छन्तं राजानं नावबुद्धवान्॥ Mb. 12. 178. 12; इषुकारन्यायेन मुग्धो भविष्यति। यथेषुकारो जाग्रदपीष्वासक्तमनस्तया नान्यान् विषयानीक्षत एवं मुग्धो मुसलसंघातादिजनितदुःखानुभवव्यग्रमनस्तया जाग्रदपि नान्यान् विषयानीक्षत इति। न। अचेतयमानत्वात्। Ś. B. on Br. Sūt. 3. 2. 10.

इषुवेगक्षयन्यायः The simile of the gradual diminution of the speed of an arrow. प्रवृत्तफलस्य कर्माशयस्य मुक्तेषोरिव वेगक्षयान्निवृत्तिः। Ś. B. on Br. Sūt. 3. 3. 32.

उत्कृष्टदृष्टिर्निकृष्टेऽध्यसितव्या The idea of something higher is to be superimposed upon something lower. एवं प्राप्ते ब्रूमः। ब्रह्मदृष्टिरेवादित्यादिषु स्यादिति। कस्मात्, उत्कर्षात्। एवमुत्कर्षेणादित्यादयो दृष्टा भवन्ति। उत्कृष्टदृष्टेस्तेष्वध्यासात्। तथा लौकिको न्यायोऽनुमतो भवति। उत्कृष्टदृष्टिर्हि निकृष्टेऽध्यसितव्येति लौकिको न्यायः। यथा राजदृष्टिः क्षत्तरि। Ś. B. on Br. Sūt. 4. 1. 5.

उदरे भृते कोशो भृतः "When his stomach is full his coffers are full." It is used of a lazy fellow who has no ambition beyond his daily bread, 'whose god is his belly.'

उपसर्गन्यायः The maxim of a preposition changing the meaning of a verb. उपसर्गेण धात्वर्थो बलादन्यत्र नीयते। प्रहाराहारसंहारविहारपरिहारवत्॥ cf. यत्रैकवस्तुन उपाधिभेदेन नानात्वविवक्षा तत्रायं प्रवर्तते। उपसर्जनमुपसृज्यते वा ... यथैक एवोपसर्गो नानाक्रियायोगरूपोपाधिभेदेन नानार्थतां भजति। लौ. न्याय.

उभयतःपाशा रज्जुः A Rope which binds at both ends; an embarrassing position, a dilemma. यद्यपि न बाधस्तथापि विकल्पस्तावत् प्राप्नोति न हि तुल्यार्थानां क्वचित् समुच्चयो दृष्टः। सेयमुभयतःपाशा रज्जुः। तन्त्र. 3. 6. 42.

उष्ट्रकण्टकभक्षणन्यायः The maxim of a camel's eating thorns. A camel derives pleasure from eating Śamī leaves not minding the pricking thorns. However, things are not in themselves essentially pleasant or unpleasant, and that what causes pleasure to one may be painful to another, and that even the same thing which at one time is agreeable may at another time be the reverse. उष्ट्रस्य शमीकण्टकवेधजाततुःखकालेऽपि शमीपत्रभक्षणसुखलेशो यथा तथाभीष्टविषयोपार्जनदुःखकाले तदुपार्जितद्रव्यजसुखलेशो यत्रोपदिश्यते तत्रास्य प्रवृत्तिः। वाचस्पत्य; cf. कर्णामृतं सूक्तिरसं विमुच्य दोषेषु यत्नः सुमहान् खलस्य। अवेक्षते केलिवनं प्रविश्य क्रमेलकः कण्टकजालमेव॥ Vikr. 1. 29.

उष्ट्रलगुडन्यायः The illustration of the camel and the stick. The very stick carried by the camel is used to strike the camel. This is used to demolish the very objections raised by the opponent against our arguments. अयं हि स्वमते परेणोद्भाव्यमानानां दूषणानां तन्मते पातनेऽवतरति। लौ. न्याय. cf. "Hoist with his own petard." Hamlet 3. 4. The context of this nyāya (आत्मतत्त्वविवेक) seems

to warrant, however, a different explanation. Here the allusion is to the camel, itself the ugliest of animals, going in search of an ugly animal to beat it with a stick in response to the injunction, " Beat the Ugly. " (Turner Jubilee Volume I. p. 94.)

ऊपरवृष्टिन्यायः The simile of rain on a saline barren waste. Vide अरण्यरोदनन्याय etc. यथोषरे बीजमुप्तं न रोहेन्न वा बप्ता प्राप्नुयाद् बीजभागम्। एवं श्राद्धं भुक्तमनर्हमाणैर्न चेह नामुत्र फलं ददाति ॥ Mb. 13. 90. 44.

ऊहापोहन्यायः The rule of full discussion, consideration of pros and cons. इमे मनुष्या दृश्यन्ते ऊहापोहविशारदाः। Mb. 13. 145. 43. ऊह (modification, change) forms the subject-matter of MS. 9. 'अपूर्वोत्प्रेक्षणमूहः' इति जैमिनिः। 'अध्याहारस्तर्क ऊहः' इत्यमरः। तर्कनिराकरणमपोहः, अपगत ऊह इत्यर्थः। इमौ द्वौ मिलित्वा यत्र स्तः तत्रायं न्यायः प्रवर्तते। यथा, ऊहापोहकुशलोऽयं जनः ऊहापोहकौशलहीनश्चायमिति। लौ. न्याय.

ऋतुमतीकन्यकान्यायः The illustration of a maiden who has attained puberty. She leaves her father's roof and becomes completely one with her husband. Similarly, the प्रज्ञा of the Brahma-knower finds unalloyed solace in the परब्रह्म. Both ऋतुमती कन्यका and ब्रह्मविदः प्रज्ञा are ideal पतिव्रताs.

एकवृन्तगतफलद्वयन्यायः The maxim of two fruits attached to one stalk. It is used by writers on Rhetorics to illustrate a particular kind of श्लेष (Paronomasia), namely the coalescence of two meanings under one word. The maxim is found in Marāṭhī literature and according to Molesworth it is equivalent to the English proverb " killing two birds with one stone. "

एका क्रिया द्व्यर्थकरी बभूव One and the same act of a person becomes fruitful leading to liberation for himself and becomes the cause of sustenance of the universe. मुमुक्षुणा श्रोत्रियेण क्रियमाणं कर्म सत्त्वशुद्धिद्वारा स्वस्य मोक्षहेतुर्भवति, वृष्ट्यादिद्वारा जगत्स्थितिहेतुश्च भवत्यत उभयथापि कर्म कर्तव्यमेवेति। लौ. न्याय. A single act leads both to स्वार्थ and परार्थ.

कण्ठचामीकरन्यायः The simile of the golden ornament on the neck. A person is supposed to have a golden ornament round the neck and yet to be unaware of it until some one points it out. The illustration is quite popular in Vedānta and is used to tell us that although we are already Brahman and free, we are not aware of the fact until instructed by a competent teacher.

कदम्बकोरक (गोलक-मुकुल) न्यायः The maxim of the buds of the Kadamba tree. It is used to denote simultaneous rise or action, like the bursting forth of the buds of the Kadamba tree at one and the same time. cf. पित्रा स्वपाणिपद्मेन स्पृश्यमानोऽवनीपतिः। उत्कोरककदम्बाभो बभूव पुलकाङ्कुरैः ॥ हेमचन्द्र; वीचीतरङ्गन्यायेन तदुत्पत्तिस्तु कीर्तिता। कदम्बकोरकन्यायादुत्पत्तिः कस्यचिन्मते ॥ Bhāṣā P.

कदलीफलन्यायः The simile of the fruit of the plaintain tree. As the foetus of the she-mule conduces to the destruction of the अश्वतरी, similarly the fruit of the कदली leads to the destruction of the plantain tree itself. cf. वृश्चिकीगर्भन्याय.

कनककुण्डलन्यायः The illustration of the complete identity of gold and the various ornaments prepared from gold. यथा सुवर्णजन्यकुण्डलस्य सुवर्णाभिन्नत्वम्, तथा ब्रह्मरूपकारणजन्यजगतः कार्यस्य ब्रह्मरूपकारणताभिन्नत्वमिति। लौ. न्याय.

कम्बलनिर्णेजनन्यायः The simile of cleansing of a coarse blanket (by beating it on the feet, and so dusting them at the same time). It is used to denote the accomplishment of two objects by one operation, " Killing two birds with one stone. " अपि च दध्नि उभयमसमर्थं कर्तुं फलं साधयितुं होमं च। ननु कम्बलनिर्णेजनवदेतद् भविष्यति। निर्णेजनं ह्युभयं करोति। कम्बलशुद्धिं पादयोश्च निर्मलताम्। ŚB. on MS. 2. 2. 25. This coarse, rough blanket, in the case of the very poor, is often their sole garment by day as well as their only covering at night.

करविन्यस्तबिल्वन्यायः The simile of the woodapple on the (open palm of the) hand. It is said of something unmistakably clear – " as plain as a pike-staff!" cf. करस्थामलकन्याय. निःशेषोपनिषत्सारस्तदेतदिति सांप्रतम्। उक्त्याविष्क्रियते साक्षात् करविन्यस्तबिल्ववत् ॥ सुरेश्वर.

करिघण्टान्यायः The maxim of an elephant and his bell. This denotes the superiority of intelligence over physical strength. मतिरेव बलाद्गरीयसी यदभावे करिणामियं दशा। इति घोषयतीव डिण्डिमः करिणो हस्तिपकाहतः क्वणन् ॥ H. 2. 84.

करिबृंहितन्यायः The maxim of the trumpeting of an elephant. 'बृंहितं करिगर्जितम्' इत्यमरः। Hence the word करि is superfluous. But the addition in this and similar cases is made for some special purpose, given by Raghunātha as follows : विशिष्टवाचकानामपि पदानां सति पृथग्विशेषणवाचकपदसमवधाने विशेष्यमात्रपरतायां करिबृंहितन्यायः प्रवर्तते। cf. सौन्दर्यसंपत्तारुण्यं यस्यास्ते ते च विभ्रमाः। षट्पदान् पुष्पमालेव कान्नाकर्षति सा सखे ॥ मालाशब्दो यद्यपि पुष्पस्यैव स्रजि शक्तस्तथापि न पुष्पपदमपुष्टार्थम्। लक्षणयोत्कृष्टत्वप्रतिपादकत्वात्। अयमेव करिबृंहितन्यायः। K. P. 7. 10. cf. गजघटान्याय, नीलेन्दीवरन्याय, पर्वताधित्यकान्याय, वाजिमन्दुरान्याय, मृगवागुरान्याय etc.

कलञ्जन्यायः Vide Dictionary p. 544.

कांस्यभोजिन्यायः The simile of the man who eats from a brazen vessel. कांस्यभोजिवत्। तद्यथा। शिष्यस्य कांस्यपात्रभोजित्वनियम उपाध्यायस्यानियमः। यदि तयोरेकस्मिन् पात्रे भोजनमापद्यतेऽमुख्यस्यापि शिष्यस्य धर्मो नियम्येत। मा भूद्धर्मलोप इति। ŚB. on MS. 12. 2. 34. The principle here laid down is that of some one's doing something which he is *not* bound to do, in order that he may not hinder another who *is* required to do it. The converse is that of a man *abstaining* from doing something, possibly harmless in his case, lest another should do the same and suffer harm.

काकतालीयन्यायः The maxim of the crow and the Palmyra tree. It takes its origin from the unexpected and sudden fall of a palm-fruit upon the head of a crow at the very moment of its sitting on a branch of that tree; and is used to denote a very unexpected and accidental occurrence, whether welcome or unwelcome. cf. यत्तया मेलनं तत्र लाभो मे यश्च सुभ्रुवः । तदेतत् काकतालीयमवितर्कितसंभवम् । चन्द्रालोक; पतत् तालफलं यथा काकेनोपभुक्तमेवं रहोदर्शनक्षुभितहृदया तन्वी मया भुक्ता । Kuval. काकागमनमिव तालपतनमिव काकतालम् । काकतालमिव काकतालीयम् । Mbh. There are in all five explanations of this न्याय : (1) A crow happened to go to the foot of a palm tree. A fruit immediately fell on his head and killed him. This is purely accidental, there being no relation of cause and effect between the two events. काकस्यागमनं यादृच्छिकं तालस्य पतनं च । तेन तालेन पतता काकस्य वधः कृतः । Kāśi. (2) A crow came and perched on the palm tree. At that very moment the tree fell down. This was an accident, for the tree could not have given way under the crow's weight. (3) "As the fruit of a palmyra falling at the alighting upon it of a crow may appear to fall *in consequence*." Molesworth. (4) A crow chanced to go to a palm tree. Immediately a fruit fell down and was torn open. The crow had a feast. Vide चन्द्रालोक and Kuval. quoted above. (5) A person while clapping his hands chanced to capture between his palms a crow that was flying. cf. नीलकण्ठ on Mb. 12. 177. 11 तालः करतलयोः शब्दजनकः संयोगः । तस्मिन् क्रियमाणे उत्पतन् काको दैवात् तत्र तालाभ्यामाक्रान्तोऽभूत् तदेतत् काकतालीयमुच्यते । काकस्पर्शसमकालं तालफलस्य तालवृक्षस्य वा पतनं तदित्यन्ये ।; प्रहाणां चरितं स्वप्नो निमित्तान्युपयाचितम् । फलन्ति काकतालीयं प्राज्ञास्तेभ्यो न बिभ्यति ॥ Ve. 2. 15; अहो नु खलु भोः, तदेतत् काकतालीयं नाम । Mal. 5.

काकदधिघातकन्याय :The simile of a crow as a destroyer of curds. An example of उपलक्षण where one represents many or a part stands for a whole. So if any one warned to keep the crow off the curds, it would imply that all other possible raiders were also to be warded off. काकेभ्यो रक्ष्यतां सर्पिरिति बालोऽपि चोदितः । उपघातपरे वाक्ये न श्वादिभ्यो न रक्षति । Vāk. P. 11. 314. This is illustrated in वेदान्तपरिभाषा as an example of जहदजहल्लक्षणा, "जहदजहल्लक्षणोदाहरणं तु काकेभ्यो दधि रक्ष्यतामित्यादिकमेव । तत्र शक्यकाकपरित्यागेनाशक्यदध्युपघातकत्वपुरस्कारेण अकाके काके च काकशब्दस्य प्रवृत्तेः ।

काकदन्तगवेषण (परीक्षा) न्यायः The maxim of searching after a crow's teeth, used to denote any useless, unprofitable, or impossible task. नचिकेतो मरणं मरणसंबद्धं प्रश्नं प्रेत्यास्ति नास्तीति काकदन्तपरीक्षारूपं मानुप्राक्षीर्मैवं प्रष्टुमर्हसि । Śaṁkara on Kaṭh. 1. 25. व्यङ्ग्योऽर्थो भवतु मा वाभूत् कस्तत्राभिनिवेशः । काकदन्तपरीक्षाप्रायमेव तत् स्यादिति भावः । अभिनवगुप्त on ध्वन्यालोक 3. 19. cf. वायसदशनविमर्शन्याय.

काकाक्षिगोलकन्यायः The maxim of the crow's eyeball. It takes its origin from the supposition that the crow has but one eye (cf. words like एकदृष्टि, एकाक्ष etc.), and that it can move it, as occasion requires, from the socket on one side into that of the other. The maxim is applied to a word or phrase which, though used only once in a sentence, may, if occasion requires, serve two purposes; e.g. द्वीपो ऽन्त्रियामन्तरीपः इत्यत्र अस्त्रियामित्यस्य काकाक्षिगोलकन्यायेन अन्तरीपशब्देनाप्यन्वयः । cf. बलिनोर्द्विषतोर्मध्ये वाचात्मानं समर्पयन् । द्वैधीभावेन वर्तेत काकाक्षिवदलक्षितः । Kām. 11. 24; तस्मिन्नास्थदिषीकास्त्रं रामो रामावबोधितः । आत्मानं मुमुचे तस्मादेकेनेत्वव्ययेन सः । R. 12. 23.

काकोलूकनिशावत् The simile of the crow's and owl's night-time. What is day to the former is night to the latter and vice versa. cf. पत्रं नैव यदा करीरविटपे दोषो वसन्तस्य किं नोलूकोऽप्यवलोकते यदि दिवा सूर्यस्य किं दूषणम् ॥ Bh. 2. 93; काकोलूकनिशेवायं संसारोऽज्ञात्मवेदिनोः । या निशा सर्वभूतानामित्यवोचत् स्वयं हरिः ॥ सुरेश्वर.

काकपिकन्यायः The illustration of the crow and the cuckoo. Similarly काचमणिन्याय and गोगवयन्याय. The distinction between these pairs, apparently similar, is grasped at the proper time of their test. cf. काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः । प्राप्ते वसन्तसमये काकः काकः पिकः पिकः॥; मणिर्लुठति पादेषु काचः शिरसि धार्यते । क्रयविक्रयवेलायां काचः काचो मणिर्मणिः ॥; यथा गोगवयभ्रान्तिः कस्य नाम न जायते । दोहने ज्ञायते सम्यग् गौरेषा गवयो न हि ॥

कुड्यं विना चित्रकर्मेव Like a decoration without a wall (to be decorated; or like a painting without a canvas). It denotes an unreality, like a hare's horn etc. cf. चित्रं यथाश्रयमृते स्थाण्वादिभ्यो विना यथा छाया । तद्वद्विना विशेषैर्न तिष्ठति निराश्रयं लिङ्गम् ॥ Sāṁ. K. 41; प्रसङ्गसाधनं नाम नास्त्येव परमार्थतः । तद्धि कुड्यं विना तत्र चित्रकर्मेव लक्ष्यते ॥; न हि नभःकुसुमस्य सौरभासौरभविचारो युक्तः । न्यायमञ्जरी; सैवेयं मम चित्रकर्मरचना भित्तिं विना वर्तते Mu. 2. 4.

कुलालचक्रन्यायः The maxim of the potter's wheel. Read: यथा हस्तदण्डादिभ्रमिप्रेरितं कुलालचक्रमुपरतेऽपि तस्मिंस्तद्वलादेवासंस्कारक्षयं भ्रमति, तथा भवस्थेनात्मना अपवर्गप्राप्तये बहुशो यत् कृतं प्रणिधानं मुक्तस्य तदभावेऽपि पूर्वसंस्कारादालोकान्तं गमनमुपपद्यत इत्यार्हता आहुः । लौ. न्याय.

कुल्याप्रणयनन्यायः The illustration of the laying down of a water-course for irrigation. It is an example of a thing made for one purpose subserving other purposes also. The origin of this न्याय seems to be अन्यार्थं प्रकृतमन्यार्थं भवति । cf. अतो न विधेयप्रत्यये तात्पर्यमिति कुल्याप्रणयनन्यायेनोभयार्थत्वाविधेयत्वात् । यथा शाल्यर्थं कुल्याः प्रणीयन्ते ताभ्य एव पानीयं च पीयते तद्वत् । विवरणप्रमेयसंग्रह.

कुसुमस्तबकन्यायः The maxim of a bouquet of flowers; either the flowers occupy the prominent place on the head of people or they wither away in forest unnoticed. There is no third alternative for them.

कुसुमस्तबक figuratively stands for the मनस्विन्, the spirited. कुसुमस्तबकस्येव द्वे गती स्तो मनस्विनाम्। मूर्ध्नि वा सर्वलोकस्य विशीर्येत वनेऽथवा ॥ Bh. 2. 33.

कूटकार्षापणन्यायः The simile of (the unwilling employment of) base money. It is used by कुमारिल (यो हि कूटकार्षापणेन कंचित् कालमज्ञो लोकमध्ये व्यवहरति न तेन विवेकज्ञानजनितव्युत्पत्तिनापि तथैव व्यवहर्तव्यम्। तन्त्र. 1. 3. 3.) in the course of an argument on the relative value of Smṛiti and Śruti. The teaching of स्मृति which is in opposition to that of श्रुति must be given up; just as a man knowing that he has been using counterfeit coins must at once abstain from using them. शब्दापभ्रंशवदेव गौणभ्रान्त्यादिप्रयोगनिमित्ता अर्थापभ्रंशा भवन्ति ते शास्त्रस्थैरेवाविप्लुतार्थक्रियानिमित्तपुण्यार्थिभिः शक्यन्ते साध्वसाधुकार्षापणमध्यादिव तत्परीक्षिभिर्विवेक्तुम्। तन्त्र. 1. 3. 8.

कूपमण्डूकन्यायः The maxim of a frog in a well. It is applied to an inexperienced person brought up in the narrow circle of home, and ignorant of public life and mankind. "Home-keeping youths have ever homely wits." (Two Gentlemen of Verona 1. 1). कथं मामपि दशदिग्विलासिनीकर्णपूरीकृतकीर्तिपल्लवं त्रिभुवनवीरनामधेयं कूपमण्डूक इव सागरमविख्यातमपदिशसि। P. R. 1; यत्र महाजनप्रणीतसत्यपदार्थज्ञानलवदुर्विदग्धोऽल्पज्ञो न संमनुते तत्रास्य प्रवृत्तिः।...... तथा च यथा समुद्रमज्ञात्वा निराकुर्वन् कूपमण्डूक उपहास्यतां प्राप्तस्तथान्यमतानभिज्ञस्तद्दूषणपर उपहासास्पदी भवतीति न्यायसंगतिरिति। लौ. न्याय.

कूपयन्त्रघटिकान्यायः The maxim of the buckets attached to the water-wheel. It takes its origin from the fact that while some of the buckets filled with water go up, some are emptied of their contents, while others go down quite empty. It is used to denote the various vicissitudes of worldly existence. cf. घटीयन्त्रन्याय. कांश्चित्तुच्छयति प्रपूरयति वा कांश्चिन्नयत्युन्नतिं कांश्चित् पातविधौ करोति च पुनः कांश्चिन्नयत्याकुलान्। अन्योन्यं प्रतिपक्षसंततिमिमां लोकस्थितिं बोधयन्नेष क्रीडति कूपयन्त्रघटिकान्यायप्रसक्तो विधिः॥ Mk. 10. 59.

कूर्माङ्गन्यायः The maxim of the limbs of the tortoise. It is used to illustrate that there is no such thing as the production of the non-existent, or the destruction of the existent. यथा कूर्मदेहे तदिच्छया तदङ्गानि निःसरन्ति लीयन्ते च तत्रैव, एवं यस्येच्छावशात् स्वोपाध्यज्ञानकार्यजातस्य स्वोपाधौ संकोचविकाशकारित्वमेवं विवक्षाविषयेऽस्य प्रवृत्तिः। लौ. न्याय.

कृतक्षौरस्य नक्षत्रपरीक्षा cf. मुण्डितशिरोनक्षत्रान्वेषण, कृते कार्ये किं मुहूर्तप्रश्नेन, न हि विवाहानन्तरं वरपरीक्षा and सावग, मुंडिअमुंडो णक्खत्ताई पुच्छसि। Mu. 5; समर्थकारणज्ञानायोऽपि प्रामाण्यनिश्चयम्। ब्रूते सोऽपि कृतोद्वाहस्तत्र लग्नं परीक्षते॥ न्यायमञ्जरी.

कृत्वाचिन्तान्यायः In Sanskrit all philosophical treatises (दर्शनग्रन्थ) have a peculiar method of arguing out every topic (अधिकरण). Both the पूर्वपक्षिन् and the सिद्धान्तिन् take for granted all possible objections of the opponent, whether actually put forth or otherwise, and try to refute them. This gives thoroughness to the discussion and leaves no stone unturned (खण्डनमण्डन). कृत्वा (यद्यप्येतद्विषयकसंशयो नोदेति तथापि तद्विषयगतसकलविचारस्योपन्यासार्थं कल्पनां कृत्वा) चिन्ता (विचारः)। "The Bhāṣya has introduced certain points of discussion simply for *the sake of argument*, in order to exhaust all possible alternatives with regard to the subject-matter of the adhikaraṇa". M. M. Ganganatha Jha.

कैमुतिकन्यायः The maxim of how much more-how much less, much more-much less. It has another name काव्यार्थापत्ति. Read: कैमुत्येनार्थसंसिद्धिः काव्यार्थापत्तिरिष्यते। स जितस्त्वन्मुखेनेन्दुः का वार्ता सरसीरुहाम्॥ cf. ऋषिप्रभावान्मयि नान्तकोऽपि प्रभुः प्रहर्तुं किमुतान्यहिंस्राः। R. 2. 62; सर्वाविनयानामेकैकमप्येषामायतनं किमुत समवायः। K.; किमुतस्य भावः कैमुत्यं कैमुतिको वा।

क्रिया हि विकल्प्यते न वस्तु Action may vary, but substance cannot. कर्तुमकर्तुमन्यथा वा कर्तुं शक्यं लौकिकं वैदिकं च कर्म। यथाश्वेन गच्छति पद्भ्यामन्यथा वा न वा गच्छतीति। न तु वस्त्वेवं नैवमस्ति नास्तीति वा विकल्प्यते। Ś. B. on Br. Sūt. 1. 1. 2; 2. 1. 27.

क्वोष्ट्रः क च नीराजना What connection has a camel with the lustration of arms! None at all. The phrase is used to indicate that certain things are not connected. The नीराजनविधि was a ceremony performed by kings or generals before going forth to battle, and consisted of the purification of the component parts of the army. cf. R. 4. 25 on which मल्लिनाथ remarks वाजिग्रहणं गजादीनामुपलक्षणं तेषामपि नीराजनाविधानात्।

क्षते क्षारमिव Like salt on a wound. 'क्षारं क्षते क्षिप्' has become proverbial and means to aggravate the pain which is already unbearable. "To make bad worse", "to add insult to injury". cf. प्राज्ञदू प्राज्ञवित्ति ब्रवीति शठधीः क्षारं क्षते प्रक्षिपन्। Mk. 5. 18; य एव मे जनः पूर्वमासीन्मूर्तो महोत्सवः। क्षते क्षारमिवासह्यं जातं तस्यैव दर्शनम्॥ U. 4. 7.

क्षीरदग्धजिह्वान्यायः cf. Marāṭhī 'दुधानें तोंड पोळलें म्हणजे मनुष्य ताक देखील फुंकून पितो.' "Once bitten twice shy." यथा तप्तक्षीरेण दग्धजिह्वः कश्चित् तक्रं फूत्कृत्य पिबति तथा दैवात् सुखकारिवस्तुतः प्राप्तानिष्टविवक्षायां बोध्योऽयमिति। उक्तं च -- क्षीरेण दग्धजिह्वस्तक्रं फूत्कृत्य पामरः पिबति। दम्भिनमवलोक्य जनस्तद्धर्मां शङ्कते त्वया त्यक्तम्॥ इति भक्तवाक्यं भगवन्तं प्रति। लौ. न्याय.

क्षीरनीरन्यायः The simile of milk and water. It is used to illustrate the most intimate union of two or more things. क्षीरोदके संपृक्त आमिश्रीभूतत्वान्न ज्ञायते कियत् क्षीरं कियदुदकं कस्मिन्नवकाशे क्षीरं कस्मिन्नवकाश उदकमिति। Mbh. 1.2. 32. Writers on Alaṁkāra employ it to exemplify the figure of speech संकर (Commixture) and distinguish it from संसृष्टि (Collocation) which is compared with तिलतण्डुलन्याय. cf. अथैतेषामलंकाराणां यथासंभवं क्वचिन्मेलने लौकिकालंकाराणां मेलन इव चारुत्वातिशयोपलम्भान्नरसिंहन्यायेन पृथगलंकारावस्थितौ तन्निर्णयः क्रियते। तत्र तिलतण्डुलन्यायेन स्फुटावगम्यभेदालंकारमेलने संसृष्टिः। नीरक्षीरन्यायेनास्फुटभेदालंकारमेलने संकरः। Kuval.

खले कपोतन्यायः The simile of pigeons alighting on a threshing-floor. It is used by writers on Alaṁkāra to illustrate the production of a certain effect by the simultaneous action of numerous causes. In the figure समाधि, काकतालीयन्याय works, while in समुच्चय this खले कपोतन्याय is useful. cf. समुच्चयोऽयमेकस्मिन् सति कार्यस्य साधके। खले कपोतिकान्यायात् तत्करः स्यात् परोऽपि चेत् ॥ S. D. 10.

खल्वाटबिल्वीयन्यायः The maxim of the bald (or bare-headed) man, and the woodapple. यथा खल्वाटः पर्यटन्नतर्कितं श्रीफलतरोरधस्तादागतो दैववशाच्च बिल्वमुपरि पतितं तद्वदन्योऽप्युभयवस्तुसंयोग एवमुच्यते। G. M. 3. 195. cf. अजाकृपाणीयन्याय and काकतालीयन्याय. खल्वाटो दिवसेश्वरस्य किरणैः संतापितो मस्तके वाञ्छन् देशमनातपं विधिवशात् तालस्य मूलं गतः। तत्राप्यस्य महाफलेन पतता भग्नं सशब्दं शिरः प्रायो गच्छति यत्र भाग्यरहितस्तत्रैव यान्त्यापदः ॥ Bh. 2. 90.

गगनारविन्दन्यायः The maxim of a sky-lotus. मूषकविषाणन्याय and this one are used to illustrate अत्यन्ताभाव.

गड्डरिकाप्रवाहन्यायः The maxim of a continuous rush of sheep. It is used to indicate the blind following of others like a flock of sheep. गड्डरिकानामवीनां संघादेका चेन्नद्यादौ पतति तदा तत्संघान्तर्गताः सर्वा अपि वार्यमाणा अपि तत्र पतन्तीति लोकप्रसिद्धया यत्र वार्यमाणानामपि अनिष्टमार्गे धावनं तत्रास्य प्रवृत्तिः। वाचस्पत्य.

गन्धर्वनगरन्यायः The illustration of the city of गन्धर्वs. It is used to denote the unreality of this world on the analogy of the गन्धर्वनगर which is non-existent. अनेकवर्णं वियतीन्द्रचापं प्रहात् समन्तात् परिवेष उक्तः। तथैव भानां पतनं च विद्युत् तथैव गन्धर्वपुरं विचित्रम् ॥ तत्त्वविवेक.

गार्हपत्यन्यायः Vide Dictionary p. 658.

गिरिमुत्पाट्य मूषिकोद्धृता cf. Marāṭhī 'डोंगर पोखरून उंदीर काढणें.' यत्र कृतेऽपि बह्वायाससाध्ये कर्मणि, तुच्छफलोपलब्धिस्तत्रायं प्रवर्तत इति। लौ.न्याय.; खनन्नाखुबिलं सिंहः पाषाणशकलाकुलम्। प्राप्नोति नखभङ्गं वा फलं वा मूषको भवेत् ॥ Pt.

गुडजिह्विकान्यायः The maxim of the tongue [smeared] with treacle [in order to disguise an unpalatable draught]. अर्थवाद in शास्त्र and उपदेश in काव्य serve the purpose of गुडजिह्विका. Read: यथा तिक्तताभिया निम्बपानमकुर्वाणस्य बालस्य जिह्वायां गुडलेपं दत्त्वा पित्रादिस्तं निम्बं पाययति एवमर्थवादवाक्यानि बह्वायाससाध्ये कर्मण्यप्रवर्तमानं पुरुषं स्वर्गाक्षय्यादिकं श्रावयित्वा प्रवर्तयन्ति। फलश्रुतिरपि रोचनार्था। वाचस्पत्य; ये सुकुमारमतयोऽतिसुखित्वभावा राजकुमारादयो नीरसे नीतिशास्त्रे प्रवर्तयितुमशक्यास्तान् काव्यं कान्तेव सरसतापादनेनाभिमुखीकृत्योपदेशं ग्राहयति गुडजिह्विकया शिशूनिवौषधम्। यथाहुः—स्वादुकाव्यरसोन्मिश्रं वाक्यार्थमुपभुञ्जते। प्रथमालीढमधवः पिबन्ति कटु भेषजम् ॥ काव्यप्रदीप.

गोदोहनन्यायः The simile of the milk-pail. It is used as an illustration of something which is occasionally, and not universally connected with an act or performance as an essential part of it. काम्यसूक्तानां महाव्रते आज्यशस्त्रत्वेन यथोक्तानां गोदोहनन्यायेन पुरुषार्थत्वमेव न क्रत्वर्थत्वम्। ŚB. on MS. 4. 1. 2; सन्ति कर्माङ्गव्यपाश्रयाणि विज्ञानानि 'ओमित्येतदक्षरमुद्गीथमुपासीत' इत्येवमादीनि। किं तानि नित्यान्येव स्युः कर्मसु पर्णमयीत्वादिवदुतानित्यानि गोदोहनादिवदिति विचारयामः। ... तस्माद्यथा क्रत्वाश्रयाण्यपि गोदोहनादीनि फलसंयोगादनित्यानि एवमुद्गीथाद्युपासनानीत्यपि द्रष्टव्यम्। Ś. B. on Br. Sūt. 3. 3. 42.

गोबलीवर्दन्यायः The maxim of the cattle and the bull. cf. ब्राह्मणवसिष्ठन्याय and ब्राह्मणपरिव्राजकन्याय. बलीवर्दस्य गोविशेषत्वेऽपि बलीवर्दस्य झटिति गोत्वेन बोधनार्थं यथा प्रयोगस्तथान्ययोः सामान्यविशेषरूपयोर्झटिति बोधनार्थं यत्र प्रयोगस्तत्रास्य प्रवृत्तिः। वाचस्पत्य; अत्र चानेकशब्दोपादाने गोबलीवर्दन्यायेन पुनरुक्तिपरिहारः। Kull. on Ms. 8. 28; यद्यप्ययं न्यायः पूर्वन्याय (ब्राह्मणवसिष्ठ)-समानार्थकप्रायोऽस्ति तथापि द्वित्वावांस्तु विशेषः। यत्र विशेषणोपात्तस्य प्राशस्त्यमभिप्रेतं तत्र पूर्वन्यायप्रवृत्तिः, यत्र तन्नास्ति किं तु प्रसिद्ध्यप्रसिद्धिनिबन्धनं भवेत् तत्रायं प्रवर्तते। लौ. न्याय.

ग्रहैकत्वन्यायः Vide Dictionary p. 679.

ग्रावणि रेखेव "Like a delineation on stone." It is used of something unalterably fixed. cf. Marāṭhī 'काळ्या दगडावरची रेघ.' तन्मां वज्रकुमाराय संप्रदत्तान् यथा तु मे। मरणं शरणं तात ग्रावणि रेखेव गीरियम् ॥ हेमचन्द्र.

घटप्रदीपन्यायः The simile of a lighted lamp inside a vessel. This maxim teaches that as the lamp continues to burn after it has lighted up the interior of the vessel, and is indeed essential to the continuance of that illumination, so the expressed meaning of a sentence is absolutely essential as a basis for the figurative meaning which it also conveys. cf. न त्वेष वाच्यव्यङ्ग्ययोर्न्यायः। न हि व्यङ्ग्ये प्रतीयमाने वाच्यबुद्धिर्दूरीभवति। वाच्यावभासाविनाभावेन तस्य प्रकाशनात्। तस्माद् घटप्रदीपन्यायस्तयोः। यथैव हि प्रदीपद्वारेण घटप्रतीतावुत्पन्नायां न प्रदीपप्रकाशो निवर्तते तद्वद् व्यङ्ग्यप्रतीतौ वाच्यावभासः। ध्वन्यालोक 3. 33.

घटानां निर्मातुस्त्रिभुवनविधातुश्च कलहः अस्य न्यायस्य अल्पशक्तिमतो बहुशक्तिमता सह विग्रहविवक्षायामवतार इति। लौ. न्याय. cf. हठादाकृष्टानां कतिपयपदानां रचयिता जनः स्पर्धालुश्चेदहह कविना वश्यवचसा। भवेदद्य श्वो वा किमिह बहुना पापिनि कलौ घटानां निर्मातुस्त्रिभुवनविधातुश्च कलहः ॥ Bh. 2.

घटीयन्त्रन्यायः This has the same meaning and application as the कूपयन्त्रघटिकान्याय. See: आपद्गतं हससि किं द्रविणान्धमूढ लक्ष्मीः स्थिरा न भवतीति किमत्र चित्रम्। किं त्वं न पश्यसि घटीर्जलयन्त्रचक्रे रिक्ता भवन्ति भरिता भरिताश्च रिक्ताः॥ प्रबन्धचिन्तामणि. The maxim occurs as अरघट्टघटीयन्त्रन्याय. The word अरघट्ट has become राहाट in Marāṭhī as in राहाटगाडगे.

घट्टकुटीप्रभातन्यायः The maxim of day-break near a toll-station. It takes its origin from the attempt of one (say, a cartman) who with the intention of avoiding a toll takes at night an unfrequented road, but unfortunately finds himself at day-break near the very toll-station and is obliged to pay the toll which he studiously tried to avoid. Thus the maxim is used to denote the occurrence of that which one studiously tries to avoid. The saying is employed to illustrate उद्देश्यासिद्धि, that is, failure to accomplish a desired object.

घुणाक्षरन्यायः The maxim of letters bored by an insect in wood. It takes its origin from the unexpected and chance resemblance of an incision in wood or in the leaf of a book made by an insect to the form of some letter and is used to denote any fortuitous or chance occurrence. घुणोत्किरणात् कथंचिन्निष्पन्नमक्षरं घुणाक्षरम्। तदिव यदकुशलेन दैवान्निष्पद्यते तद्घुणाक्षरीयम्॥ G. M. 3, 195; अहो घुणाक्षरन्यायो यदिदं भ्रमरद्वयं प्रति मयोक्तं बन्दिद्वयं प्रति फलितं वचः। P. R. 1; श्रीनिर्मितिप्राप्तघुणक्षतैकवर्णोपमावाच्यमलं ममार्ज Si. 3. 58.

चक्रभ्रमणन्यायः The simile of. the [continued] revolving of the potter's wheel. Followers of both Sāṁkhya and Vedānta propound the very important doctrine that whilst accumulated and current works are destroyed by true knowledge, fructescent works, which brought about the present existence, are not. Therefore the जीवन्मुक्त has to continue here until death, just as the potter's wheel continues to revolve until the impetus given to it exhausts itself. cf. Ś. B. on Br. Sūt. 4. 1. 15.

चन्दनन्यायः The simile of sandal oil. As the application of a drop of the sandal oil to one part of the body produces a pleasant sensation in the whole of it, so soul, abiding in one part, namely in the heart, is yet perceived as present in the entire frame. यथा हरिचन्दनबिन्दुः शरीरैकदेशसंबद्धोऽपि सन् सकलदेहव्यापिनमाह्लादं करोति इत्येवं आत्मापि देहैकदेशस्थः सकलदेहव्यापिनीमुपलब्धिं करिष्यति। Ś. B. on Br. Sūt. 2. 3. 23-24.

चन्द्रचन्द्रिकान्यायः The maxim of the moon and her light. It is used of two inseparable things. अतः सर्वदेवकारणस्य रुद्रस्य या शक्तिश्चन्द्रचन्द्रिकान्यायेन तद्बुद्धोधरूपिणी स्वाधीनवल्लभेति प्रसिद्धा सैव भवानी। आनन्दगिरि.

चौरापराधान्माण्डव्यनिग्रहन्यायः The maxim of the punishment of Māṇḍavya for the crime committed by robbers. The story of the sage, अणी माण्डव्य, is found in Mb. 1. 107-108. Whilst he was practising severe austerities, some robbers concealed themselves there and committed plunder in his hermitage. The king's guard found them there, and, believing the sage to be implicated in the affair, carried him off together with them and impaled them all together! माण्डव्य was eventually removed from the stake, but its point (अणी) remained in him; and hence his name. एवं दुष्टसंगासक्तानामवश्यमेव दुर्गतिर्भवतीति भावः। लौ. न्याय.

छत्रिन्यायः The maxim of the men with umbrellas. The thought here is of a crowd of men, *many* of them with umbrellas up, and so *all* seeming to have them. The maxim is an illustration of a permitted synonym. लोके छत्रिणो यान्तीति प्रयोगे सपरिवारे राशि गच्छति छत्र्यच्छत्रिसमुदाये छत्रिशब्दो वर्तते। लौ. न्याय.; ऋतं पिबन्ताबित्यत्र तु जीवे पिबत्यशनायाद्यतीतः परमात्मापि साहचर्याच्छत्रिन्यायेन पिबतीत्युपचर्यते। Ś.B. on Br. Sūt. 3. 3. 34.

जलकतकरेणुन्यायः The simile of the particles of the Kataka nut [placed] in water [in order to clear it]. फलं कतकवृक्षस्य [निवळीच्या झाडाचें बी] यद्यप्यम्बुप्रसादकम्। न नामग्रहणादेव तस्य वारि प्रसीदति॥ Ms. 6. 67; अपां कतकसंपर्काद् यथात्यन्तप्रसन्नता। अपास्ताशेषसंसारभावनस्यैवमात्मनः॥ सुरेश्वर.

जलचन्द्रन्यायः The maxim of the moon reflected in water. These reflections appear to be varied in form and numerous, though the moon is really one. एक एव तु भूतात्मा भूतभूते व्यवस्थितः। एकधा बहुधा चैव दृश्यते जलचन्द्रवत्॥

जलताडनन्यायः cf. अरण्यरोदनन्याय, ऊषरवृष्टिन्याय etc. The meaning and application of the maxim is the same.

जातेष्टिन्यायः Vide Dictionary p. 733.

जामातृशुद्धिन्यायः The story of a son-in-law's revision of a book. This is the original of the Marāṭhī जांवईशोध. This is "a phrase founded on a popular story, to express the examination of a piece of composition by a shallow-witted fellow incapable of discerning its merits." Molesworth. पण्डितोपदिष्टं सर्वथा मौनमेवावलम्बमानो (महिषीपालः) राजकन्यकया तद्वैदग्ध्यजिज्ञासया नवलिखितपुस्तकस्य शोधनायोपरुद्धः। करतले पुस्तकं विन्यस्य तदक्षराणि बिन्दुमात्ररहितानि नखच्छेदिन्या केवलान्येव कुर्वन् राजपुत्र्या महिषीपाल एव निर्णीतः। ततःप्रभृति जामातृशुद्धिरिति सर्वतः प्रसिद्धिरभूत्। प्रबन्धचिन्तामणि.

जामात्रर्थं श्रपितस्य सूपादेरतिथ्युपकारकत्वम् Broth cooked for the son-in-law is also useful for the unexpected guests. cf. देहलीदीपन्याय. न हि दीपस्य रथ्याप्रासादयोर्युगपदुपकारकत्वेन जामात्रर्थं श्रपितस्य सूपस्यातिथिभ्यः प्रथमपरिवेषणेन च प्रासंगिकत्वं हीयते। Kuval. cf. also another maxim गृहार्थमारोपितस्य दीपस्य रथ्योपकारकत्वम्.

टिट्टिभन्यायः The simile of the bird named टिट्टिभ (Parra Jacana). It is used as an illustration of ridiculous conceit. The origin is found in H. 2. 137 अज्ञात्वा भावमज्ञात्वा कथं सामर्थ्यनिर्णयः। पश्य टिट्टिभमात्रेण समुद्रो व्याकुलीकृतः॥ cf. यथा दृढाध्यवसायस्य पक्षिणो गरुडसाहाय्यादण्डलाभः तथा दृढबुद्धेर्जिज्ञासोरतिदुर्लभस्यापि तत्त्वज्ञानस्येशानुग्रहात् सुखेन लाभो भविष्यतीति। लौ. न्याय.

तक्रकौण्डिन्यन्यायः The maxim of buttermilk for कौण्डिन्य. लौकिकोऽयं दृष्टान्तः। लोके हि सत्यपि संभवे बाधनं भवति तद्यथाः— दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्याय इति सत्यपि संभवे दधिदानस्य तक्रदानं निवर्तकं भवति। Mbh. 1. 1. 47. It is intended to indicate a special exception to a general rule (सामान्यशास्त्रस्य विशेषशास्त्रेण बाधः) as in the sentence ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्याय, where an exception is made in the case of कौण्डिन्य though included amongst the Brāhmaṇas.

तत्प्रख्यन्यायः Vide Dictionary p. 754.

तदादितदन्तन्यायः Vide Dictionary p. 757.

तन्तुन्यायः The illustration of threads. It is used to denote the inherent power of threads to produce a

piece of cloth. अयं समुदायस्य कार्यसाधकविवक्षायां प्रवर्तते। यथा तन्तवः सूत्राणि बहूनि मिलितानि कार्यं साधयन्ति तथा महान्तोऽपि मिलिताः स्वकार्यं साधयन्तीति भावः। लौ. न्याय.

तप्तं तप्तेन संबध्यते Hot goes with hot. Like loves like. cf. साधारणोऽयमुभयोः प्रणयः स्मरस्य तप्तेन तप्तमयसा घटनाय योग्यम्। V. 2. 16; अभितप्तमयोऽपि मार्दवं भजते कैव कथा शरीरिषु। R. 8. 43.

तप्तपरशुग्रहणन्यायः The maxim of taking hold of the heated axe. This is one of the ordeals prescribed to prove one's guiltlessness or otherwise in ancient India. cf. पुरुषं सोम्योत हस्तगृहीतमानयन्ति......। स यदि तस्य कर्ता भवति तत एवानृतमात्मानं कुरुते सोऽनृताभिसंधोऽनृतेन आत्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति स दह्यतेऽथ हन्यते। Ch. Up. 6. 16.

तस्करकन्दुन्यायः The simile of a thief (who engaged himself) as a cook. His inability to perform the duties, however, led to his discovery and arrest. This is intended to teach the folly of undertaking to do something quite beyond our powers. अशक्ये विनियुक्तोऽपि कृष्णलाञ् श्रपयेदिति। सर्वात्मनाप्यसौ कुर्वन् कुर्यात् तस्करकन्दुवत्॥ सुरेश्वर.

तिलतण्डुलन्यायः The simile of rice and sesamum seeds. It is used to illustrate an easily distinguishable union of two or more things (संसृष्टि), in contradistinction to the more intimate and indistinguishable union (संकर) exemplified by the commingling of milk and water. See क्षीरनीरन्याय.

तुलायष्टिन्यायः The maxim of the horizontal beam of a balance. It is used to illustrate that a slight addition or subtraction of weight disturbs the balance. The तुलायष्टि figuratively suggests खलजनस्वभाव. स्तोकेनोन्नतिमायाति स्तोकेनायात्यधोगतिम्। अहो सुसदृशी चेष्टा तुलाकोटेः खलस्य च॥ H. 1. 150.

तुलोन्नमनन्यायः The simile of the raising [with the hand, one scale] of a balance. Naturally the other scale goes down, so the simile is used to illustrate the bringing about of two or more results by one operation.

तुषकण्डनन्यायः The simile of the grinding of chaff. It is used, like पिष्टपेषणन्याय, of an unnecessary and useless effort. अविचारयतो युक्तिकथनं तुषकण्डनम्। नीचेषूपकृतं राजन् वालुकास्विव मूत्रितम्॥ H. 4. 13.

तुष्यतुदुर्जनन्यायः The simile, let the wicked be pleased! Though the opponent's argument is fallacious, the सिद्धान्तिन् accepts it seriously for the sake of argument, saying let the devil be pleased, and then demolishes it thoroughly.

तृणभक्षणन्यायः The custom of taking grass in the mouth (literally of eating grass) as a token of submission. cf. Marāṭhī 'दांतीं तृण धरणें.' There is a reference to this custom in Hch. वैरिणोऽपि हि मुच्यन्ते प्राणान्ते तृणभक्षणम्। तृणाहाराः सदैवैते हन्यन्ते पशवः कथम्॥ प्रबन्धचिन्तामणि.

तृणारणिमणिन्यायः The simile of straw, araṇi wood, and the burning gem [as means of producing fire]. The kind of fire produced by each varies; and the method of production, too, is different; that being in one case blowing, in another attrition, and in the third the rays of the sun. एवं यत्र कार्यकारणबाहुल्यं कार्यतावच्छेदकं कारणतावच्छेदकं च नाना तत्रास्य प्रवृत्तिः। वाचस्पत्य.

त्यजेदेकं कुलस्यार्थे One should abandon an individual for the sake of a whole family. Sacrifice of the lower one for the higher one! त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत्। ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत्॥ H. 1. 115.

दण्डापूपिकान्यायः The maxim of the stick and the cakes. When a stick and cakes are tied together, and one says that 'the stick has been pulled down or eaten by a rat,' we are naturally led to expect that the cakes also have been pulled down or eaten by the rat, as a matter of course, the two being so closely connected together; so, when one thing is closely connected with another in a particular way and we say something of the one, it naturally follows that what we assert of the one can, as a matter of course, be asserted of the other. cf. मूषिकेण दण्डो भक्षित इत्यनेन तत्सहचरितमपूपभक्षणमर्थादायातं भवतीति नियतसमानन्यायादर्थान्तरमापततीत्येष न्यायो दण्डापूपिका। S. D. 10.

दण्डिन्यायः The simile of a man with a stick [or, men with sticks]. cf. Mbh. 8. 2. 83. This resembles छत्रिन्याय. Read: दण्डिनो गच्छन्तीत्यत्र तु दण्ड्यदाण्डिषु समूहिषु लक्ष्यमाणेषु तदन्तर्गतस्याविशेषाद् दाण्डिशब्दार्थस्य परिग्रहः। तत्त्वबिन्दु.

देवदत्तहन्तृहतन्यायः The illustration of the slaying of the murderer of देवदत्त. The point is that the death of the murderer does not bring his victim to life again. न ह्यन्यस्यासिद्धत्वादन्यस्य प्रादुर्भावो भवति। न हि देवदत्तस्य हन्तरि हते देवदत्तस्य प्रादुर्भावो भवति। Mbh. 1. 1. 57.

दृष्टिसृष्टिन्यायः The maxim of the creation while we are awake. प्रजापतेः स्वापकाले तत्कल्पितः स्थावरजङ्गमप्रपञ्चः सर्वोऽपि तदीयेऽज्ञानेऽव्याकृताख्ये लीयते रात्र्यागमे। तथा दिवसागमे पुनस्तत एव यथापूर्वमाविर्भवतीति। एवं दृष्टिसृष्टिन्यायेनास्मत्कल्पितोऽप्ययं वियदादिप्रपञ्चोऽस्मत्सुषुप्तौ लीयतेऽस्मत्प्रबोधे यथापूर्वं प्रादुर्भवतीति। लौ. न्याय.

दृष्टे संभवति अदृष्टकल्पना न न्याय्या When a thing is established by a direct proof, there is no scope for unseen idea. प्रत्यक्षप्रमाणसिद्धे कार्ये अप्रत्यक्षकल्पना न कार्या तस्या अयोग्यत्वादिति। लौ. न्याय.; दृष्टे संभवत्यदृष्टकल्पनानवकाश इति न्यायेन धर्मजिज्ञासाधिकरणे अध्ययनविधिः फलवदर्थावबोधरूपदृष्टान्त इति सिद्धार्थः। बालमीमांसाप्रकाश; दृष्टे सति अदृष्टकल्पना निष्प्रमाणिका। तन्त्र. 1. 3. 2-4; विक्रयो हि श्रूयते, शतमधिरथं दुहितृमते दद्याद् आर्षे गोमिथुनमिति। न चैतद् दृष्टार्थे सति आनमनेऽदृष्टार्थं भवितुमर्हति। ŚB. on MS. 6. 1. 10.

देहलीदीपन्यायः The maxim of a lamp on the threshold. A lamp so placed gives light both inside and

outside the house, and is therefore used as an illustration of anything which fulfills a double purpose. यथा प्रासादे कृतः प्रदीपः सन्निधानाद्राजमार्गेऽप्युपकरोति। ŚB. on MS. 12. 1. 3. cf. काकाक्षिगोलकन्याय and जामात्रर्थं श्रपितस्य सूपादेरतिथ्युपकारकत्वम्.

द्विर्बद्धं सुबद्धं भवति (The figure of) a thing fastened twice becomes neatly fastened. If an additional support or proof is accorded to a thing already proved the thing is proven beyond doubt.

धनंजयन्यायः The simile of Arjuna. It is used to show that something, though once done, may be done again, as in the case of Arjuna who defeated the Kuru race after Krisṇa had already defeated them. cf. नित्यबोधमहिम्ना बाधितेऽपि द्वैते वाक्यजबोधस्य धनंजयन्यायेन बाधकत्वोपपत्तेः। यथाहुः 'नित्यबोधपरिपीडितं जगद्विभ्रमं नुदति वाक्यजा मतिः। वासुदेवनिहतं धनंजयो हन्ति कौरवकुलं यथा पुनः। रघुनाथ; मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन्। Bg. 11. 33; मया हतास्त्वं जहि मा व्यथिष्ठा युध्यस्व जेतासि रणे सपत्नान्। ibid. 34.

धनुर्गुणन्यायः The simile of [fastening] rope to a bow. The archers apply rope to the curved bow; similarly the good superimpose good qualities on the wicked. cf. आजन्मतोऽतिकुटिलेऽपि जने महान्तस्त्वारोपयन्ति हि गुणं धनुषीव शूराः॥ सायण.

धान्यपलालन्यायः The simile of grain and its husk. cf. Mbh. 1. 2. 39; 3. 3. 18; 3. 4. 21; 4. 1. 92. अवर्जनीयतया दुःखमागतमपि परिहृत्य सुखमात्रं भोक्ष्यते। तद्यथा—मत्स्यार्थी सशल्कान् सकण्टकान् मत्स्यानुपादत्ते स यावदादेयं तावदादाय विनिवर्तते। यथा वा धान्यार्थी सपलालानि धान्यान्याहरति स यावदादेयं तावदादाय निवर्तते। Sar. S. 1. The nyāya seems to have a different application in Marāṭhī literature according to Molesworth. "The law of the corn and its straw. Conquer the king and you conquer his subjects; accomplish or acquire a matter and you attain all it sustains or involves."

न खलु धीमतां कश्चिदविषयो नाम (Ś. 4) There is, indeed, nothing which is beyond the ken of their understanding to the intelligent.

न खलु शालग्रामे किरातशतसंकीर्णे प्रतिवसन्नपि ब्राह्मणः किरातो भवति A Brahmaṇa does not become a Kirāta by living on the Śālagrāma mountain filled with hundreds of barbarians! This is equivalent to the English proverb. "A horse does not become an ass by being born in the stable of the latter." cf. न ह्यश्वस्थाने गां पश्यन्नश्वोऽयमित्यमूढोऽध्यवस्यति। Ś. B. on Br. Sūt. 1. 4. 1; अन्यथा किरातशतसंकीर्णदेशनिवासिनो ब्राह्मणजनस्यापि किराततत्वापत्तेः। भामती 1. 1. 5.

न च सर्वत्र तुल्यत्वं स्यात् प्रयोजककर्मणाम् Acts which impel others to action are not always of the same kind. Read: न च सर्वत्र तुल्यत्वं स्यात् प्रयोजककर्मणाम्। चलनेन ह्यसिं योद्धा प्रयुङ्क्ते छेदनं प्रति॥ सेनापतिस्तु वाचैव भृत्यानां विनियोजकः। राजा संनिधिमात्रेण विनियुङ्क्ते कदाचन॥ श्लोकवार्तिक; स त्वनश्नन्योऽभिचाकशीति पश्यत्येव केवलम्। दर्शनमात्रेण हि तस्य प्रेरयितृत्वं राजवत्॥ Śaṁkara on Muṇḍa. 3. 1. 1.

नटाङ्गनान्यायः The simile of a wife of an actor. When an actor asks an actress on the stage as to whose wife she was, her answer was that she was his wife. Consonants, in language, resemble नटाङ्गना. व्यञ्जनानि पुनर्नटभार्यावद्भवन्तीति। यथा नटानां स्त्रियो रङ्गगता यो यः पृच्छति कस्य यूयं कस्य यूयमिति तं तं तव तव इत्याहुः। एवं व्यञ्जनानि अपि यस्य यस्य अचः (vowel) कार्यमुच्यते तं तं भजन्ते। लौ. न्याय.

नदीसमुद्रन्यायः The simile of a river going to the ocean. As every river becomes one with ocean, irrespective of name and form, every devotee becomes united with the Lord. यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय। तथा विद्वान् पुण्यपापे विधूय परात्परं पुरुषमुपैति दिव्यम्॥

न धर्मवृद्धेषु वयः समीक्ष्यते In case of those who are rich in piety, age is not of moment. cf. कृताभिषेकां हुतजातवेदसं त्वगुत्तरासङ्गवतीमधीतिनीम्। दिदृक्षवस्तामृषयोऽभ्युपागमन्न धर्मवृद्धेषु वयः समीक्ष्यते॥ Ku. 5. 16; न तेन वृद्धो भवति येनास्य पलितं शिरः। यो वै युवाप्यधीयानस्तं देवाः स्थविरं विदुः॥ Ms. 2. 156; तेजसां हि न वयः समीक्ष्यते। R. 11. 3; शिशुत्वं स्त्रैणं वा भवतु ननु वन्द्यासि जगतां गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः॥ U. 4. 11; प्रकृतिरियं सत्त्ववतां न खलु वयस्तेजसो हेतुः॥ Subhāṣ.

न यद्विरिशृङ्गमारुह्य गृह्यते तदप्रत्यक्षम् A thing does not become imperceptible because perceived by one who has ascended a mountain peak. cf. ननु यदि श्रोत्रकरणकेनैव प्रत्ययेन साधुत्वासाधुत्वे प्रतिपत्तारः प्रतिपद्यन्ते व्याकरणाध्ययनवन्ध्यबुद्धयोऽपि प्रतिपद्येरन्। न च प्रतिपद्यन्ते तस्मान्न ते इन्द्रियविषये इति। नैष दोषः। वैयाकरणोपदेशसाहायकोपकृतश्रोत्रेन्द्रियग्राह्यत्वाभ्युपगमात्। यथा ब्राह्मणत्वादिजातिरुपदेशसव्यपेक्षचक्षुरिन्द्रियग्राह्यापि न प्रत्यक्षगम्यतामपोज्झति। यथाह न यद्गिरिशृङ्गमारुह्य गृह्यते तदप्रत्यक्षमिति। तंत्र. 1. 2. 2.

नरसिंहन्यायः The simile of the union of man and lion. It is used to illustrate a particular kind of Alaṁkāra consisting of a combination of figures. See क्षीरनीरन्याय.

नर्तकन्यायः The simile of a dancer. One dancer gives pleasure to many spectators, just as one lamp gives light to many persons. cf. प्रत्यङ्गिकार्याण्यङ्गानि तन्त्रेणोताङ्गिनो यतः। एकैकस्योपकारकत्वं तस्मात् प्रत्यङ्ग्यनुष्ठितिः॥ विधानवदनुष्ठानं सकृदेवोपकारकम्। तद्देशकालकर्तॄणामेकत्वान्नर्तकादिवत्॥ J. N. V. 11. 1. 10.

नष्टाश्वदग्धरथन्यायः The maxim of the lost horses and burnt chariot. This is based on the story of two men travelling in their respective chariots, and one of them losing his horses and the other having his chariot burnt, through the outbreak of a fire in the village in which they were putting up for the night. The horses

that were left were harnessed to the remaining chariot and the two men pursued their journey together. Its teaching is union for mutual advantage. cf. संप्रयोगो वा नष्टाश्वदग्धरथवत्। Kāty. on P. 1. 1. 50; तयोर्नष्टाश्वदग्धरथवत् संप्रयोगः। SB. on MS. 2. 1. 1.

न हि करकङ्कणदर्शनाय आदर्शापेक्षा One does not need a looking-glass in order to look at a bracelet on the wrist. cf. अहवा हत्थकंकणं किं दप्पणेन पेक्खीअदि। Karpūr.; Marāṭhī "हातच्या कांकणाला आरसा कशाला?"

न हि काकिन्यां नष्टायां तदन्वेषणं कार्षापणेन क्रियते If a man has lost a cowrie he does not spend a कार्षापण in the search for it. This will resemble expending a sovereign in order to recover a farthing. cf. न हि कपाले नष्टे तदन्वेषणार्था इष्टिर्युक्ता। न हि काकिन्यां नष्टायां तदन्वेषणं कार्षापणेन क्रियते॥ SB. on MS. 4. 3. 39.

न हि गोधा सर्पन्ती सर्पणादहिर्भवति An iguana creeping along does not on that account become a snake. यदप्युच्यते न खल्वन्यत् प्रकृतमनुवर्तनादन्यद्भवति न हि गोधा सर्पन्ती सर्पणादहिर्भवति। भवेद् द्रव्येष्वेतदेवं स्यात्। शब्दस्तु खलु येन येन विशेषणाभिसंबध्यते तस्य तस्य विशेषको भवति। Mbh. 1. 1. 23; 1. 3. 12; 6. 1. 50.

न हि ग्रामस्थः कदा ग्रामं प्राप्नुयामित्यरण्यस्थ इव आशास्ते A man who is already in a village does not express a longing to get there, such as a man might who was out in the jungle! cf. न हि प्राणात्मनि उत्पन्नाभिमानस्य तत्प्राप्त्याशंसनं संभवति। न हि ग्रामस्थः कदा ग्रामं प्राप्नुयामित्यरण्यस्थ इव आशास्ते। असंनिकृष्टविषये ह्यनात्मन्याशंसनं न तत् स्वात्मनि संभवति। Śaṁkara on Bṛi. Up. 1. 3. 28.

न हि त्रिपुत्रो द्विपुत्र इति कथ्यते A man who has three sons would not be designated as a man with two sons. Therefore, if an order was given to bring the father of two sons, it would not do to bring one who had three sons. त्रित्वस्य द्वित्वव्यापकत्वेऽपि वाक्यस्य सावधारणत्वात् पुत्रत्रयवतः पुत्रद्वयवत्त्वेऽपि न तस्य द्विपुत्रशब्दवाच्यता। न्यूनसंख्याव्यवच्छेदकत्वेन त्रिशब्दस्य न यथा द्विपुत्रवाचकतेत्येवं यत्र विवक्षा तत्रास्य प्रवृत्तिरिति। लौ. न्याय.

न हि निन्दा निन्द्यं निन्दितुं प्रयुज्यते किं तर्हि निन्दितादितरत् प्रशंसितुम् SB. on MS. 2. 4. 21. Blame is not employed in order to blame something that is blameworthy, but rather to praise something other than that. न हि निन्दा निन्द्यं निन्दितुं प्रवर्तते अपि तु विधेयं स्तोतुम्। तंत्र.; यथैतरेयकब्राह्मणे 'प्रातः प्रातरनृतं ते वदन्ति' इत्यनुदितहोमनिन्दा उदितहोमप्रशंसार्थेति गम्यते। यथा मानवे (4. 124) ऋग्वेदो देवदैवत्यो यजुर्वेदस्तु मानवः। सामवेदस्तु पित्र्यः स्यात् तस्मात्तस्याशुचिर्ध्वनिः॥ इति सामवेदनिन्दा इतरवेदप्रशंसार्था। आगमप्रामाण्य.

न हि पूतं स्याद् गोक्षीरं श्वदृतौ धृतम् Even cow's milk would cease to be pure if placed in a vessel made of dogskin. Read: शाक्योक्ताहिंसनं धर्मो न वा धर्मः श्रुतत्वतः। न धर्मो न हि पूतं स्याद् गोक्षीरं श्वदृतौ धृतम्॥ ब्रह्मचर्यमहिंसां चापरिग्रहं च सत्यं च यत्नेन रक्षेदिति श्रुतावहिंसादिर्धर्मत्वेनोक्तः। स एव धर्मः शाक्येनाप्युक्तः। तस्माच्छाक्यस्मृतिर्धर्मे प्रमाणमिति चेत्। न। स्वरूपेण धर्मस्यापि गोक्षीरन्यायेन शाक्यसंबन्धे सत्यधर्मत्वप्रसंगात्। तदीयग्रन्थेनाहिंसादिः नावगन्तव्यः। तस्मान्न सा स्मृतिर्धर्मे प्रमाणम्। J. N. V. 1. 3. 4; सन्मूलमप्यहिंसादि श्वदृतिनिक्षिप्तक्षीरवदनुपयोग्यं विस्रम्भणीयं च। तंत्र. 1. 3. 7.

न हि भिक्षुकाः सन्तीति स्थाल्यो नाधिश्रीयन्ते न च मृगाः सन्तीति यवा नोप्यन्ते Men do not refrain from setting the cooking pots on the fire because there are beggars [who may ask for some of the contents], nor do they abstain from sowing barley because there are wild animals which may devour it. cf. Mbh. 1. 1. 39; 4. 1. 1; 6. 1. 13. दोषभीतेरनारम्भः तत्कापुरुषलक्षणम्। कैरजीर्णभयाद् भ्रातर्भोजनं परिहीयते॥ H. 2. 56; cf. Marāṭhī proverb "कां न सदन बांधावें कीं त्यांत पुढें बिळें करिल घूस।" मोरोपंत.

न हि यद् देवदत्तस्य युध्यमानस्य स्थानमवगतं तदेव भुञ्जानस्यापि भवति The position occupied by देवदत्त when eating is not that which he occupies when fighting. Read: एकत्वेऽपि हि शब्दस्य शक्तिभेदः प्रयोजने। तत्र कार्यान्तरस्थानं न स्यात् कार्यान्तरेष्वपि॥ न शब्दैकत्वेन यत् किंचित् कार्ये स्थानं दृष्टसामर्थ्यं तदेवान्यत्रापि इति शक्यते वक्तुम्। न हि यद् देवदत्तस्य ... भवति इति गम्यते। कार्यप्रयुक्ता हि स्थानविशेषादयो न स्वरूपप्रयुक्ताः। तंत्र.

न हि वरविघाताय कन्योद्वाहः The bride is not married for the destruction of the bride-groom. विषकन्यायां वृतायां यत्र वरस्य घातः संभाव्यते तत्र तां नोद्वहेदेवं विवक्षायामस्य प्रवृत्तिः। तथा चानिष्टान्तरपातादिसंभावनायामभीष्टहेतुरपि वस्तु न वरणीयमित्येवं तन्न्यायतात्पर्यम्। अयमेव न्यायः क्वचित् न हि वरघाताय कन्यामुद्वाहयतीति न्यायतया पठ्यते। तारानाथ.

न हि विधिशतेनापि तथा पुरुषः प्रवर्तते यथा लोभेन Not even a hundred injunctions could move a man to action as readily as the desire for gain does. cf. क्रियाफलं कर्तारमभिप्रैति। याजका यजन्ति गा लप्स्यामहे इति। कर्मकराः कुर्वन्ति पादिकमहर्लप्स्यामह इति। Mbh. 1. 3. 72; ऋत्विग्भ्यो दक्षिणां दद्यादिति दानं विधीयते। लोभादेवार्जनाङ्गत्वात् प्राप्तस्तेषां प्रतिग्रहः॥ न हि दद्यादित्यस्य प्रतिगृह्णीयादित्ययमर्थो भवति। भवेदपि सामर्थ्याद्यदि तदाक्षेपमन्तरेण दानविधिर्नोपपद्यते। स तु लोभप्राप्तिप्रतिग्रहबलेनोपपद्यमानो न शक्नोत्याक्षेप्तुम्। न हि ...... यथा लोभेन। तंत्र. 3. 4. 34.

न हि विवाहानन्तरं वरपरीक्षा cf. ऊषरवृष्टिन्याय, अरण्यरोदनन्याय, पिष्टपेषणन्याय etc. of the same import. यत्र क्रिया निष्फला तत्रास्य न्यायस्य प्रवृत्तिः। "Doctor after death."

न हि श्यामाकबीजं परिकर्मसहस्रेणापि कलमाङ्कुराय कल्पते Not even by the employment of a thousand different processes can Śyāmāka grain be made to germinate as rice. cf. न हि जातु वटाङ्कुरः कुटजबीजाज्जायते। न खलु कुटजबीजाद् वटाङ्कुरो जायते। भामती 1. 2. 18; 4. 1. 1; अन्यदुप्तं जातमन्यदित्येतन्नोपपद्यते। उप्यते यद्धि यद् बीजं तत्तदेव प्ररोहति॥ Ms. 9. 40; "Whatsoever a man soweth that shall he also reap."

न हि सर्वः सर्वं जानाति Everybody does not know everything. Read : व्याख्यातं न्यायवृन्दं निजमतिमनतिक्रम्य यावन्मयास्तं पारं प्राप्तुं न शक्तो न हि भवति गुरुः किं पुनर्मादृशो ना। सर्वः सर्वं न वेत्ति प्रथितमिदमतो नास्ति मेऽत्रापराधः शिष्टा ज्ञेयाः स्वयं वै सुविमलमतिभिः सम्यगाराधितार्थैः॥ रघुनाथ.

न हि सहस्रेणाप्यन्धैः पाटच्चरेभ्यो गृहं रक्ष्यते Not even a thousand blind men can protect a house from robbers.

न हि सुशिक्षितोऽपि नटबटुः स्वस्कन्धमधिरोढुं पटुः No young actor, however well-trained, is clever enough to get on his own shoulder. न हि नटः शिक्षितः सन् स्वस्कन्धमधिरोक्ष्यति। Ś. B. on Br. Sūt. 3. 3. 54.

न हि सोपानत्के पादे पुनरप्युपानहं प्रतिमुञ्चति One cannot put on again another shoe on the same foot which has already one.

न हि स्वतोऽसती शक्तिः कर्तुमन्येन शक्यते (श्लोकवार्तिक) If a power is not of itself present in a person or thing, it cannot be supplied by another. यदि स्वयं दधिभावशीलता न स्यान्नैवौष्ण्यादिनापि बलाद्दधिभावमापद्येत। न हि वायुराकाशो वा औष्ण्यादिना बलाद्दधिभावमापद्यते। साधनसामग्र्या च तस्य पूर्णता संपाद्यते। Ś. B. on Br. Sūt. 2. 1. 24; cf. न हि यो यस्य स्वतो धर्मो न संभवति सोऽन्यस्य साधर्म्यात् तस्य संभविष्यति। Ś. B. on Br. Sūt. 2. 2. 29.

न हीश्वरव्याहृतयः कदाचित् पुष्णन्ति लोके विपरीतमर्थम् (Ku. 3. 63) For, the words of the Lord never foster a contradictory meaning in the the world.

न ह्यन्यस्य वितथभावेऽन्यस्य वैतथ्यं भवितुमर्हति The falseness of one person does not prove somebody else to be false. ननु सामान्यतो दृष्टं पौरुषेयं वचनं वितथमुपलभ्य वचनसाम्यादिदमपि वितथमवगम्यते। नान्यत्वात्। न ह्यन्यस्य ... अर्हति। अन्यत्वादेव। न हि देवदत्तस्य श्यामत्वे यज्ञदत्तस्यापि श्यामत्वं भवितुमर्हति। ŚB. on MS. 1. 1. 2; न ह्यनाप्तवाक्यस्य वैतथ्ये सत्याप्तवाक्यस्यापि वैतथ्यम्। पार्थसारथि.

न ह्येष स्थाणोरपराधो यदेनमन्धो न पश्यति It is not the fault of the post that a blind man cannot see it.

नागृहीतविशेषणा बुद्धिर्विशेष्यमुपसंक्रामति Intellect which has not grasped the adjective, does not perceive the substantive. जातिरेव शब्दार्थ इति मीमांसकमतम्। तथा हि, व्यक्तीनामानन्त्यादेकव्यक्तौ शक्तिग्रहे व्यक्त्यन्तराबोधाच्च न व्यक्तौ शक्तिसंभवः। जातिविशिष्टायां व्यक्तौ शक्तिरित्युक्तौ तु नागृहीतविशेषणा बुद्धिर्विशेष्यमुपसंक्रामतीति न्यायाद् आवश्यकत्वाच्च जातावेव शक्तिरस्तु व्यक्तिबोधस्तु आक्षेपात्। लौ. न्याय.; विभक्तिर्हि लिङ्गसंख्याप्रातिपदिकार्थानां श्रुत्यैव क्रियार्थतामाह। क्रिया साध्या साधनं तत्परिच्छेदकानि च लिङ्गसंख्यादीनपेक्षते। अतः सर्वविशेषणविशिष्टा क्रियैव विधीयते। तत्र प्रत्ययः पूर्वं विशेषणे व्याप्रियतेऽन्यथानुपपत्त्या, न हि अगृहीतविशेषणा विशिष्टे बुद्धिः इति। तंत्र 4. 1. 5; cf. न ह्यप्रतीते विशेषणे विशिष्टं केचन प्रत्येतुमर्हन्ति। ŚB. on MS. 1. 3. 33.

नान्तरीयकन्यायः The maxim of invariable, inseparable association; (तदभावे तदभावरूपा व्याप्तिः।) cf. अविनाभावः संबन्धमात्रं न तु नान्तरीयकत्वम्। K. P. 2.; यत्र च संबन्धो विधीयते तत्रान्यतरस्यान्यत्र विधानम्, संबन्धो नान्तरीयको यद् वा संबन्धस्य विधानं नान्तरीयकौ संबन्धिनौ ŚB. on MS. 3. 3. 21; नान्तरीयमवश्यंभावीत्यर्थः। यथा– प्रतिबन्धकाभावे नान्तरीयकार्योत्पत्तिः अवश्यंभाविनीत्यर्थं इत्युक्तम्। यथा च कश्चिदन्नार्थी शालिकलापं सपलालं सतुषमाहरति नान्तरीयकत्वात्, स यावदादेयं तावदादाय तुषपलालान्युत्सृजति। तथा कश्चिन्मांसार्थी मत्स्यान् सकण्टकान् सशल्कलानाहरति नान्तरीयकत्वात्, स यावदादेयं तावदादाय शल्कलकण्टकान्युत्सृजतीति। लौ. न्याय.

नारिकेलफलाम्बुन्यायः The maxim of water in a cocoanut fruit. Used to illustrate when a thing is beyond any logical reasoning. यथा दृढान्तर्बहिःसंयोगवति नारिकेलफले कथं जलमायातीति न तर्कगोचरतामेति, तथागता लक्ष्मीर्नैवं लक्ष्यते। उक्तं च "आगता लक्ष्यते नैव नारिकेलफलाम्बुवत्" इति। लक्ष्मीरिति शेषः। लौ. न्याय. cf. Marāṭhī proverb "देवाची करणी आणि नारळांत पाणी."

नासाधितं करणम् That which itself is not an accomplished fact cannot be an instrument with which to bring about some other result. cf. नासाधिते हि धात्वर्थे करणत्वं ततोऽस्य सा। साध्यतां वक्ति [illegible] नैवाशक्यः क्रियात्मतः। J. N. V.

निरङ्कुशाः कवयः (Sk.) Poets are unfettered, completely free. This is used to emphasize the well-known 'poetic licence'. This condones all grammatical and other lapses committed by Kālidāsa and other great writers. प्रभुः स्वातन्त्र्यमापन्नो यदिच्छति करोति तत्। पाणिनेर्नं नदी गङ्गा यमुना च स्थली नदी॥ "I, too, am indignant when the worthy Homer nods, but in a long work it is allowable to snatch a little sleep." Horace, Ars Poetica.

निरस्तपादपे देशे एरण्डोऽपि द्रुमायते (Subhāṣ.) When there is dearth of wise and honest persons, persons with smattering of knowledge are accorded honour and respect. यत्र बहुसज्जनदुर्लभत्वेऽल्पज्ञादरस्तत्रायं प्रवर्तते। उक्तं च— यत्र विद्वज्जनो नास्ति श्लाघ्यस्तत्राल्पधीरपि। निरस्त ...... द्रुमायते। लौ. न्याय. cf. Marāṭhī proverb "वासरांत लंगडी गाय शहाणी."

निर्धनमनोरथन्यायः The simile of 'the cars of the mind' or wish of the penniless. उत्पद्यन्ते विलीयन्ते दरिद्राणां मनोरथाः। Udb.; उत्तम्योत्तम्य तत्रैव निर्धनानां मनोरथाः। हृदयेष्वेव लीयन्ते विधवास्त्रीस्तनाविव॥ "If wishes were horses, beggars might ride."

निवातस्थितदीपन्यायः The simile of a lamp placed in a windless place. This is used to denote that a person whose mind has attained complete serenity becomes steadied in meditation, just as a lamp in a windless place, burns steadily, without flicker. cf. यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता। योगिनो यतचित्तस्य युञ्जतो योगमात्मनः। Bg. 6. 19.

निषादस्थपतिन्यायः Vide Dictionary p. 926.

नीरक्षीरन्यायः The simile of discriminating water and milk mixed together. It is used to denote the

discriminatory power of separating chaff from corn, right from wrong and truth from falsehood. यथा संमिश्रिते नीरक्षीरे हीदं नीरमिदं क्षीरमिति पृथक्कर्तुं केऽपि पक्षिणो विना हंसं न शक्नुवन्ति, तथा चेदं तथ्यमिदमतथ्यमिति ज्ञातुं विवेकज्ञं परमहंसं विना न कोऽपि शक्नोति पण्डित इति भावः। उक्तं च, क्षीरं ब्रह्म जगच्च नीरमुभयं तद्योगमभ्याहतं दुर्भेदं व्यतिरेतरं चिरतरं सम्यग् विभक्तीकृतम्। येनाशेषविशेषदोषलहरीमासेदुषीं शेमुषीं सोऽयं शीलवतां पुनाति परमो हंसो द्विजात्यग्रणीः॥ लौ. न्याय.; नीरक्षीरविवेके हंसालस्यं त्वमेव तनुषे चेत्। विश्वेऽस्मिन्नधुनान्यः कुलव्रतं पालयिष्यति कः॥

नृपनापितपुत्रन्यायः The maxim of the king and barber's son. It is used to denote a man's innate fondness for his own possessions, however ugly or despicable in the eyes of others. (यत्रातिनिन्द्येऽपि स्वकीयेऽतिरम्यताबुद्धि-विवक्षा तत्रायमवतरतीति।) It takes its origin from a story which states that a king on one occasion asked his barber to bring him the finest boy that he could see in his kingdom. The barber roamed for a long time over every part of the realm, but could discover no boy such as the king wanted. At last wearied and disappointed he returned home; and being charmed with the beauty of his own boy, who, to do him justice, was a personification of ugliness and deformity, went to the king and presented the boy to him. The king was at first very angry with the barber for having trifled with him, but on consideration excused him, as he ascribed the barber's preference of his own ugly boy to the dominant desire of human beings to consider their own possessions as supreme good. cf. सर्वः कान्तमात्मीयं पश्यति। Ś. 2.

नो खल्वन्धाः सहस्रमपि पान्थाः पन्थानं विन्दन्ति Not even a thousand blind travellers can discover the road (to be taken); न हि प्राधानिकान्यन्तर्बहिष्करणानि त्रयोदश सत्त्व-प्रधानान्यपि स्वयमेवाचेतनानि तद्वृत्तयश्च स्वं वा परं वा वेदितुमुत्सहन्ते। नो खल्वन्धाः...विन्दन्ति। चक्षुष्मता चैकेन चेद् वेद्यते स एव तर्हि मार्गदर्शी स्वतन्त्रः कर्ता नेता तेषाम्। भामती 1. 1. 5.

न्यग्रोधबीजन्यायः The maxim of the fig-tree seed. It is used to denote that a seed, though small and subtle, sown in fertile land grows manifold. यथा न्यग्रोधबीजं स्तोक-मपि सुक्षेत्र उप्तं सद् बहुविस्तीर्णतां याति, तथा प्रकृतेऽपि। लौ. न्याय.

पङ्कप्रक्षालनन्यायः The maxim of the washing off the mud. Just as it is more advisable for one to avoid getting into mud than to get into it and then wash it off, so it is more advisable for one to avoid getting into danger than to expose oneself to it and then try to get out of it somehow or other. cf. धर्मार्थं यस्य वित्तेहा वरं तस्य निरीहता। प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्। Pt. 1. 159; अग्निहोत्रादीनामपि पुण्यान्तरवद् विनाश्यत्वात् पङ्कप्रक्षालनन्याया-पातादारुरुक्षुणापि तानि नानुष्ठेयानि। Ś. B. on Br. Sūt. 4. 1. 16; "Prevention is better than cure."

पङ्ग्वन्धन्यायः The maxim of the lame man and the blind man. The conception is that of a lame man mounted on the shoulders of one who is blind, so that the former is furnished with the power of locomotion and the latter with sight. It is intended to illustrate mutual dependence for mutual advantage. पुरुषस्य दर्श-नार्थं कैवल्यार्थं तथा प्रधानस्य। पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः॥ Sāṁ. K. 21.

पञ्जरचालनन्यायः The maxim of the moving of the bird-cage. This furnishes an illustration of the power of united effort. ननु पञ्जरचालनन्यायेनैतद् भविष्यति। यथैकपञ्जर-वर्तिन एकादशपक्षिणः प्रत्येकं प्रतिनियतव्यापाराः सन्तः संभूयैकं पञ्जरं चालयन्ति। एवमेकशरीरवर्तिन एकादशप्राणाः प्रत्येकं प्रतिनियतवृत्तयः सन्तः संभूयैकां प्राणाख्यां वृत्तिं प्रतिलप्स्यन्त इति। Ś. B. on Br. Sūt. 2. 4. 9.

पञ्जरमुक्तपक्षिन्यायः The simile of a bird let loose from its cage, used to illustrate the upward flight of the soul released from the body. बन्धमुक्तस्योर्ध्वगमनं दृष्टं यथा पञ्जरमुक्तशुकस्य यथा वा वारिनिर्भिन्नपरिणतैरण्डबीजस्य यथा वा दृढपङ्क-लिप्तजलनिमज्जनप्रक्षीणपङ्कलेपशुष्कालाबूफलस्य। वेदान्तकल्पतरुपरिमल.

पदातिन्यायः The simile of a footman (in the game of Chess). It is used to suggest the crookedness of the wicked at the nick of the moment. बुद्धिबलापरपर्यायचतुरङ्गाख्य-क्रीडने (the game of chess) पदाति (Mar. प्यादें)—ऋजुमार्गेण चलन् हननावसरे वक्रमार्गमुररीकरोति। अयं भावः। बुद्धिबलाख्यक्रीडने कल्पितौ राजमन्त्रिणौ सह चतुरङ्गबलेनान्योन्यं युध्यतः। तत्र तेषां गति-भेदोऽस्ति। पदातेस्तु ऋजुपथेन गमनम्, वक्रमार्गेण चाग्रस्थशत्रुहन्तृत्व-मिति तद्विदो वदन्तीति। एवं दुर्जनाचारो ज्ञेयः। ऋजुना पथा चलन्नपि हनने वक्रां गतिं कलयन्। बुद्धिबलाख्यं क्रीडन् पदातिरिव दुर्जनो ज्ञेयः॥ लौ. न्याय.

पदार्थानुसमयन्यायः Vide Dictionary p. 960.

पद्मपत्रस्थिततोयन्यायः The maxim of water on the lotus leaf. It is used to illustrate two things: (1) All creation is sentient; (2) the company of the great yields the best reward. cf. लिप्यते न स पापेन पद्मपत्रमिवाम्भसि।; पद्मपत्रस्थितं तोयं धत्ते मुक्ताफलश्रियम्। महाजनस्य संपर्कः कस्य नोन्नतिकारकः॥; मुक्ताकारतया तदेव नलिनीपत्रस्थितं राजते। Bh. 2.

पर्जन्यन्यायः The simile of rain. cf. ईश्वरस्तु पर्जन्यवद् द्रष्टव्यः। Br. Sūt. 2. 3. 42; कृतकारि खल्वपि शास्त्रं पर्जन्यवत्। तद्यथा पर्जन्यो यावदूनं पूर्णं च सर्वमभिवर्षति Mbh. 1. 2. 9; 6. 1. 127. It rains everywhere without special favour or disfavour. Rain is equal and equitable to all. यथा पर्जन्यो बीजविशेषेषु रागं क्वेषुचिद् द्वेषं चाकृत्वा उदासीनः सन् वर्षति, एवमीश्वरोऽपि पुण्यवत्सु रागं पापिषु द्वेषं चाकुर्वन् जगत् सृजति। नीलकण्ठ on Bg. 9. 9; पर्जन्य इव भूतानामाधारः पृथिवीपतिः। विकलेऽपि हि पर्जन्ये जीव्यते न तु भूपतौ॥ H. 1. 174.

पश्यस्यद्रौ ज्वलदग्निं न पुनः पादयोरधः (हेमचन्द्र) You see the fire burning on the mountain, but not that which is under your feet. "Why beholdest thou the mote that is in thy brother's eye, but perceivest not the beam that is in thine own eyes" cf. Marāṭhi proverbs "आपल्या पायाखाली काय जळते तें पाहावें!"; "दुसऱ्याच्या

डोळ्यांतलें कुसळ दिसतें पण आपल्या डोळ्यांतलें मुसळ दिसत नाहीं"; "लोकां सांगे ब्रह्मज्ञान आपण कोरडे पाषाण।" (यत् परं शिक्षयस्येवं न स्वं शिक्षयसि स्वयम्।)

पाटच्चरलुण्ठिते वेश्मनि यामिकजागरणम् The vigilance of the watchman after the house has been plundered by thieves. This is equivalent to the English proverb, "Shutting the stable door after the horse is gone".

पाठक्रमन्यायः Vide Dictionary p. 1003.

पित्तं यदि शर्करया शाम्यति कोऽर्थः पटोलेन If bile is counteracted [pacified] by sugar what is the use of a species of [bitter] cucumber [used as medicine]. It is used to illustrate the futility of strenuous efforts to succeed in an undertaking which requires little effort. सामसाध्येषु कार्येषु यो दण्डं योजयेद् बुधः। स पित्तं शर्कराशाम्यं पटोलं कटुकं पिबेत्। Pt. 3. 132.

पिपीलिकागतिन्यायः The maxim of the speed of ants. "Slow and steady wins the race." यथा पिपीलिका वृक्षशिरःस्थितमधुरफलरसास्वादने झटित्यशक्ता सत्यपि बह्वायासेन गच्छन्ती कालान्तरे तद्रसमवश्यमास्वादते, तथैवाज्ञानी पुरुषः श्रुतिस्मृतिपुराणविहितकर्मोपासनादिमार्गसंजातशुद्धान्तःकरणतया जन्मान्तरेषु कदाचित् प्राप्तपूर्णज्ञानोऽवश्यं ब्रह्मानन्दमनुभवतीति। लौ. न्याय.; योजनानां शतं गच्छेच्छनैर्यान्ती पिपीलिका। अगच्छन् वैनतेयोऽपि पदमेकं न गच्छति॥

पिष्टपेषणन्यायः The maxim of grinding flour or meal, used to denote a superfluous or unprofitable exertion like the attempt of a man to grind pounded flour. cf. न हि स्निग्धस्य स्नेहनं शक्यं कर्तुं पिष्टस्य वा पेषणम्। ŚB. on MS. 9. 2. 3; यदि तावच्छ्रुतस्यार्थस्य प्रश्नः कृतस्ततः पिष्टपेषणवत् पुनरुक्तोऽनर्थकः प्रश्नः स्यात्। Śaṁkara on Ken. 32; तुषकण्डनन्याय and कृतस्य करणं वृथा।

पुष्टलगुडन्यायः The simile of a stout cudgel. Such a stick hurled at a yelping cur, may at the same time strike and silence other dogs near it; and so the nyāya seems to be used somewhat in the sense of "killing two birds with one stone." एकतान्त्रिकमतनिरासाय प्रयुक्तया युक्त्या तत्सदृशमतान्तरनिराकरणं यदा विवक्ष्यते तदा पुष्टलगुडन्यायप्रवृत्तिः। रघुनाथ. The maxim is akin to प्रधानमल्लनिबर्हणन्याय.

पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः Special rules are taken into consideration first and afterwards general rules. See Mbh. 2. 4. 83; 3. 1. 3; 3. 2. 124 etc.

प्रत्यक्षे किमनुमानम् Where there is direct sense perception, what need is there of inference? It is a well-known principle. cf. वेदवाक्यानुमानं हि तावदेव प्रवर्तते। तदर्थविषयं यावत् प्रत्यक्षं नोपलभ्यते॥; प्रत्यक्षे श्रूयमाणे तु न विधेतानुमानिकम्। न हि हस्तिनि दृष्टेऽपि तत्पदेनानुमीयते॥ तंत्र. 1. 3. 2-3; प्रत्यक्षमनुमानाद्बलीयः। ŚB. on MS. 3. 1. 12.

प्रधानमल्लनिबर्हणन्यायः The maxim of the destruction of the chief antagonist. It illustrates the principle that when the most formidable enemy has been defeated, the less formidable are already virtually overcome. अतः प्रधानमल्लनिबर्हणन्यायेनातिदिशति। एतेन प्रधानकारणवादप्रतिषेधन्यायकलापेन सर्वेऽण्वादिकारणवादा अपि प्रतिषिद्धतया व्याख्याता वेदितव्याः। Ś. B. on Br. Sūt. 1. 4. 28.

प्रपानकरसन्यायः The simile of a kind of drink (sherbet). It is used to illustrate the production of some new thing by the union of others, just as sherbet is the result of the commingling of various ingredients. प्रतीयमानः प्रथमं प्रत्येकं हेतुरुच्यते। ततः संवलितः सर्वो विभावादिः सचेतसाम्। प्रपानकरसन्यायाच्चर्व्यमाणो रसो भवेत्। यथा खण्डमरीच्यादीनां संमेलनादपूर्व इव कश्चिदास्वादः प्रपानकरसे संजायते विभावादिसंमेलनादिहापि तथेत्यर्थः। S. D. This is meant to show how the flavour is single, though spoken of as resulting from a composition of causes.

प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते (श्लोकवार्तिक)— Even a stupid person does not adopt a course of action without a motive.

प्रस्तरप्रहरणन्यायः Vide Dictionary p. 1119.

फलवत्संनिधावफलं तदङ्गम् (ŚB. on MS. 4. 4. 19) The principle that whatever has no result of its own, but is mentioned in connection with something else which has such a result, is subordinate to the latter. cf. Ś. B. on Br. Sūt. 2. 1. 14.

बधिरकर्णजपन्यायः The illustration of whispering in the ear of a deaf man. See अरण्यरोदनन्याय etc.

बर्हिर्न्यायः Vide Dictionary p. 1154.

बहूनामनुग्रहो न्याय्यः The association of many is good policy. cf. बहूनामप्यसाराणां मेलनं कार्यसाधकम्। तृणैः संपाद्यते रज्जुस्तया नागोऽपि बध्यते॥ Pt 1. 331.

बीजवृक्षन्यायः The maxim of the seed and tree. A tree is an outcome of a seed and the seed is the effect of the tree. It is very difficult to decide which is earlier in time. Each is a cause and effect of the other.

बीजाङ्कुरन्यायः The maxim of an eternal series of seed and shoot. As the seed produces the shoot, so the latter in turn reproduces the former. Each therefore is a cause and effect. न च कर्मान्तरेण शरीरं संभवति। न च शरीरमन्तरेण कर्म संभवतीति इतरेतराश्रयत्वप्रसंगः। अनादित्वे तु बीजाङ्कुरन्यायेनोपपत्तेर्न कश्चिद् दोषो भवति। Ś. B. on Br. Sūt. 2. 1. 16; बीजं विना नाङ्कुरो जायते, अङ्कुरं विना च न बीजोत्पत्तिरिति। एवं यत्र परस्परकार्यकारणभावस्तत्रायं न्यायः प्रवर्तते। तथा च बीजजातीयं प्रत्यङ्कुरजातीयम्, अङ्कुरजातीयं प्रति बीजजातीयं कारणम्। अतो बीजाङ्कुरप्रवाहानादितया च यद् बीजं प्रति यदङ्कुरस्य कारणत्वं तदङ्कुरं प्रति तद्बीजस्य न कारणत्वमतो नान्योन्याश्रयः। लौ. न्याय.; cf. the maxim of the same import अण्डकुक्कुटीन्याय.

बुभुक्षितः किं न करोति पापम् What sin does a hungry man not do? Hunger leads to any sin, impiety or crime. cf. दरिद्रः किं न कुरुते।

ब्राह्मणग्रामन्यायः The maxim of a village in which Brāhmaṇas abound. This shows the village has more numerous Brāhmaṇas than in some other village (प्रचुरब्राह्मणो ग्रामः) or in the village the Brāhmaṇas outnumber the other castes (प्रचुरब्राह्मणो ग्रामः). This is according to the maxim प्राधान्येन व्यपदेशा भवन्ति. cf. मल्लग्रामन्याय.

ब्राह्मणपरिव्राजकन्यायः The maxim of the Brāhmaṇas and the mendicants. In such a sentence as ब्राह्मणा भोजयितव्याः परिव्राजकाश्च, the separate mention of the mendicants, who are included in the term Brāhmaṇa, merely emphasizes their position as a special part of the general body. The maxim has the same import as गोबलीवर्दन्याय, तक्रकौण्डिन्यन्याय and ब्राह्मणवसिष्ठन्याय. cf. वैदिकानां लौकिकत्वेऽपि प्राधान्यख्यापनार्थं पृथग्ग्रहणं यथा ब्राह्मणा आगता वसिष्ठोऽप्यागत इति। पदमञ्जरी.

ब्राह्मणश्रमणन्यायः The maxim of the Brāhmaṇa-ascetic. The श्रमण is a Buddhist ascetic and hence not a Brāhmaṇa, but the expression ब्राह्मणश्रमण implies that though now a Buddhist formely he was a Brāhmaṇa. cf. अत्रामित इत्यादावपिशब्दाभावाद् विरोधाभासो व्यङ्ग्यः। व्यङ्ग्यस्यालंकार्यत्वेऽपि ब्राह्मणश्रमणन्यायादलंकारत्वमुपचर्यते। S. D.

भक्षितेऽपि लशुने न शान्तो व्याधिः Although the garlic has been eaten the disease is not cured. cf. ननु भक्षितेऽपि लशुने न शान्तो व्याधिरिति न्यायेन प्रपञ्चस्याधिष्ठानव्यतिरिक्ततया प्रतीयमानत्वात् कथमद्वैतसिद्धिरित्याशङ्क्य तूष्णीकुर्वन्नाह अखण्डमिति। com. on वेदान्तसार. This is used to illustrate the non-attainment of the coveted result in spite of the performance of a prohibited act.

भद्रमभद्रं वा कृतमात्मनि प्रकल्पते An act good or bad conduces [to happiness or otherwise] of the performer himself. cf. Marāṭhī proverb "करावें तसें भरावें."

भस्मनि आज्याहुतिः Offering clarified butter on ashes instead of on the sacrificial fire. This is used to illustrate wasted or misdirected effort. cf. स य इदमविद्वानग्निहोत्रं जुहोति यथाङ्गारानपोह्य भस्मनि जुहुयात् तादृक् स्यात्। Ch. Up. 5. 24; अकार्यवारणोद्युक्तो मूढे यः परिखिद्यते। वाग्विस्तरो वृथा तस्य भस्मन्याज्याहुतिर्यथा॥; नोपदेशशतेनापि मूढोऽकार्यान्निवर्तते। शीतांशुग्रसनात् केन राहुर्वक्त्रैर्निवारितः॥ उपमितिभवप्रपञ्चा कथा.

भस्मीभूतस्य देहस्य पुनरागमनं कुतः This is the theory of the लोकायतिक or Materialists. They do not believe in pre-birth and rebirth. So they do not take into consideration धर्म and मोक्ष पुरुषार्थs. cf. यावज्जीवं सुखं जीवेद् ऋणं कृत्वा घृतं पिबेत्। भस्मी... कुतः॥; असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम्। अपरस्परसंभूतं किमन्यत् कामहैतुकम्॥ Bg. 16. 8.

भारैकदेशावतरणन्यायः The illustration of the lowering of one part of a load [and thus easing one's burden]. दृढविपर्ययज्ञानानन्तरं सहसैव च सम्यग्ज्ञानोत्पादातिभाराद् भारैकदेशावतरणार्थं संशयोत्थापनामात्रमेव तावद्युक्तम्। तंत्र. 1. 3. 22.

भिक्षुपादप्रसारणन्यायः The maxim of a beggar's obtaining a firm footing [in a patron's house]. cf. the English equivalent. "Give him an inch and he will take an ell." यथा कश्चिद् भिक्षुर्यथेष्टभोजनाच्छादनवासगृहादिलाभार्थं कस्यचिद् धनिनो गृहे प्रविश्य युगपत् सर्वाभीष्टलाभं मन्यमानः प्रथमं धनिगृहे मे पादप्रसारणमस्तु पश्चादनेन परिचयमुत्पाद्य सर्वमभीष्टं संपादयामीति धिया स्वल्पामपि भिक्षां बहुमन्यमानः पश्चात् क्रमेण स्वाभीष्टं संपादयत्येवं यत्र विवक्षा तत्रास्य प्रवृत्तिः। रघुनाथ. cf. Mar. "भटाला दिली ओसरी भट हातपाय पसरी"; "चञ्चुप्रवेशे मुसलप्रवेशः।"

भिल्लीचन्दनन्यायः The maxim of a Bhil woman and sandal tree. cf. the English equivalent "Familiarity breeds contempt." अतिपरिचयादवज्ञा संततगमनादनादरो भवति। मलये भिल्लपुरन्ध्री चन्दनतरुकाष्ठमिन्धनं कुरुते॥ Subhāṣ.; cf. Mar. "अतिपरिचय खोटा मान राहात नाहीं।"

भूतं भव्याय कल्पते A thing accomplished in the past conduces to the attainment of the result in future. The मीमांसकs avow that an accomplished sacrificial act is not an end in itself but for the bringing about of a result in the future such as the attainment of heaven etc. This, consequently, necessitates belief in the theory of अपूर्व as a connecting link between the two.

भूमिरथिकन्यायः The simile of the man who in order to become proficient makes drawings of a war-chariot on the ground. यत्तावदुपाध्यायः शिष्यसंनिधावधीते तद्ग्रहणार्थम्। यच्छिष्यस्तद्धारणार्थम्। ग्रहणधारणे प्रयोगार्थे भूमिरथिकवत् शुष्केष्टिवद्वा। तद्यथा भूमिरथिको भूमौ रथमालिख्य शिक्षां करोति संग्रामे प्राशुभावो भवितेति यथा च छात्रः शुष्केष्टीः प्रयुङ्क्ते प्रयोगे प्राशुकर्मा भवितास्मीति। एवमेतद् द्रष्टव्यम्। ŚB. on MS. 7. 2. 15.

भूलिङ्गशकुनिन्यायः The simile of the bird भूलिङ्ग. The purport of the maxim seems to be, "Practise what you preach". cf. अथ चैषां न ते बुद्धिः प्रकृतिं याति भारत। मयैव कथितं पूर्वं भूलिङ्गशकुनिर्यथा॥ भूलिङ्गशकुनिर्नाम पार्श्वे हिमवतः परे। भीष्म तस्याः सदा वाचः श्रूयन्तेऽर्थविगर्हिताः॥ मा साहसमितीदं सा सततं वाशते किल। साहसं चात्मनातीव चरन्ती नावबुध्यते॥ सा हि मांसार्गलं भीष्म मुखात् सिंहस्य खादतः। दन्तान्तरविलग्नं यत् तदादत्तेऽल्पचेतना॥ इच्छतः सा हि सिंहस्य भीष्म जीवत्यसंशयम्। तद्वत् त्वमप्यधर्मिष्ठ सदा वाचः प्रभाषसे॥ इच्छतां भूमिपालानां भीष्म जीवस्यसंशयम्। लोकविद्विष्टकर्मा हि नान्योऽस्ति भवता समः॥ Mb. 2.44.27-32; यो भूलिङ्गन्यायेन परोपदेशमात्रकुशलः स्वयं च यथेष्टाचरणशीलः सोऽपि दाम्भिकत्वात् त्यक्तव्यः। भूलिङ्गाख्यः पक्षी मा साहसं कुर्विति पुनः पुनरुच्चैर्वदन् सिंहदंष्ट्रान्तलग्नं मांसलवं जिघृक्षतीति प्रसिद्धम्। रघुनाथ.

भ्रष्टावसरन्यायः The simile of a lost opportunity or proper occasion. It is used to illustrate that something does not take place when the occasion for its taking place has once gone. यदपि यजमानस्य भ्रष्टावसरं क्रियमाणं विगुणं भवति इति तदपि गुणलोपे मुख्यस्य इत्यनेन विरुद्धम्। तंत्र. 3. 5. 46. cf. निर्वाणदीपे किमु तैलदानं चौरे गते वा किमु सावधानम्। वयोगते किं वनिताविलासः पयोगते किं खलु सेतुबन्धः। Subhāṣ.; Mar. "बैल गेला नि झोपा केला."

मक्षिकान्यायः The simile of a fly. It is used to illustrate the fault-finding nature of the wicked just as a fly concentrates on a wound.

मञ्जूषाखुन्यायः The simile of a rat entering a casket. It is used to express the effort to obtain the coveted thing ending in a positive harm to one's life. कदाचित् कश्चिन्मूषको भक्ष्याशया सर्पमञ्जूषां दृष्ट्वा प्रविष्टस्तत्र तेन भक्षितः।

मणिविक्रयदृष्टान्तः The illustration afforded by the sale of gems. It is intended to teach that, in disposing of precious stones, one who understands their value will derive greater advantage than one who is without that knowledge. यदेव विद्यया करोति...तदेव वीर्यवत्तरं भवति।... दृष्टं हि लोके वणिक्शबरयोः पद्मरागादिमणिविक्रये वणिजो विज्ञानाधिक्यात् फलाधिक्यम्। तस्माद् यदेव विद्यया विज्ञानेन युक्तः सन् करोति कर्म... तदेव कर्म वीर्यवत्तरमविद्वत्कर्मणोऽधिकफलं भवति। Śaṁkara on Ch. Up. 1. 1. 10.

मण्डूकप्लुतिन्यायः The maxim of a frog's leap. It is used by grammarians and others to express the passing from one rule or topic to another over intervening ones. cf. Mbh. 1. 1. 3; 6. 1. 17. etc; केचन मण्डूकप्लुतिन्यायेनानुवर्तनस्यानुचितत्वाद् भ्रान्तिमदनन्तरमपह्नुतिर्ग्रन्थकृता लक्षिता उल्लेखश्चातिशयोक्त्यनन्तरामिति ग्रन्थं विपर्यासितवन्तः। जयरथ's com. on अलंकारसर्वस्व 20.

मदशक्तिवत् The simile of the power of an intoxicant. अत्रैके देहमात्रात्मदर्शिनो लोकायतिका देहव्यतिरिक्तस्यात्मनोऽभावं मन्यमानाः समस्तव्यस्तेषु बाह्येषु पृथिव्यादिषु अदृष्टमपि चैतन्यं शरीराकारपरिणतेषु भूतेषु स्यादिति संभावयन्तस्तेभ्यश्चैतन्यं मदशक्तिवद्विज्ञानं चैतन्यविशिष्टः कायः पुरुष इति चाहुः। Ś. B. on Br. Sūt. 3.3.53.

मधु पश्यसि दुर्बुद्धे प्रपातं नानुपश्यसि (Mb. 12. 311. 7) Oh wicked one, you behold the honey but do not behold the precipice. cf. मधु यः केवलं दृष्ट्वा प्रपातं नानुपश्यति। स भ्रष्टो मधुलोभेन शोचत्येवं यथा भवान्॥ Mb. 11. 1. 37; यो हि मधुन्येव दत्तदृष्टिर्दुर्बलां शाखामधिरोहति तस्य विनिपात एव भवति। "मधुदृष्टिवदेवास्य गुणकामं प्रपश्यतः। क्रियाफलविनाशात्मा विनिपातः प्रसज्यते॥" शास्त्रदीपिका 3. 6. 3; दुग्धं पश्यति मार्जारो यथा न लगुडाहतिम्। Subhāṣ.; cf. "घी देखा पण बडगा नहि देखा!"

महतापि प्रयत्नेन तमिस्रायां परामृशन्। कृष्णशुक्लविवेकं हि न कश्चिदधिगच्छति (तंत्र 1. 3. 1) Not even by the most thorough examination, could one distinguish between black and white in pitchy darkness. This illustrates the impossibility of tracing the sources from which Manu and other Smṛiti writers derived their laws.

मर्कटमदिरापानादिन्यायः The simile of monkey drinking wine etc. cf. Marāṭhī equivalents: "आधींच तारें त्यांत शिरलें वारें!; आधींच मर्कट तशांतहि मद्य प्याला। झाली तशांतचि तयासहि भूतबाधा॥"

मात्स्यन्यायः The simile drawn from fish. It is used to illustrate the oppression of the weak by the strong, "Might is right"; "Survival of the fittest." Read: मत्स्य एव मत्स्यं गिलति Śat. Br. 1. 8. 1; दुर्बलं बलवन्तो हि मत्स्या मत्स्यं विशेषतः। भक्षयन्ति सदा वृत्तिर्विहिता नः सनातनी॥ Mb. 3. 190. 8; राजा चेन्न भवेल्लोके पृथिव्यां दण्डधारकः। जले मत्स्यानिवाभक्ष्यन् दुर्बलं बलवत्तराः॥ अराजकाः ... एवं विनेशुरिति नः श्रुतम्। परस्परं भक्षयन्तो मत्स्या इव जले कृशान्॥ Mb. 13. 67. 16-17; Rām. 2. 67. 31; परस्परामिषतया जगतो भिन्नवर्त्मनः। दण्डाभावे परिध्वंसी मात्स्यन्यायो प्रवर्तते॥ Kām. 2. 40.

मानाधीना मेयसिद्धिः To know the thing to be measured you must know the measure. मानाधीना मेयसिद्धिरिति न्यायेन प्रमाणस्य प्रथममुद्देशे तदनुसारेण लक्षणस्य कथनीयतया प्रथमोद्दिष्टस्य प्रमाणस्य प्रथमं लक्षणं कथ्यते। Sar. S. न्यायदर्शन.

माषराशिप्रविष्टमषीन्यायः The simile of a grain of soot in a heap of spotted beans. This is akin to the English proverb "a needle in a haystack". शकारः– भावे भावे बलिए क्खु अंधआले माशलाशिपविट्टा विअ मशीगुडिआ दीशन्ती दीशन्ती जेव पणट्टा वशंतशेणिआ Mk. 1.

मिथिलायां प्रदीप्तायां न मे दह्यति किंचन (Mb. 12. 178) "If Mithilā should be in flames nothing of mine would be burnt up" (said by Janaka). It is used to indicate the freedom from anxiety of one who has nothing to lose. न हास्यकर्म क्षीयते। कर्माभावादेवेति नित्यानुवादः। यथाविदुषः कर्मक्षयलक्षणं संसारदुःखं संततमेव न तथा तदस्य विद्यत इत्यर्थः। मिथिलायां...किंचनेति तद्वत्। Śaṁkara on Bṛi. Up. 1. 4. 15.

मुण्डितशिरोनक्षत्रान्वेषणम् Enquiring as to a suitable date for the shaving of one's head when one has already performed that ceremony. See: कृतक्षौरस्य नक्षत्रपरीक्षा.

मुनिर्मनुते मूर्खो मुच्यते A sage meditates on Brahman and a fool is emancipated. This illustrates an impossible sequence (असंगति). "The fathers have eaten sour grapes and the children's teeth are set on edge." Ezekiel XVIII. 2. एतेनेदमपास्तं मुनिर्मनुते मूर्खो मुच्यत इत्येतच्छास्त्रफलं प्रयोक्तरि इति न्यायविरुद्धम्। तथा चाभाणकः 'काचिन्निषादी तनयं प्रसूते कश्चिन्निषादस्तु कषायपायी' इति। मुनिकर्तृकश्रवणादिविधिफलस्य साक्षात्कारस्य मूर्खेऽनभ्युपगमात्। वेदान्ततत्त्वविवेक.

मृगतृष्णा (तृष्णिका) न्यायः The simile of mirage. It illustrates that the existence of the universe is ill-founded, like a mirage. जातः सखे प्रणयवान् मृगतृष्णिकायाम्। Ś. 6. 16; मृगतृष्णारूपमेतद् दर्शनम्। ŚB. on MS. 9. 1. 31; रे चित्त चिन्तय चिरं चरणौ मुरारेः पारं गमिष्यसि यतो भवसागरस्य। पुत्राः कलत्रमितरे सुहृदः सहायाः सर्वं विलोकय सखे मृगतृष्णिकाभम्॥

मृतमारणन्यायः Akin to ऊषरवृष्टिन्याय, अरण्यरोदनन्याय, पिष्टपेषणन्याय etc.

यः कुरुते स एव भुङ्क्ते He who performs an action will himself reap the fruit thereof, whether in the form of a reward or retribution. This doctrine is common to all the six orthodox schools. cf. the Marāṭhī proverb "करील तो भरील."

यः कारयति स करोत्येव He who causes a thing to be done by another is himself the real doer of it. This nyāya is of common occurrence. एवमेकेनापि पिबता द्वौ पिबन्तावुच्येते। यद्वा जीवस्तावत् पिबतीश्वरस्तु पाययति पाययन्नपि पिबतीत्युच्यते। Śaṁkara on Muṇḍ 3. 1. 1.

यदुष्ट्रस्य पृष्ठे न माति तत् कण्ठे निबध्यते That for which there is no room on a camel's back, is tied to his neck! The maxim illustrates the piling up of misfortunes almost beyond endurance. It is akin to the English maxim "It is the last straw which breaks the camel's back". महाभारतमाक्रान्तमूर्तेरारातिकारिणः। यत् पृष्ठे माति नोष्ट्रस्य गलके तन्निबध्यते॥ उपमितिभवप्रपञ्चा कथा.

यत् कृतकं तदनित्यम् Anything that has been made is non-eternal. In other words, that which has a beginning has also an end; except of course, the नैयायिक's प्रध्वंसाभाव, which has a beginning but no end!

यदश्वेन हृतं पुरा तत् पश्चाद् गर्दभैः प्राप्तुं केनोपायेन शक्नुयात् (न्यायमञ्जरी) The maxim occurs in the course of a discussion of the relative value and authority of Śruti and Smriti. न च श्रुतिजनितप्रत्ययस्य स्मृतिजनितो बाधकत्वं प्रतिपद्यते। स्मार्तस्य बाधकः श्रौतो बलवत्त्वात् प्रतीयते। प्रत्यक्षे चानुमाने च प्रागेतद्व्यवधारितम्।... न च शीघ्रहृतेऽश्वेऽस्ति चिरादागच्छतो गतिः। अश्वैरपहृतं को हि गर्दभैः प्राप्तुमर्हति॥ तंत्र. 1. 3. 3.

यस्य नास्ति पुत्रो न तस्य पुत्रस्य क्रीडनकानि क्रियन्ते (ŚB. on MS. 10. 3. 5) Toys are not made for the son of a man who has no son! न हि अनङ्गे कर्मणि अङ्गस्य विशेषो विधिः स्यात्। भवति च विशेषविधिः 'आश्वबालः प्रस्तरः' इति। न हि असति प्रस्तरे प्रस्तरविशेषः शिष्येत यथा यस्य ...... क्रियन्ते।

याचितकमण्डनन्यायः The maxim of borrowed ornaments. To appear in borrowed plumes. अस्याः मुखश्रीप्रतिबिम्बमेवं जलाच्च तातान्मुकुराच्च मित्रात्। अभ्यर्थ्य धत्तः खलु पद्मचन्द्रौ विभूषणं याचितकं कदाचित्॥ N. 7. 56.

यादृशो यक्षस्तादृशो बलिः As is the यक्ष, so should be the offering. The general sense of the maxim seems to be "tit for tat", "a Roland for an Oliver". cf. Mar. "जशास तसें", "जशी देणावळ तशी धुणावळ".

यावद्वचनं वाचनिकम् Conveying the meaning actually expressed (and therefore needing nothing to supplement it). कश्चात्र विशेषः। स यदि वाचनिकस्ततो यावद्वचनमेव कर्तव्यः। तंत्र. 3. 5. 19.

रज्जुसर्पन्यायः The maxim of the superimposition of serpent on the rope. This is the usual illustration of विवर्तवाद like शुक्तिरजत etc. यथा रज्जोरज्ञानतया सर्पात्मना भानं ज्ञातायास्तु स्वरूपेण, तथा ब्रह्मणोऽनवबुद्धस्य सप्रपञ्चत्वेन, बुद्धस्य च निष्प्रपञ्चत्वेन भानं न मानान्तरविरुद्धमित्यर्थः। लौ. न्याय. As a serpent is a विवर्त (an apparent or illusory form) of a rope, so is the world a विवर्त of the real entity Brahman, and the illusion is removed by विद्या or true knowledge.

रथकारन्यायः Vide Dictionary p. 1327.

राजपुत्रव्याधन्यायः The illustration of the king's son [who was brought up] as a hunter. The story is that a young prince, abandoned by his parents at his birth, was adopted by a hunter and brought up as his son. The boy remained in ignorance of his real origin until he was discovered by a kindly person and restored to his rightful position. cf. Śaṁkara on Bri. Up. 2. 1. 20.

राजपुरप्रवेशन्यायः The simile of the manner of entering a royal city. विशृङ्खलतया राजपुरप्रवेशे राजपुररक्षकैस्ताडनादिकं क्रियेतेति भिया श्रेणीभूततया यथा तत्पुरप्रवेश एवं सुशृङ्खलतया यत्र कार्यकारणस्य विवक्षा तत्रास्य प्रवृत्तिः। वाचस्पत्य. We do not grasp the meaning of a long sentence as a whole, but the sense of each word enters the mind singly on the principle of राजपुरप्रवेश. cf. अभिहितान्वयवाद.

रात्रिसत्रन्यायः Vide Dictionary p. 1338.

राधावेधोपमा The simile of piercing the central figure of a target. It means hitting the bull's eye. It is used of something difficult of accomplishment and requiring great skill.

रुधिरसंपर्कवतो विषस्य शरीरे प्रसर्पणम् The circulation within the body of poison which has entered the blood. It is used as a warning against the beginnings of evil in however small a degree. cf. विषं रुधिरमासाद्य प्रसर्पति यथा तनौ। तथैव छिद्रमासाद्य दोषश्चित्ते प्रसर्पति॥ बोधिचर्यावतार 7. 69; "The beginning of strife is as when one letteth out water; therefore leave off contention before there be quarrelling." cf. Mar. "भांडणापेक्षा अबोला बरा."

